Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080469

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080469

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080469

सागरिका

त्रैमासिकी

12-6-68

080469

पुस्तकालय
गुरुकुल काँगड़ी

सप्तमे वर्षे प्रथमोऽङ्कः

RT-0432

सागरिकासमितिः, सागरविश्वविद्यालयः
सागरम् [म. प्र.]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सागरिका

त्रैमासिकी

सप्तमं वर्षम् २०२५ वि. सं.

सप्तमे वर्षे प्रथमोऽङ्कः

सम्पादकः

प्रा० रामजी उपाध्यायः, एम्० ए०, डी० लिट्०
सागरविश्वविद्यालये
संस्कृतविभागाध्यक्षः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाशिका–
संस्कृत–परिषद्
सागरिका–समितिः
सागरविश्वविद्यालयः
सागरम् [मध्यप्र.]

देयम्

प्रत्यङ्कम्	रु०	३=००
वार्षिकम्	रु०	८=००
वस्त्रावरणसहितवार्षिकचतुरङ्काणाम्	रु०	१०=००
आजीवनग्राहकस्य	रु०	१००=००

अङ्कनिर्गमनम्– आषाढाश्विन–पौष–चैत्रमासेषु
[जून-सितंबर-दिसंबर-मार्चेषु]

चेकद्वारा संप्रदानार्थं देयेषु उपर्युक्तधनेषु अपरं रूप्यकमेकं संयोजनीयम् ।

मुद्रकः–
श्रीरामलालपाण्डेयः
युगधर्ममुद्रणालयः
रायपुरम् [मध्यप्र.]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

अत्यन्तं हर्षस्यायं विषयो यत् सागरिका सांप्रतं सप्तमं वर्षं प्रविशति तत्रायमस्याः प्रथमः अंकः। अत्र हि "आधुनिकस्य संस्कृतसाहित्यस्य प्रकाशनरूपं" यदस्माकमुद्देश्यं तदनुसृत्य "सीताचरित"-नामकमेकम् अभिनवतम महाकाव्यं प्रकाश्यते। अत्रायमपरो हर्षविषयो यत् काव्यमिदं संपूर्णमेवात्र प्रकाश्यते। अयं चात्र सुवर्णसौरभयोगो यदत्र काव्यपरिचायको मुखबन्धः तस्यैव गूढाभिप्रायावेदिका संकेतनाम्नी संक्षिप्ता व्याख्या च प्रदीयते।

कवेः परिचयः—

एतस्य त्रितयस्यापि रचयिता सागरिकापाठकानां सुपरिचित एवास्ति-"कालिदासभारती"-प्रभृतीनां शोधसन्दर्भाणामारचयिता डा. रेवाप्रसादद्विवेदी। अत्रास्यापरमपि नाम लभ्यते "सनातन" इति। मध्यप्रदेशराजधान्या भोपाल-नगरादनतिदवीयसो नर्मदातटवर्त्तिनो नादनेर-नाम्नो ग्रामस्य वासिनः श्रीमतो नर्मदाप्रसादद्विवेदिनः सूनुरयं काशीहिन्दूविश्वविद्यालयात् १९५६-ख्रीष्टाब्दे साहित्यशास्त्राचार्यकक्षायाम् १९५९-ख्रीष्टाब्दे च संस्कृतविषयस्यैव 'एम. ए.'-कक्षायां सर्वप्राथम्येनोत्तीर्णः १९५९-ख्रीष्टाब्द एव रायपुरसंस्कृतमहाविद्यालये मध्यप्रदेशशासनेन साहित्यशास्त्रव्याख्यातृत्वेन नियुक्तः, १९६५-ख्रीष्टाब्दे रविशंकरविश्वविद्यालयात् संस्कृतविषय एव पी-एच. डी. पदवीमपि लब्धवान्। सांप्रतं तस्मिन्नेव महाविद्यालये साहित्यशास्त्रायैव सहायकप्राध्यापकपदमलंकुरुते।

साहित्यशास्त्रे प्रामाणिकेनानेन महिमभट्टस्य "व्यक्तिविवेके" हिन्दीभाष्यमारचितम्, यदर्थमसौ मध्यप्रदेशशासनेन मित्रनाम्ना पुरस्कारेण संमानितोपि। अलंकारसर्वस्व-रसगंगाधर-प्रभृतिष्वस्य महान् परिश्रमः। काव्ये कालिदास-साहित्यमस्य नितान्तं प्रियम्, तत्रानेन १९५८ ख्रीष्टाब्द एव "कालिदास-शब्दानुक्रम"-नामा शब्दसन्दर्भकोषोपि रचितः। अनेके शोधाश्च तत्रास्य विद्वन्मान्यतया प्रथिताः। सीताचरितस्य १०।८१-पद्ये तथ्यमिदमसौ कण्ठर-वेणैवोररीकरोति "शिष्यः कश्चित् कविकुलगुरोः" इति। तत्र संकेते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविकुलगुरुपदस्य व्याख्यायां लिखति "कविकुलगुरोः कालिदासस्य"-ति । अत्र शोधकर्त्तारः प्रमिण्वन्तु यत् काव्यमिदं कालिदासस्य काव्यकलां कियदनुहरति ।

भारतस्य राष्ट्रिया प्रज्ञा संस्कृतमाध्यमेनापि सांप्रतमपि कियता साफल्येन प्रकटीभवितुं क्षमेति सीताचरितेन ज्ञातुं शक्यते । शास्त्रचुञ्चवः पण्डिता लोकमपि कियदनुशीलयितुं नदीष्णा इति महाकाव्येनानेन वेदितुं शक्यते । एतद्धि प्रमाणं यदस्माकं प्राणभाषा संस्कृतमद्यापि निपुणामभिव्यंजनक्षमां बिभर्त्ति । इयमत्रास्माकं प्रार्थना यदन्येऽपि संस्कृतवेधसः स्वकीयानि कृतिरत्नानि निर्विचिकित्समत्र प्रकाशयितुं प्रेषयेयुः ।

विवशता —

इतः प्रभृति सागरिकाया मूल्ये वृद्धिः क्रियते । समयस्येयं प्रधर्षणा यदत्रापि मूल्यवृद्धिमनिरुद्धप्रसरा । अथापि तावदेव मूल्यमस्माभिर्निर्धार्यते यावतोऽल्पं सागरिकासमितावर्थसंकटं घटयेत् । मन्ये संस्कृतानुरागिणो विवशतामिमामवश्यमेवानुभवेयुः ।

अंकस्यास्य मुद्रणं सीताचरितकर्तुः श्रीमतो रेवाप्रसादद्विवेदिन एव निरीक्षणे रायपुर एव जातम् । एतदर्थं श्रीद्विवेदिनः समितेरस्याः शतशः साधुवादार्हाः । अत्यन्तं कृतश्रमाणामपि तेषां दृष्टिजालात् केचन क्षुद्रा अशुद्धिमत्स्याः प्रभ्रष्टाः । तदर्थमत्र, यद्यपि, शुद्धिपत्रं दीयते तथापि ततोऽधिकाय स्वयं पाठका एवानुरुध्यन्ते ।

अन्ते केवलमिदमाशास्यते यद् संस्कृतसमाजः "सीताचरितम्" अभिनन्देत्, सागरिकां चैवमेवोत्तरोत्तरमधिकाधिकं प्रोत्साहयेत् ।

अक्षय्यतृतीया — २०२५
सागरम्

— उपाध्यायः श्रीरामः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुखबन्धः

पितुर्नियोगाद् वसुधां सुधामयीं विहाय यो यौवनलाभनिस्पृहः ।
अतन्द्रितो धर्मणि काननं ययौ स शास्तु सत्कर्मणि मानवं द्विजः ।।

अथेदमुपच्छन्दयामहे सीताचरितं नाम सस्वोपज्ञसंकेतं महाकाव्यम् । इदं हि सीतामातुरुत्तरं चरितमुपढौकते । अत्र सीता करुणैकपात्रं नास्ति । तपोमहिष्ठानां महामुनीनां शोणितादर्जितौजो-ज्योतिः[1], सर्वंसहाया भगवत्याः पृथिव्या अधिगतवपूरत्ना[2], महा-योगिनो विदेहादासादितविनययोगा[3], बुद्धिप्रधाने विवस्वदन्ववाये[4], च वधूभावेन चतुर्दश–वत्सर–स्वेच्छा-वाप्त-वनवास-परीक्षित-पतिव्रत-रुक्ममुद्रा सा नितान्तमेवोदात्तचेताः । शैशवादेव परिशुद्धनाडिकाचक्रो-द्वासितासुस्थभावतया[5] याथार्थ्येन स्वस्मिन् स्वायत्त-स्वामिभावा[6] सा प्रथमप्रसवावसरादपि नागजातिरिव किं नु भीषितान्तरा जायते । एवं चाविषय एवेयं करुणामात्रपात्रतावधीरणायाः ।

इहेयं पट्टमहिषीत्वेन भगवतो रामस्य राजसिंहासनमधिश्र-याणापि[7], कौलीनज्वलनाद्[8], रामस्य कीर्तिपताकामवितुं[9], स्वत एव स्वकीयमेव वनवासं प्रस्तवीति[10], भरत–कौसल्यादीनां रामबन्धूना-मध्यक्षमेव च लक्ष्मणैरितरथा[11], स्वभागिनीर्गृहमेधितायामेव विनि-योज्य[12], षाट्कौशिक–काय–सहायैव वनमेति । तत्रैव भागीरथी-परिसरे वनौकोभिरुसेव्यमानेयमक्लेशेनैव प्रसूत-सुत-मिथुना रामायण–

सीताचरिते १–३।४६, २–७।८, ३–५।१२, ४–९।४१, ५–६।४४, ४५, ६–६।४५, ७–१।६८, ८–द्वितीयः सर्गः, ९–३।९, १०–३।९, ११–३।६०, १२–४।६८, ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविना कृतानुरोधा[१३], तदीयमाश्रमपदमाश्रयति। तत्र पालितपुत्रा[१४], तस्मा एव सुकवये, प्रतिभेव शब्दार्थौ[१५], पुत्रौ प्रतिपादयति । विनीत-पुत्रा कृतात्मलाभा च तेनैव महाकविनायोजितायां रामजनकादिसभाजितायामाश्वमेधिक–सैन्य–जनसंसदि[१६], साकेताय ससैन्येन लक्ष्मणौरसेन चन्द्रकेतुनातितरामनुरुध्यमानापि[१७] जीवनस्य कृत्यशेषमनुपलक्ष्य[१८] युक्तयोगीवापुनरुत्थानं समाधिबन्धमाबध्नाति[१९] । ततश्चागतासुतयानपेक्षिताग्निसंस्कारा व्युत्थानशून्यतया चानवशिष्टलोकयात्रा सा समुदाचारमनुपालयद्भिस्तैरेव महामुनीन्द्रैः सप्रणामं भूगर्भसमाधिमारोप्यते[२०] । अयमेवास्याः सुप्रतीतः पृथिवीप्रवेशः । एतावन्मात्रमत्र वस्तु । एतच्चात्र व्यवसिततमतायाः युगे समासमेव साधुमनुवीक्ष्य–

१– राष्ट्रपतिनिर्वाचनम् २– जानकीकौलीनम्
३– जानकीपरित्यागः ४– साकेतपरित्यागः
५– कुमारप्रसवः ६– जानकीमुनिवृत्तिः
७– विद्याधिगमः ८– कुमारायोधनम्
९– मातृप्रत्यभिज्ञानम् १०– समाधिमांगल्यं चेति

नामभिर्दशभिरेवानतिविस्तरैः ६९४–संख्याकश्लोकशुभैः सर्गैरद्वैतपर्यवसायितयोपनिबद्धम् । अस्ति च मंगलान्तमिदम्, प्रधानपात्रस्य ब्रह्मानन्दामृतोदन्वन्निमग्नत्वात्, अप्रधानेषु च विद्यमानाया करुणाया व्यपदेशाप्रयोजकत्वात् ।

अस्य लघीयसोपि वस्तुनः परिबृंहणमपि न नात्र सारभूतम् । तत्र हि लब्धजीविता सांप्रतिकी स्वाराज्यनीतिः[२१], अधिगतोत्तराः प्राचीना यज्ञविद्यादिपारिपार्श्विकाः प्रश्नाः[२२], दर्शितनूतनार्थश्च नरमेधः[२३], शिष्टता[२४], कवित्वम्[२५], भारतीयता[२६], जीवनमुक्तिः[२७],

---

१३–५।७०, १४–षष्ठः सर्गः, १५–७।४१, ८।१, १६–नवमः सर्गः, १७–१०।५८,५९, १८–१०।६५, १९–१०।६६, २०–१०।७७, २१–४।४१,२२-८।१५, ९।२०, २३–६।१५, २४–६।३२, २५–५।३१, २६–३।६,२७–६।१३, ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुशलता[28], जृम्भकोदयः[29], वाल्मीकित्वम्[30], दाम्पत्यम्[31], प्रेमतत्त्वम्[32], कविभूमिः[33] एवमादयो विषयाः । अत्र हि प्रमाणीकृतं प्रमाणत्रयम्[34], प्रसाधितं पुरुषार्थचतुष्टयम्[35], श्रद्धितं श्रुतिप्रामाण्यम्[36], प्रत्यायिता वर्णाश्रमव्यवस्था[37], समन्वितं ज्ञान-कर्म–भक्ति–योगत्रयम्[38], निश्रेणीकृतं वेदान्त[39]– सांख्य[40] शैव[41] प्रभृति दर्शनजातम्, प्रवीजायितं च स्वायत्तता[42] महत्करुणा[43] विश्व शान्ति[44] सामरस्य[45] महामांगल्या[46] दिकं तत्त्वव्रातम् । "भौतिको रावणो लंकायां हतः, आध्यात्मिकस्तु प्रथमकवेराश्रम" एवेति[47], निपुणता, कैकेयी हि पौलस्त्यवधनाम्नि नाटके सूत्रभृत्तया राजनयिकेषु शिरोमणिरिति[48] चातुरी, कौसल्यामातुः कूटनीतिरेव सीतापरित्याग-तन्त्रमिति[49] कूटकल्पः, इतराश्चैवंविधा विचारक्रान्तयोऽत्र लम्भित-प्रसराः, कामगवी–चिन्तामणि–कल्पवृक्ष-प्रमुखाः[50] प्रतीकाः, त्रिपुरा-–भुवनेश्वरी–पीताम्बराद्या[51] महाविद्याः, बिम्बप्रतिबिम्बभाव[52] प्रकाश्यप्रकाशकभाव[53] प्रत्यभिज्ञान[54] काव्यात्म[55] काव्यपुरुष[56] कैवल्य[57] रसलय[58] प्रभृतयश्च संप्रदायागताः परिभाषा अत्र व्योम्नि तारा इव प्रकाममुपसंदानिता स्वारसिकतया । गंगा[59], यमुना[60] सिन्धु[61] लौहित्य[62] वंक्षु[63] प्रमुखानि स्रोतांसि, सिंहल[64] प्रभृतीनि द्वीपानि, हिन्दमहासागर[65] प्रभृतिभिर्नामभिर्व्यपदेश्यमाना महोदधयः[66], हिमाचलादयो[67] गिरयः, त्रिविष्टप[68] नेपाल–भोट[69] प्रमुखाः प्रदेशाश्चात्र भावव्यंजनाया उपकरणायन्ते ।

२८–६।२०, २९–८।३३, ३०–५।३२, ३१–३।४९, ३२–३।१९, ३३–६।२१, ३४–२।३०, ९।१०, ३५–२।७, ३६–९।१०, ३७–८।५, ५०, ६०, ३८–१०।४६, ३९–८।५७, १०।५५, ६९, ४०–२।४३, ४१–६।१४, ४२–१०।२२, ४३–१०।४४, ४४–१०।४६, ४५–१०।४६, ४६–१०।७५, ४७–९।५९, ४८–१।३५, ४९–१०।५४, ५०–७।१४, १५, ५१–९।५६, ५२–८।५७, ५३–८।६२, ५४–८।५८, ५५–८।६४, ५६–८।५८, ५७–८।५७, ५८–१०।७१, ५९–५।६२, ६०–५।४६, ६१–१०।२६, ६२–१०।२६, ६३–९।६१, ६४–१।३, ६५–१० १।३१, ६६–१।३, ९।२०, ६७–१।२, ९।६१, ६८–९।६१, ६९–९।६३, ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारभूतमपि वस्तुपरिबृंहणमत्र रुचिरतासौभगं नातिवर्त्तते । तथाह्यत्र मधुसमय-सूर्यचन्द्रोदयास्तमन-तपोवनप्रभृतीनि वर्णनोपकरणानि सप्रवाहं सोक्तिवैचित्र्यं च तथा चित्रितानि यथा तानि स्वभावं नातिक्रामन्ति । कारुण्य[७०] वात्सल्य[७१] शौर्य[७२] प्रभृतयो भावा:, शान्तिप्रभृतय: स्वभावाश्च रसविच्छित्तिमुल्लासयन्ति । मार्गानुगुण्यसुभगो माधुर्यादिगुणप्रवाहोप्यत्र सौभाग्यमाभिजात्यं च न नानुरुणद्धि । अलंकारेष्वपि प्रत्यग्राणि सादृश्यानि[७३], नवीना आरोपा[७४] अभिनवानि चार्थान्तराणि[७५] काव्येऽस्मिन् कविकर्मणोऽपर्युषितत्वं प्रस्नुवन्ति । अन्ये चापि रूपको[७६]त्प्रेक्षा[७७]तिशयोक्ति[७८]दीपक[७९]व्यतिरेक[८०]प्रतिवस्तूपमा[८१]दृष्टान्ता[८२]पह्नुति[८३]निदर्शना[८४]विषम[८५] पर्यायोक्त[८६]यमक[८७]प्रभृतयोऽलंकारा अत्र काव्यश्रियमुत्सेधयितुमहमहमिकां बिभ्रति उपमाश्चानेकविधा:[८८] । तत्रापि साम्ययोजनायामेकदेशमात्राभिनिवेशकलंकोऽत्र निर्विषय: । निर्वाहोप्येषामत्र यौवने विलासादीनां, वनस्पतौ प्रवालादीनामिव वाऽपृथक्यत्ननिर्वर्तित एव । प्रतीयमानार्थपरामर्शोप्यत्र प्रसूने परिमल इव सर्वत्र प्राणप्रद: । अस्ति च सर्वत्राप्यौचित्यमनुपहतप्राकाम्यम् ।

७०-३।२२-२७, ७१-१०।३३-३८, ७२-८।४२, ७३-१।२, ३, २।४४, ३।५७, ६१, ८।१, १२, ९, १२, १७, ४५, ५६, १०।३, ४, ८, २७, ७४-३।६३, १०।२९, ७५-१।२४, २।३७, ३९, ४७, ५९, ४।२१, ३१, ४३, ६९, ७०, ५।१३, ६७, ७०, ६।५९, ६०, ७।५७, ५९, ६०, ८।३५, ६७, ७०, ९।१०, १३, १४, ३०, ३६, ३७, ५७, ६२, ६३, ६५, १०।२१, २४, ५६, ५९, ७१, ७६, ७७, ७६-१।१९, २२, २३, २७, २९, ३५, ३९, ५१-५५, ६८, २।९, २१, ५४ ३।१, १८, ६३, ७७-१।१५, ३७, ४०, ४२, ४५, ४८, ६२, ६८; २।९, २० २२, ६०, ३।५५, ७।५४, ७८-२।३४, ३५, ५२, ३।६२, ४।४, १४, १७, १०।२५, ७९-२।३, ११, ८०-२।१२, ८१-२।२६, ५१, ८२-२।५७, ३।६४, ८३-७।५२, ८४-६।३९, ७।५०, ९।१८, १०।३१, ३२, ८५-४।४५, ८६-१।१, १०।३८, ८७-१०।६०-६४, ८८-१।४, ५, ८, ९, २१, २६, २८, ३१, ३६, ४०, ४१, ४३, ४४, ४६, ५७, ५९, २।२, ८, १९, २१, ३६-३८, ४०-४२, ४९, ५०, ५३, ५६, ३।१, १९, ५४, ४।७२, ५।२-५, ७।४२-५४, ६१, ८।२, ६, ७, १०, ११, १४, ३७, ७१, ९।२, ३, ८, १८, ३९, ५०-५३, १०।३-५,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वबन्धुत्वविधृता राष्ट्रीयता हि काव्यमन्दिरेऽत्र देवता । एतदर्थं -- १-२, ३, २०-२२, ४२, २।२४, ४-२८, ५३, ५-६६ ७०, ६-४२, ५४-५६, ६२-६७, ७०, ७-८, १३, २३, ६०, ६३ ८-१३, २४, ६७, ९-२, ६, ६०-६२, १०-६, २०-२२, २४,२६, ३१, ३३-३६ एतानि स्थलानि संस्कृतकाव्यसाहित्ये नितान्तमेव निष्प्रतिमानि । एष्वपि १-२, ३, २२, ६-३३, ३४, ४६, ५५, ७-१३, १०-२१,२४, एतानि स्थलानि चक्षुरुन्मीलनप्रवेकाणि, शाश्वत-संदेशभूतानि, भारतीयराजनयगायत्रीभूतानि च निष्प्रयासमूरी-क्रिरेन् । प्रतिक्रियापराङ्मुखता[89], समाजसेवाव्रतम्[90], स्वायत्तता[91], बालसमस्या[92], कृषीसपर्या[93], कुलपतिप्रकृतिः[94], छात्रानुशासनम्[95], शिक्षानीतिः[96], नारीजागरणम्[97], एवमादयो विषया अत्र गोपयसि शर्करात्वमादधते । सीता-भरत-लक्ष्मणान् प्रति कौसल्यामातुः[98], कैकेयीं प्रति श्रीरामस्य[99], रामादीन् प्रति सीतायाः[100], सीतां प्रत्यूर्मिलायाः[101], सीतां प्रत्येव वल्मीकेः[102], सभासदः प्रति च तस्यैव महाकवेः[103], नागरान् वाल्मीकिं च प्रति महामुनेर्वशिष्ठस्य[104] च भाषणानि तथा प्राणवन्ति यथैतानि बोद्धव्यात्मनि चेतनामादधति सन्ति च तान्यनिर्गलानि तर्कशुद्धानि च ।

आश्रमभुवो वर्णनम्[105] सीतायाः पुनर्दर्शनस्य चित्रोपममालेखनम्[106], सन्ध्यानिशामुखयोः प्राकरणिकानामेव भावनां परस्परमौपम्यसन्निवेशादन्तश्चुम्बि सौभाग्यसंदर्भणम्[107] एवमादीनि कलाशिल्पानि प्राचीनमपि प्रतीताभिजात्यं संस्कृतसाहित्यं न विजातीययन्ति न च स्वत्वमेव तत्र विहापयन्ति ॥

८९-६।६७-६९, ९०-६।३१, ९१-६।३८, १०।२२, ९२-६।४९, ५४ ५८, ९३-२।४४, १०।८, ९४-८।१२, ९५-८।११, १०।६, ९६-७।७-४० १०।१०, ९७-४।५७, ९८-१।१६-२३, ९९-१।३४, ३५, १००-तृतीये सर्गे १०१-चतुर्थे सर्गे, १०२-७।७-४०, १०३-९।२०-२९, १०४-१।४९-५८ ९।३३-३५, १०५-६।११, २२, १०६-९।४७-५४, १०७-७।४२, ५४, ५६,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीता हि भारतस्यास्य राष्ट्रदेवी[१०८]। तामाश्रित्य कृतं काव्यं भारतीयेभ्यो नूनमेव नासामयिकम्। देवीयं भारतमहीरूपाया मातुरेङ्के निलीयते, ततश्च तेनैव देहबन्धेन सर्वदैव भारमस्या अपनेतुमुद्यते[१०९]। शस्त्रभूता सा शस्त्रिणम् शक्तिभूता शक्तिमन्तम्, ज्वालाभूता ज्वलनं च श्रीरामं सनातनाद् विवस्वन्मण्डलात् तथैवाहरति यथा गायत्री द्युलोकात् पर्णम्। सोयमिलाविवस्वदात्मजन्मनोर्लीलाभागः सार्वजनीनतामजहद्, आत्मसंपदमनिराकुर्वन् तपोभूमिकामधितिष्ठंश्च चराचरमिदमहर्निशमेव वैज्ञानिकेनैवाध्वनोद्दिधीर्षति। इममेव नित्यप्रवृत्तं सोमाग्निसवनमुपास्य लोकलीलामुल्लिलासयिषन्तोऽत्र धन्याः। सर्वमंगलं चरितमिदं लीलाशुका इवाभिष्टूयार्जिताक्षय्यपुण्या इह महात्मानः सांप्रतमपि भारतीयानां कनिष्ठिकामधितिष्ठन्ते। नूनं नित्यप्रत्यग्रमेव मातुरस्या मंगलं चरितम्।

सर्वथा, अत्र विचारा राष्ट्रियाः, भूमिका सामाजिकी चरित्रं धार्मिकम् प्रवृत्तिर्दार्शनिकी, व्यक्तिः कवित्वमयी, कथानकं च प्रवाहपटु। तेनात्र देवताप्रस्तरौ पुरातनौ शिल्पप्रतिष्ठे तु नूतने। अत एवेयमस्माकमाशीः-

"ऋषिः सनातनश्छन्दो जगती, शक्तिरा ता।
दैवतं राष्ट्रमोजः सत्कीलं, बीजाक्षरं तपः॥
यत्र, तन्मन्त्रकाव्यं मे विनियोगमवाप्नुयात्।
सार्वभौमे सतां शान्तिनाम्नि पुण्ये महाक्रतौ॥

अस्ति चायमस्मदीयः प्रणयः–

न यशसे, न धनाय, शिवेतरक्षतिकृतेऽपि च नैव कृतिर्मम।
इयमिमां भरतावनिसंस्कृतिं सुरगवीं च निषेवितुमुद्गता॥
सहृदया हृदयस्य मतेश्चितेरपि च तां परमां भुवमाश्रिताः।
कृतिमिमां कलयेयुरिरम्मदं वृणुयुरम्बुधनाश्च घनाघनाः॥इति॥

॥ओं शम् ओं शिवम्॥

–सनातनो रेवाप्रसादः

१०८–१०१५४, १०९–१०१७८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीताचरितम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ श्रीः ॥

सनातनोपाख्य-श्रीमद्रेवाप्रसादद्विवेदिकृतौ

सीताचरिते

प्रथमः सर्गः

विभूष्य पौलस्त्यशिरोभिरैश्वरं वपुर्भुवं, तत्सुतया तथा निजम् ।
वनव्रतान्ते भगवान् रघूद्वहः सहानुजाभ्यां नगरं स्वमीयिवान् ॥१॥

संकेतः – रघूद्वहः श्रीरामः पौलस्त्यानां रावणप्रभृतीनां शिरोभिः कमलभूतैः ऐश्वरम् ईश्वरस्य तन्नाम्नो भगवतोष्टमूर्तेः शिवस्येदं वपुरेवान्यतमां मूर्तिमेव भुवं तथा तत्सुतया भूसुतया सीतया निजम् आत्मानम् आत्मनो वपुरेव वा विभूष्य वनव्रतान्ते चतुर्दशाब्दावधिकवनवासरूपव्रतपारणोत्तरम्, अनुजाभ्यां लक्ष्मणः, नन्दिग्रामे संगतो भरतश्चेति लघुभ्रातृभ्यां सह स्वं नगरम् अयोध्यापुरीम् ईयिवान् प्राप्तः । रावणं निहत्य सीतां चासाद्य वनावधिं समाप्य प्रत्यावृत्त इति यावत् । अन्योपि व्रतान्ते स्वेष्टदेवतां पुष्पादिभिः पूजयित्वा ततो लब्धया शेषया विभूषितवपुर्नद्यादिपरिसराद् बान्धवैः सह स्वं नगरं प्रत्यावर्त्तते । सोयमत्र पर्यायोक्त–रूपकसमासोक्तिभिर्वंशस्थेन वस्तुनिर्देशः ॥ १ ॥

स रामनामा भगवान् स मानवस्तथा च कश्चिद् भरतेतिनामभाक् ।
विनिर्ममाते मिलितौ, हिमाचलो महोदधिश्चापि यथाऽऽर्यभूमिकाम् ।२।

संकेतः – आर्यभूमिकापदे रामभरतपक्षे कर्मधारयः, तेनोच्चैस्तम–सच्चारित्र्यभूमिकातदर्थः, हिमाचलमहोदधिपक्षे च षष्ठीतत्पुरुषः, तेन भारतराष्ट्रस्य स्थलवेदिस्तदर्थः । समानानुपूर्वीकशब्दवाच्यत्वेन तादृशभूमिकाद्वयेऽभेदात् तन्निर्मातृत्वसामान्यात् पक्षद्वयौपम्यविश्रान्तिः । तत्र पूर्व–दक्षिण–पश्चिमासु दिक्षु विततमूर्तेर्महोदधेरेकात्मत्वमेव विवक्षितमिति न प्रकृताप्रकृतयोः संख्यावैषम्यम् । हिमगिरेः पूर्वापरसागरावगाढत्वं 'पूर्वापरौ तोयनिधी वगाह्ये–' । [कुमार० १।१] त्यादिमहाकविप्रयोगात् प्रतीतचरमेव ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स सीतया भ्रातृयुगेन तेन चान्वितः स्वपुर्यां शुशुभे गभीरहृत् ।
कुमारिकायामिव भारतोदधिः ससिंहलश्रीरुदधिद्वयाञ्चितः ॥३॥

संकेत :- कुमारिकायां कन्याकुमारीतिव्यपदिश्यमानयां भुवि भारताब्धिः सांप्रतं हिन्दमहासागरनाम्ना प्रख्यातो महोदधिः । उदधिद्वयपदेनात्र पूर्वापरसागरौ विवक्षितौ । दिग्विभागेन सागरभेदकल्पनयात्र साम्यविश्रान्तिः । गंभीरहृत्त्वं महोदधिष्वपि योज्यम् ॥ ३ ॥

तदुत्पल–श्याम–शुभं वनावधेः शुचेरिवान्ते वपुरक्षिभिः पिबन् ।
पयस्विमेघप्रभमाप चातकव्रतानि साकेतनिवासिनां व्रजः ॥ ४ ॥

संकेतः – चातकोपि शुचेर्निदाघस्यान्ते उत्पलश्यामं पयःपूर्णं मेघं पश्यति तृप्तिं च विन्दति ॥

तदोत्पलाक्ष्या नवनीतसोदरां विदेहपुत्र्यास्तनुवल्लरीं जनाः ।
रिपोर्महेभस्य करान्मृणालिनीं यथोद्धृतां वीक्ष्य मुदा निशश्वसुः ॥५॥

संकेतः – रिपो रावणस्य करात् हस्तपाशात् । महेभपक्षे करः शुण्डादण्डः ।

जनैः सुमित्रातनयेऽग्रजं प्रति प्रजावतीं चैव दृढव्रते ततः ।
उदीरितालोकपदैर्नभःस्पृशः स्वरादसामान्यकृतावभूयत ॥ ६ ॥

हरिद्दलालंकृत–तीर्थवारिभिः सधूपवासैर्यवदन्तुरैर्घटैः ।
शुभैस्तथान्तःकरणैः प्रजावतां पुरस्कृतास्ते भरतानुयायिनाम् ॥७॥

सपुष्पवर्षं वियतोऽप्सरोगणा जगुर्यथा तस्य महत्पराक्रमान् ।
तथा पुरो लाजकणप्रवर्षणैः समं प्रबुद्धा नवबालिका अपि ॥८॥

संकेतः – महत्सु रावणेन्द्रजित्प्रभृतिषु न तु क्षुद्रेषु पराक्रमान् ॥ ८ ॥

स दर्शनाकांक्षिभिरुत्कटं जनैर्निरुद्धवर्त्मा गृहमीयिवांस्तथा ।
यथा तरंगैरमृतांशुविग्रहस्तटप्रदेशं समुपैति वारिधेः ॥ ९ ॥

निरीक्ष्य पूज्यान् सचिवान् वियोगतः पितुर्निजस्यापि च तत्र धीरधीः ।
शुशोच मीनानिव वारिदात्ययात् सरोविशोषाच्च विवर्णितद्युतीन् ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदा शुचिं वर्णविभक्तिमीयुषा स्वरेण मैत्रावरुणेन बोधितः ।
निजां सुमित्रासहितां स मातरं ननाम सा चापि परात्परं प्रभुम् ॥११॥

उवाच माता सममाशिषां शतैर्ममैव मन्ये सुत भाग्यविप्लवात् ।
निदाघ-वर्षा-शिशिरेषु काननान्यगाहथाः पंकजपेशलोपि सन् ॥१२॥

क्व कौतुकेनाध्वनि पुष्पसंवृते पुरा दधाति स्वपदाम्बुजद्वयम् ।
क्व वा स वध्वालमलम्बुषाभयाऽनयाऽनुजेनापि च कण्टकैः क्षतः ॥१३॥

त्वमद्य वन्द्यो जगतां परिष्कृतैः शरीर-धी-चित्त-चिदां पराक्रमैः ।
तव प्रसूत्या मम चापि धन्यतां समं कुलेनैव रवेर्गतं जनुः ॥१४॥

स्नुषां स्वकीयामथ तां तनीयसीं व्रतेन पत्युर्नयनाम्बुभिर्द्रुता ।
उवाच माता ममता-दया-तट-द्वये वहन्तीव सुवत्सला स्रुतिः ॥१५॥

सुते! विधौ वामविधायिनि व्रतं सुताय मे स्निग्धमना न याऽत्यजः ।
कुलद्वयस्यापि सुरक्षितत्रपा त्वमेव वन्द्याऽसि शुभे! ममाधुना ॥१६॥

न राक्षसीं संस्कृतिमार्यसंस्कृतौ कृतस्थितिः कोपि भजेत सन्मतिः ।
वगाह्य गंगां न हि कर्मनाशिनीं वगाहितुं कोपि समीहते सुधीः ॥१७॥

त्वयापि पुत्रि प्रथितामिमां सृतिं विहातुमुत्प्रेरितयापि रक्षिता ।
चरित्रमुद्रा यदियं गरीयसी ततोसि रामादपि लक्ष्मणादपि ॥१८॥

त्वमेव भास्वत्कुल-कीर्ति-केतने वृषांकमुद्रासि नृलोकवन्दिता ।
त्वमेव रामायणनाम्नि मन्दिरे विभासि सर्वप्रमुखेव देवता ॥१९॥

त्वयोन्नतं दाशरथं शिरोऽद्य तत्, त्वया प्रकाशोऽन्वय एष भास्वतः ।
त्वयास्ति पूता ननु मानवी मही त्वया सगर्वं खलु राष्ट्रमस्ति नः ॥२०॥

संकेतः — भास्वतः सूर्यस्य यत् कुलं तस्य कीर्तिकेतने यशःपताकायाम् वृषांका धर्मप्रतीक—भूतस्य वृषस्यांको यस्यां सा मुद्रा । वृषस्य धर्मप्रतीकत्वादेव नृलोकवन्दितत्वम्, नृसमाजस्य धर्ममात्राश्रितत्वात् ॥ १९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथार्करोचिःप्रतिमश्चरित्रतस्तया बभाषे भरतः सलक्ष्मणः ।
मुदा च मातुर्हृदयेन चापि तत्कृतज्ञभावाच्च परिप्लुतात्मना ॥२१॥

इयं जटा चीरमिदं च वां सुतौ कुलस्य देशस्य च नः प्रतीकताम् ।
समर्पण–स्वार्थधियो रणस्थले गते युगेभ्योऽत्र वसुन्धरातले ॥२२॥

न रामभद्रो जनकात्मजापि वा तथाऽद्य महच्चं रुचिरे यथा युवाम् ।
ययोः परार्थे निजसौख्य–वर्जन–व्रतं समाजद्रुम–मूलमीक्ष्यते ॥२३॥

संकेतः – समर्पणं स्वार्थश्चेति यौ परस्परं विरुद्धौ भावौ तयोः ये धियौ तयो रणस्य स्थल एव वसुन्धरातल इति योजना ॥ २२ ॥ स्वसौख्यपरित्याग एव समाजरूपस्य वृक्षस्य मूलमिति भावः ॥ २३ ॥

निशम्य तां क्षत्रियशोणितोदितां गिरं विवेकस्थिरसंविदुद्गताम् ।
जहुर्महान्तं क्लममात्मनः सुताः सतां प्रसादः श्रमजोपि तोषदः ॥२४॥

संकेतः – क्षत्रियशोणितपदार्थेन कौसल्याध्यवसिता ॥२४॥

निजागमोल्लासितसेवकं ततः प्रपूरितं तोरण–वाद्य–गुंजितैः ।
शिखावलोद्वर्त्तित–मेचकं पितुः प्रियं किरीटादपि सद्म ते ययुः ॥२५॥

संकेतः – तोरणस्थानां वाद्यानां गुंजितैरिति भावः । पितृपदार्थस्य काकाक्षिगोलकन्यायेन किरीटं सद्म चेति द्वितयेनाप्यन्वयः ॥२५॥

गृहं, विना तातममुष्य मानसं न पिप्रिये हन्त सुतव्रजस्य तत् ।
तथा, यथा देवकुलं विदैवतं यथा च चैतन्यमृते कलेवरम् ॥२६॥

संकेतः – देवकुलं देवगृहम् विदैवतं देवप्रतिमारहितम् । पिप्रिये प्रीतिमत् चक्रुः, दैवादिकः प्रीत्यर्थकः प्रीङ् । ऋतेयोगे "अन्येभ्योपि दृश्यन्त" इति द्वितीया ॥

अमुत्र पूजाविधिमार्यजन्मनां ललाटपुण्ड्राय निजाग्रजात्मने ।
विधातुमीशाय नु नन्दिकेश्वरोऽनुजस्तृतीयो ददृशे प्रतीहृतौ ॥२७॥

संकेतः – आर्यजन्मानो भारतीया जनाः । त्रितयेप्यग्रजन्मानो राम–भरत-लक्ष्मणा मिलित्वा एकं शिवत्रिपुण्ड्रम् । तन्मध्ये कुंकुमश्रीश्च सीतेत्यर्थादायातम् । तृतीयोनुजः शत्रुघ्नः । प्रतीहृतिः प्रतीहारः । नन्दिनामा रुद्रोपि यथा भगवत ईशादभिन्नस्तदंशत्वात् तथैव शत्रुघ्नोपि श्रीरामादभिन्नस्तदंशावतारत्वात् ॥२७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वदातवासा व्यपनीतभूषणः समाल्यपाणिर्द्युतिमान् कनिष्ठकः ।
अदृश्यताग्रेजनुषां पुरः स्थितो यथा गुरूणां चरणे स्वधीतवान् ॥२८॥

संकेतः – कनिष्ठेषु कनिष्ठः कनिष्ठकः । चरणे कुले पदे च । स्वधीतवान् सुस्नातकः ॥२८॥

उरस्सु तेषां विससर्ज कौसुमीः स्रजः स, ते तस्य च बाष्पनिर्मिताम् ।
अमन्यतानेन जनो नृपालयं गतं तदा स्नेहसुधा–प्रयागताम् ॥२९॥

संकेतः – प्रयागौपम्येन भावौचित्यातिशयो व्यंजितः ॥२९॥

विधृत्य दोर्भ्यां परिरभ्य वक्षसा स्वबाल्यसेवारसिकांश्च ते जनान् ।
पितुर्वियोगात् तपसीव दीक्षितान् पुनः पुराणीं विदधुः श्रियं श्रितान्।३०।

संकेतः– सेवारसिकाः प्रेम्णा स्वसेवापरायणाः । पुराणीं प्राचीनां श्रियं शोभाम् ॥३०॥

स्थितां ततः सद्मनि तत्र मध्यमां सुवं ददशुर्जनकं विना सुताः ।
प्रभामिवास्तोदधिमज्जितात्मनो रवेर्निशीथे स्फुरितां विभावसौ ॥३१॥

संकेतः– मध्यमां सुवं कैकेयीम् । विभावसौ वह्नौ ॥३१॥

क्षतात् सतस्त्रायत इत्यतीव सद् यशो यतः क्षत्रपदाभिमानिनः ।
अपारयन् धातुमिमे सुवं तु तां सुवो निजाया अपि मेनिरेऽर्चिताम् ।३२।

संकेतः – 'क्षतात् त्रायत' इति कालिदासः, सतस्त्रायत इति तु सनातनः । अत एव कालिदासस्य क्षत्राणां यशो यशोमात्रम्, सनातनस्य क्षत्राणां पुनः सद् यशः । तुः व्यतिरेके ॥३२॥

इमां त्रपाया नतपूर्वविग्रहामुवाच रामो जननि प्रभावतः ।
तवैव यातः सुगतिं प्रजेश्वरः समं तलेनैव भुवो न संशयः ॥ ३३ ॥
विधातुमेतां जगतीमशल्यकां कृतं सशल्यं स्वमनो यतस्त्वया ।
त्वमेव मातर्ननु दूरदर्शिनां धुरि स्थिता राजनये सुमेधसाम् ॥ ३४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदस्ति पौलस्त्यवधेति नाटकं त्वमेव तत्र प्रणिधानवानृषिः ।
त्वमेव तत्रासि च सूत्रधारिणी वयं तु मका ननु तत्र पुत्तलाः ।। ३५ ।।

संकेतः – प्रजेश्वरो दशरथः ।। ३३ ।। ऋषिः नाटकोपनिषद्द्रष्टृभूता । सूत्रधारिणी पुत्तलाभिनयौपयिकं सूत्रं धरतीति ।। ३५ ।।

इतीव मूकां निर्यातं यथा प्रभुर्मनःस्थितिं दर्शितसत्फलां सुवः ।
निवेद्य तस्या भरतानुयायिनो जनस्य कृत्स्नस्य दृशं व्यशोधयत् ।।३६।।

संकेतः – भरतानुयायित्वं कैकेयीनिन्दकत्वे ।। ३६ ।।

विलक्षितोऽन्तर्विकृतेश्च लक्ष्मणः प्रणम्य मध्यां प्रसुवं निजाश्रुभिः ।
पदे तदीये द्रुतिमीयुषा हृदा यथैव सम्यक् स्नपयांबभूव सः ।। ३७ ।।

संकेतः – विलक्षितो लज्जितः । अन्तर्विकृतिः अन्यथाभावः । द्रुतिं द्रवताम् ईयुषा गतवता हृदा यथैवेत्युत्प्रेक्षा । अश्रूणामपह्नवश्चात्र गम्यः ।। ३७ ।।

परस्परं सम्मिलिता नृपात्मजा इमेन्तरंगेन च कर्मणापि च ।
चकासिरेऽर्था जनुषो यथा यथा प्रदीपधर्मा यदि वान्ववायिनः ।। ३८ ।।

संकेतः – जनुषो जन्मनः अर्थाः फलानि धर्मादयः । प्रदीपधर्माः प्रकाशकत्वादयः । अन्ववायिनः समवायभाजः, अपृथक्स्थिता इति यावत् । धर्मादिषु समवायः पुरुषप्रयत्नसाध्यः, अत एवौपाधिकः, प्रदीपधर्मेषु तु स स्वाभाविकः । अन्तरंग–कर्मभ्यामेष उपमानद्वयेपि योज्यः ।। ३८ ।।

चतुष्टयं तद् रघुवंश– कल्पद– द्रुमालवाले शुशुभे कृतात्मनाम् ।
चरित्र–पीयूष–पयोमुचां यथा त्रिलोकमांगल्यवपुः प्रवर्षणम् ।। ३९ ।।

संकेतः – रघुवंश एव कल्पानभिलाषान् ददतीति कल्पदा द्रुमाः कल्पवृक्षाः तेषाम् आलवाल आधारः तस्मिन् चरित्रमेव पीयूष तन्मयानां मेघानामेव तेषां कृतात्मनां राजपुत्राणां तच्चतुष्टयं त्रिलोकमांगल्यरूपं प्रवर्षणमिव शुशुभ इत्यन्वयः ।। ३९ ।।

वनीव पुंस्कोकिलकूजितेन सत्प्रियेव वीरप्रियसौभगेन वा ।
सचेतनेवोत्तरकोसलौकसां जयस्वनेनाजनि सा तदा पुरी ।। ४० ।।

संकेतः – सत्प्रिया अपुंश्चली भार्या । सौभगं प्रियवाल्लभ्यम् ।। ४० ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रक्लृप्तकेशा अपनीतवल्कला नरेन्द्रनेपथ्यसमेधितश्रियः ।
नृपात्मजास्ते प्रचकाशिरे यथा समग्रभूषा मधुकल्पपादपाः ॥४१॥

संकेतः – नरेन्द्रनेपथ्यं दुकूलालंकारादि तेन समेधिता श्रीः स्वकीया शोभा येषां ते । कल्पपादपा अपि दुकूलहारालंकारशोभिनो भवन्तीति महाकविषु प्रसिद्धमेव । कल्पवृक्षसामान्यमपि यदा मनोहरच्छवि तदा का वार्ता वसन्तपरिस्पद-शोभिनां तेषामिति भावः ॥ ४१ ॥

मनोरथानामिव पूर्त्तिरग्रिमा ततः प्रजाया यदि वार्यभूश्रियाः ।
गजाश्वरत्नैरथ वाद्यमंगलैः शुभा समायोजि पुरप्रदक्षिणा ॥४२॥

संकेतः–आर्यभुवो भारतस्य श्रियाः साम्राज्यलक्ष्म्याः ॥४२॥

ववर्ष यस्यां जनतामनःसखी प्रसूनवृष्टिर्मधुराग–निर्भरा ।
द्विरेफमालासचिवाऽक्षिसन्ततिस्तथा पिशंगद्युतिरश्रुमण्डिता ॥

संकेतः–जनतामनःसखी तत्सदृशा, सादृश्यं च मधुरागनिर्भरत्वेन । तच्च मनःपक्षे मधुरानुरागातिशयस्वरूपम्, प्रसूनपक्षे च मधु पुष्परसः, रागो रक्तिमा तत्प्रचुरत्वरूपम् । द्विरेफ–माला भ्रमरपंक्तिः, तत्सचिवा तत्सहकृता तत्समा च । साम्यं च पिशंगद्युतित्वेन । उपमेयमत्राक्षिसन्ततिः । अश्रु चात्र हर्षाश्रु । तेन चाक्षिसन्ततेः प्रसूनवृष्ट्यापि सह साम्यमवाप्तपर्याप्तप्रसरम् । तदा च द्विरेफमालासाचिव्यं तत्सहितत्वरूपमेव । पिशंगता च प्रसूनेषु न न प्रसिद्धा ॥४३॥

सदश्वभाण्डैरिभवर्णकम्बलै रथांग–जाम्बूनदनादिनूपुरैः ।
पदातिवीरांशुक–हीरकांशुभिर्वधूरिवेयाय सरित्तटं च सा ॥४४॥

संकेतः – सन्तश्च तेश्वाश्च, तेषां सन्ति चेमानि भण्डानि तैः, इभानां गजानां वर्णकम्बलैः विविधवर्णैः कम्बलैः कुथभूतैः, रथाङ्गेषु चक्रेषु जाम्बूनदस्य हेम्नो नादीनि गीतिमन्ति नूपुराणि तैः, पदातयो ये वीराः, तेषां यान्यंशुकानि तेषां यानि हीरकाणि तेषामंशुभिः किरणैः वधूरिव प्रतीयायेति शेषः, सा प्रदक्षिणा तत्कर्तृभूता जनतेति यावत्, सरितः सरय्वास्तटमियाय प्राप ॥४४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदोर्गृहीतोदकयोस्ततस्तदा निजाग्रजस्योत्तमपूरुषस्य, ते ।
प्यधाषितां भरतेन पादुके कृते पृथिव्या अधिदेवतेव ये ।।४५।।

संकेतः— अग्रजस्य पदोः पदयोस्ते पादुके प्यधाषितां ये द्वे मेलयित्वा पृथिव्या एका अधिदेवता अधिष्ठात्री देवतेव कृत इत्यन्वयः ।।४५।।

नृपात्मजानामनुभूय तादृशं विकश्मलं प्रेम पुरौकसस्तदा ।
बभूवुरत्यन्त–विकासितेक्षणा विकोशिताब्जाः कमलाकरा यथा ।।४६।।

संकेतः – नृपात्मजेषु प्रेम्णः प्रायिकत्वात् पुरवासिनां तथा स्थितिः ।।४६।।

अवेक्ष्य तां प्रीतिमयीं पुरौकसां प्रवृत्तिमाह्लादितमानसो गुरुः ।
ऋचां विधानादपि यं न लब्धवानलब्ध तं तोषरसं स्थितेः स्थितेः ।।४७।।

संकेतः— स्थितेः मर्यादायाः स्थितेः सत्त्वात् । मर्यादा धारणा स्थिति –रित्यमरः । राज–प्रजयोः सौमनस्यमेव सौराज्यमिति विचार्येति भावः ।।४७।।

सभां समावर्जित–कर्ण–शष्कुलीं विधाय सौम्येन ततः स्वरेण ताम् ।
स पूर्णकामो भगवान् प्रवर्षयन्निवामृतेनोपदिदेश साम्प्रतम् ।।४८।।

संकेतः – पूर्णकामत्वेनोपदेशस्य परार्थैकवृत्तित्व प्रतीयते । साम्प्रतं तत्कालोचितं धर्मम् ।।४८।।

"शुभा घटीयं शुभ एष वासरो फलान्वितं कृच्छ्रतमं च नस्तपः ।
यदार्यधर्मे नितरां शुभाशया स्थितिः समेषां भवतां विभाव्यते ।।४९।।
मनुष्यजातिं पुरुषार्थसाधनैर्विधातुमेतां परिपूर्णकामनाम् ।
व्यवस्थितिर्यास्ति कृता महात्मभिर्व्यपेक्ष्यते तामवितुं दृढः क्रमः ।।५०।।
नयस्तदर्थं किल दान–सामनी सभेद–दण्डे समुपास्य योज्यते ।
पदेषु तेष्वेव हि सृष्टिरूपिणी प्रवृत्तिशीला सुरभिः प्रवर्त्तते ।।५१।।
नयांकुशेनैव, समाज–संस्कृतिः प्रतिक्षणं ध्वंसयमस्य दंष्ट्रिकाम्– ।
विविक्षुरेषा, विनिवार्यते यतो विभर्त्ति सत्तामधुनापि शोभनाम् ।।५२।।
नयः स दीपस्तमसि स्थिताञ्जनान् प्रकाशमार्गे परिचालयेत यः ।
तृतीयमुद्भासिततथ्यमान्तरं स एव नेत्रं सततं प्रबोधभाक् ।।५३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स दुर्बलानां प्रबलं बलं स वै बलीयसां किं च महागजौजसाम् ।
मदप्रहाणाय महामृगेन्द्रति प्रशासको येन स एव निर्भयः ।।५४।।
विकासमार्गः स निसर्गजन्मनां गुणावलीनां नृषु भासितात्मनाम् ।
स एव मृत्युञ्जयभूमिकां प्रति प्रधानसोपानपथः सदोज्ज्वलः ।।५५।।
स वीतरागैः परिपूर्णदर्शनैर्महामुनीन्द्रैरुपजीव्य तत्स्मृतिः ।
भुवस्तले प्राणितुमेषणाभृतां कृते कृतः शाश्वतिकः सनातनः ।।५६।।
ऋते नियन्तारमसौ न तत्त्वतोऽध्वरो यथाचार्यमृते प्रतिष्ठते ।
समित् तु तस्यैव कृते-भिकांक्ष्यते हविष्प्रदानामिव मन्त्रिणां बुधैः ।।५७।।
अतोत्र दृष्ट्वा भरतेन पादुके समर्पिते स्वाग्रजनैः पदाब्जयोः ।
गता कथंचिच्छरदां चतुर्दशी यदिष्यते संप्रति तद् विमृश्यताम् ।।५८।।

संकेतः – शुभाशया शुभहृदयभावा ।। ४९ ।। पुरुषार्थानां साधनैः सिद्धिभिः ।। ५० ।। दान–साम्नोः साम्नः प्रथमतया प्रसिद्धत्वेपि अर्थरूपस्य दानस्य बलवत्तरत्वात्, सामफलत्वाच्च तस्यैवात्राभ्यर्हितत्वम्, ततश्च प्रथमोपादेयत्वम् । तेष्वेव दानादिष्वेव चतुःसंख्याकेषु पदेषु सृष्टिरूपिणी संसृतिमयी, प्रवृत्तिशीला, निवृत्तिपराङ्मुखी सुरभिः धेनुः न तु कामगवी प्रवर्त्तते ।। ५१ ।। दंष्ट्रिकां विविक्षुः नयांकुशेनैव विनिवार्यत इत्यन्वयः । प्रवाहवाच्यत्वाद् नात्र विरुद्धमतिकृत्त्वम् ।। ५२ ।। तथ्यं सत्यम् । सातत्येन प्रबोधभाक्त्वे नेत्रान्तरव्यतिरेकः फलम् ।। ५३ ।। निर्भयत्वमेव प्रशासकस्य प्राणप्रदो धर्मः ।।५४।। निसर्गजन्मनां सहजानाम् । भासित आत्मा याभिस्तासाम् । सदोज्जवलत्वेन तमः– स्पर्शस्यैकान्तनष्टत्वमागतम् ।। ५५ ।। वीतरागत्वेन विप्रलिप्सानिवृत्तिः, परिपूर्णदर्शनत्वेन भ्रमपरिहारः । तेषां ताश्च स्मृतीः उपजीव्य न तु स्वैरतया । सः नयः । शाश्वतिको नित्यः अत एव सनातनः सनातनाख्यः ।। ५६ ।। समित् मन्त्रिणां समितिः ।। ५७ ।। संप्रतिचतुर्दशवार्षिक–दुर्दिनावसाने ।। ५८ ।।

उदीर्य तर्कैविशदां सरस्वतीं सभामिमां धातृसुतः सुमेधसाम् ।
उपाविशत् सूनृतवाग्, बृहस्पतिर्यथा सुधर्मां त्रिदिवे दिवौकससाम् ।।५९।।

संकेतः – धातृसुतो वसिष्ठः । सुधर्मा देवसभा ।। ५९ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततश्च रामं प्रति तैः सभाजनैरघोषि तारं सह राजसूनुभिः ।
कुलागते राजपदेभिषेच्यतां त्रिलोकशोकापनुदेष राघवः ॥६०॥

संकेतः – राजसूनुभिः सह सभाजनैरिति सर्वसंमतत्वम् । त्रिलोकशोकापनुत्त्वेन विनीतत्वम् ॥ ६० ॥

प्रतिस्वनैः किं च दिशां चतुष्टयी तदेव निर्व्याजशुभं जगौ वचः ।
तदेव हेमाम्बुजरेणुभिः समं दिवः प्रतीथाय भुवस्तलं वचः ॥६१॥

संकेतः – वचोद्विरुक्तावपि कथितपदत्वमत्र नोदेति वाक्यार्थस्य प्रवाहमयत्वात्, पौनःपुन्येन च तस्यैव समर्थनेनादरातिशयस्य च द्योतनात् ॥ ६१ ॥

स दीर्घिका–वीचि-परिप्लुताम्बुजव्रजे स्वनद्भिश्च मरालिनीसुतैः ।
वचोधिदेवीपरिवादिनीमिव प्रवादयद्भिः सदकारि सत्स्वरः ॥६२॥

संकेतः–दीर्घिकेत्यादिना मारुतस्य मन्दः संचार आक्षिप्तः । मरालिनीसुतैः हंसैः । वचोधिदेवी सरस्वती तस्याः परिवादिनी वीणा ताम् । सतां संश्चासौ स्वरश्चेति ॥६२॥

स्वनिष्कुटाभ्यन्तरचारिबर्हिणां विलासलास्यैः सह षड्जवादिनाम् ।
मिषाच्च तं ब्रह्मसरःसमुद्भवा–समीपभूमिः सममानयत् स्वरम् ॥६३॥

संकेतः – निष्कुटाः समीपस्था आरामाः । ब्रह्मसरो मानसं सरः तत्समुद्भवा सरयूः, तस्याः समीपस्था भूमिः ॥ ६३ ॥

दिवा हविर्धूममिषाच्च तत्क्षणं सितातपत्राणमकारि राघवे ।
बलाहकैः किं च शरत्समुद्गतैरवीजि वालव्यजनं सुधोज्ज्वलम् ॥६४॥

संकेतः – दिवा द्युलोकेन । सितातपत्राणं श्वेतं छत्रम् । वालव्यजनं चमराणि ॥६४॥

स्वपुष्कराग्रैः सुरवर्त्मपुष्करं प्रवादयन्तीव च दिग्गजावलिः ।
दिशां स्नुतं क्षीरमिवास्य तीर्थजं पयस्तदा वर्षयति स्म शेखरे ॥६५॥

संकेतः – स्वं दिग्गजावलिः तस्य यत् पुष्करं शुण्डादण्डः तदग्रैः, सुरवर्त्मैव व्योमैव पुष्करं वाद्यविशेषं प्रवादयन्तीव सती पयो वर्षयति स्म । "पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले, व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयो-"रित्यमरः। एतेनाभिषेकमंगलमभिव्यंजितम् ॥६५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति प्रकृत्यैव नृपाभिषेचनं स्वयं तदानीं समपादि राघवे ।
ऋचां तदुद्गीथशुभैर्विधानकैर्महर्षिभिः केवलमभ्यनीयत ।।६६।।

संकेतः – तत् नृपाभिषेचनम् उद्गीथशुभैः विधानकैः केवलमभ्यनीयत ।।६६।।

रघुपतिरिति कृत्यैरात्मनस्त्यागशुद्धै-
र्जनमनसि यथार्थं लब्धवानास्पदं यत् ।
अजनि स खलु सत्यस्तस्य राज्याभिषेको
य इह विधिभिरार्षैर्लौकिकं मंगलं तत् ।।६७।।

निमिकुलतपसां वा सत्फलं, पुण्यपाको
रविकुलजनुषां वा जानकीत्यार्यलक्ष्मीः ।
व्यरुचदवनिपालस्यार्धभद्रासनस्था
श्रितवपुरिव लोकस्योदयायौषसी श्रीः ।।६८।।

संकेतः – जानकीति जानकीनाम्नी आर्यलक्ष्मीः आर्यावर्त्तवासिनां राष्ट्रश्रीः। भद्रासनं सिंहासनम् ।।६८।।

नरवानरराक्षसास्तदेत्थं जनताया नृपतेश्च भावबन्धम् ।
अभिवीक्ष्य बभूवुरार्यधर्मेऽभ्यधिकं बुद्धिविशुद्धयोऽस्ततर्काः ।।६९।।

इति श्रीमत्सनातनोपाह्व–रेवाप्रसादद्विवेदिकृतौ "सीताचरित"नाम्नि
सर्गबन्धे राष्ट्रपतिनिर्वाचनं नाम
प्रथमः सर्गः ।। १ ।।

––★––

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयः सर्गः

'उपेत्य राज्यं विधिवत् प्रजाजनानुपप्लवेभ्यः परिरक्षयन् महान् ।
स रामनामा भगवान् निजानुजानमंस्त शक्तित्रयविग्रहानिव ।। १ ।।

संकेतः– उपप्लवा उपद्रवाः । परिरक्षयन् परिपालयन् । शक्तित्रयं प्रभावोत्साहमन्त्ररूपम् ।।१।।

नभोविकीर्णाः पयसां यथाणवः समानमानाः खलु बीजपुष्टये ।
रवेस्तथा सापि च सन्ततिः प्रजाभिवृद्धयेऽभूदपर्वाजितान्तरा ।। २ ।।

संकेतः– पयसां जलानामणवो बिन्दवः । रवेः सन्ततिः तद्वंशजाः । अन्तरं भेदः । नभो-जल-पृथवी–सूर्याणां शिवमूर्तित्वात् परार्थैकपरत्वमाक्षिप्यते । तदुक्तं कुमारसंभवकृता 'विदितं वो यथा काश्चिन्न मे स्वार्थाः प्रवृत्तयः । ननु मूर्तिभिरष्टाभिरित्थंभूतोस्मि सूचितः [सर्गः ६] । पृथिव्या बीजप्रकृतित्वमपि शाकुन्तलमंगले प्रथितमेव- 'यामाहुः सर्वबीजप्रकृतिरिति-'इति ।। २ ।।

स राघवो भूमिमधिज्यकार्मुको वृषा स वज्री च दिवं ररक्षतुः ।
परस्पर यज्ञहविर्भिरम्बुद–प्रवर्षणैश्चापि समेधितश्रियौ ।।३।।

संकेतः– यज्ञहविर्भिरिन्द्रो रामेण समेधितश्रीः, अम्बुदानां प्रकृष्टैतयँथाकालं जातैः वर्षणैरिन्द्रेण रामश्च समेधितश्रीः । अधिज्यकार्मुकत्वेन यज्ञविलोपाभावः वज्रपाणित्वेन मेघानां नियन्तृता । वेदेषु मेघानां वृत्रत्वेन निरूपणात् ।।३।।

सनातनं शाश्वतिकं समाश्रिता प्रकाशमिन्दोरिव शुक्लयामिनी ।
विपश्चितस्तस्य न हि प्रजा क्वचित् तमःप्रवृत्तिं भजते स्म सत्पथा ।।४।।

संकेतः– सनातनं तदाख्यं धर्मम् । धर्मो हि बुद्धिमाश्रित्य प्रतिष्ठते । बुद्धेश्च प्रतीकः सूर्यः । तेनात्र तदौपम्यमेवोचितम्, तथापि सूर्यस्य तीक्ष्णरश्मित्वेन धर्मेपि जनोद्वेजकत्वं मा प्रसांक्षीदिति तस्यैव भासा भासमानेन सौम्येनेन्दुनात्रौपम्यं घटितम् ।।४।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स धर्मनीत्या विशदेन चेतसा प्रजास्तथाऽतोषयदीश्वरोत्तमः ।
यथा यमेपि व्रजिता अभीततां यथा च कल्पेपि गता अयाचिताम् ।। ५ ।।

संकेतः– चेतोविशदत्वं प्रजातोषश्चेति द्वितयमपि धर्मनीतेः प्रयोजकतयात्र विवक्षितम् । ईश्वरेषु शक्तिमत्सु जनाधिपेषु उत्तमो-नन्यसदृशः । यमाभीतत्वेन पूर्णायुष्ट्वं कृतकृत्यत्वं च व्यक्तम्, कल्पे तदाख्ये कामनापूरणे देवतरौ । न याचत इत्ययाची तद्भावमयाचिताम्, एतेन प्रजायाः पूर्णकामत्वमाक्षिप्तम् । 'पंचैते देवतरवो मन्दारः पारिजातकः, सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनमि'- ति नामलिंगानुशासनकृता चतुर्थो देवतरुर्वृक्षोत्तरेण कल्पपदेनोच्यते तथापि तत्रैव देववृक्षान्तरनामवदस्यापि वृक्षपदाघटितस्यैव पदविशेषस्य वाचकत्वमभ्युपेयम् ।५।

तथा च सौराज्यसुखं भुवस्तले स भूमिपालः कृतवान्, यथा दिवः ।
अमर्त्यभावात् स्खलिता दिवौकसश्चकांक्षुरेतन्निजकर्मभूमिकाम् ।।६।।

संकेतः– एतत् भुवस्तलम् ।।६।।

चतुर्षु वर्णेषु तथाश्रमेषु स स्थितिं व्यधात् किं च तथाविधां प्रभुः ।
यथाऽस्य कृत्स्नापि वशंवदायितं बभार धर्मादिपुमर्थसंहतिः ।। ७ ।।
अथैकदार्यः कृतदोहदव्यथामुपासमानः स विदेहनन्दिनीम् ।
विमानशृंगाद् भगवाञ्छ्रियः पतिर्यथैक्षत ब्रह्मसरःसमुद्भवाम् ।। ८ ।।

संकेतः – अथ सौराज्यसंपादनानन्तरम् । विमानं साप्तभौमिकं भवनम् । भगवतो विष्णोः श्रियः पतित्वेनोल्लेखात् श्रिया अपि सान्निध्यमागूरितम् । ब्रह्मसरःसमुदभवा सरयूः ।। ८ ।।

तदैव पौरेषु विसर्जितश्चरो विषेण दिग्धो यदिवाऽपरः शरः ।
उपेयिवांस्तं रघुवंशकेतनं महाविनाशाय नु धूमकेतनः ।। ९ ।।
स तं प्रणम्य प्रथमं प्रजेश्वरं जयेति चोक्त्वा समतर्पयत् ततः ।
अनुज्ञया तस्य विशुद्धवर्णया गिरा स्वचेतो व्यवृणोदिति ब्रुवन् ।।१०।।
प्रजाः प्रजानाथ पितेव पालयन् क्षितौ भवान् वा यदि शुद्धिभाजनम् ।
शुचिव्यपाये यदि वा बलाहको द्वयं हि लोकस्य विलोचनोत्सवः ।।११।।

संकेतः – भाजनपदस्याविशेष्यनिघ्नत्वात् क्लीबत्वम् । एवमेवोत्सवपदे ।।११।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरत्सु हंसा दिवसेषु भास्करः सुधांशुरह्नो विगमेषु दीव्यति ।
नृनाथ कालेष्वखिलेषु पावनं यशस्तु ते दीव्यति दीप्रमोजसा ।। १२ ।।

संकेतः – दीव्यति प्रकाशं विकिरति । दीप्रं दीप्तिमत् । राज्ञां यशसि प्रतापोन्मिश्रताया ऐकान्तिकत्वं राजनये प्रसिद्धमपि लोकानुभवसिद्धम् ।। १२ ।।

अनुक्षणं कांचिदचिन्तितां गतिं प्रयान्ति भूतानि, तथापि, हे प्रभो ।
धियः परिच्छित्तिमुदस्य तार्किकीमिमानि नैव प्रतियन्ति कुत्रचित् ।।१३।।

संकेतः – धियः तार्किकीं परिच्छित्तिमुदस्येत्यन्वयः । प्रतियन्ति विश्वसन्ति ।। १३ ।।

यदीश्वरो मानव,–मभ्रविस्तृतां मतिं मनश्चापि च सिन्धुनिर्भरम् ।
वितीर्य, कुर्यादविनश्वरं तनौ दुरत्ययेच्छां न तथापि स त्यजेत् ।।१४।।

संकेतः – ईश्वरो यदि अभ्रं व्योम तद्वद् विस्तृतां मतिं सिन्धुनिर्भरं समुद्रगभीरं च मनो वितीर्य प्रदाय मानवं तनौ शरीरे अविनश्वरं कुर्यादित्यन्वयः तस्य प्रवाहोच्चार्यत्वादविरुद्धमतिक्रुत्त्वम् ।। १५।।

इमां प्रभो वेदितुमीश्वरो हि कः प्रवृत्तिवल्लीं मनसो नृजन्मनः ।
तटं न यत्रास्ति न वास्ति लक्ष्यभूस्तथापि या हन्त नदीयतेतमाम् ।१५।

संकेतः – तट–लक्ष्यभुवोरभावेपि नदीतुल्याचरणं स्वैरताज्ञापकम् ।। १५ ।।

क्षितौ कियन्तो न बभूवुरीश्वरा विशश्वसुः क्वापि न हन्त मानवाः ।
दिलीपतुल्या अपि हन्त भूमिपा गतास्तिरश्चामपि यत् परीक्ष्यताम् ।१६।

संकेतः – रघुवंशद्वितीयसर्गाख्यानौपयिकमत्र दिलीपपरीक्षणम् ।।१६।।

इति ब्रुवाणो जगदीश्वरस्य यच्चरो निजे न प्रबभूव वाक्क्रमे ।
बभूव रामः किल तेन शंकितो न हि स्थितिस्त्रुटचति वैशसं विना ।१७।

संकेतः – जगदीश्वरस्येति द्वितीयार्थे षष्ठी, जगदीश्वरमिति यावत्, द्रुह्यादेरनित्यत्वात् । स्थितिर्मर्यादा । वैशसमब्रह्मण्यम् ।। १७ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स शान्तचेताः स्थिरधीः क्षणेन तं प्रसाद्य भृत्यं प्रियदर्शनः प्रभुः ।
कृपांचितैः प्रश्नवचोभिरार्जवादनाविलाचारपथोन्वकम्पत ॥१८॥

किमन्यदीयैरुत कर्मभिः स्वकैः प्रजासु शंका विषवल्लरीयति ।
प्रसन्नचेता यतबुद्धिरात्मनः प्रभुश्च भूत्वा वद भद्र यद् यथा ॥ १९ ॥

संकेतः– विषवल्लरी, विषलता, तद्वदाचरति विषवल्लरीयति । यद् यथेत्यप्रियमपि सत्यं वदेति भावः ॥ १९ ॥

तथानुयुक्तः प्रभुणा–प्यनीश्वरो निजे, विधाय स्थिरतां रहस्यसौ ।
विदेहपुत्रीं प्रति संशयालुतां विषं यथोद्गीर्य गतो विसंज्ञताम् ॥२०॥

संकेतः – तथा पूर्वोक्तेन प्रकारेण अनुयुक्तः पृष्टः । निजेनीश्वरोपीत्यन्वयः । विसंज्ञतां मूर्च्छाम् ॥२०॥

निशम्य दूतेन निवेदिताक्षरं प्रियातिरस्कारमयं च वाग्विषम् ।
घनायसाघातमिवाप्य वारिभूर्विदीर्णवक्षा इव सोपि मूर्च्छितः ॥२१॥

संकेतः – वारिभूः कमलं घनायसम् अयोघनं तदाघातम् । आप्येत्याङ्पूर्वो धातुः । सोपि रामोपि ॥२१॥

गवाक्षलग्नाम्बुरुहाप्तसौरभो मरुत् सरय्वा हृत–पुण्य–सीकरः ।
प्रवीज्य तौ सानुशयः प्रियाकरो यथा मुहूर्त्तात् कृतवान् सचेतनौ ॥२२॥

विसृष्टदूतो भगवान् स राघवो विलापकातर्यमवाप निस्सहम् ।
विरौति चेतो निखिलस्य राक्षसीमवेक्ष्य वृत्तिं प्रियवैशसे रताम् ॥२३॥

अहो असंख्यैः कलुषैरुपद्रुतं नृजीवनं राष्ट्रपतिर्न यो नयैः ।
व्यशोधयत् तस्य पदोपभोगिनो धिगेव सत्त्वं विजुगुप्सितात्मनः ॥२४॥

मनोवचःकर्मसु यार्यसंस्कृतिं सदैव शुद्धां भजते मनस्विनी ।
न कम्पते धर्मणि मृत्युतोपि या जनोऽयमेनामपि हा जुगुप्सति ॥२५॥

ममैव किन्त्वत्र परिच्युतात्मनस्त्रुटिर्यदेषा जनतास्त्यशिक्षिता ।
पितुः स दोषः शिशुरत्ति यद् विषं भिषग्हि वाच्यो यदि वर्धते रुजा ॥२६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथं नु रक्षो-गृह-वास-दौर्भगं स्वत: प्रमाणं, न च वह्निशोधनम् ।
अवैमि नष्टो वपुषाप्यनंगवज्जनान्तरंगेषु कृती स रावण: ।।२७।।

कृते ममैषा नृपमन्दिरादितो वनान्यपि प्रीततराण्यमन्यत ।
निनाय या तां शरदां चतुर्दशीं प्रसन्नमुद्रैव फलैरुपोषितै: ।।२८।।

अदर्शि या चीरधरापि केनचित् कदापि धीरा न दुकूलकांक्षिणी ।
ममांगरक्षां सततं समन्तत: प्रतिक्षणं या विदधे च ता: समा: ।।२९।।

हनूमता किंच सता–धिसिंहलं चरित्रशुद्धावचला निरूपिता ।
अहो प्रमाणत्रितयेपि मे प्रजा विरुद्धबुद्धि: कलिकालसन्निभम् ।।३०।।

संकेत: – मम भर्तुरित्यर्थ: । प्रीततराणि प्रेयांसि । त्रयोदशवर्षाणि फलै:, लंकायामेकं वर्षं च उपोषितै: सततमुपवासै: । प्रसन्नमुद्रेति सीताया मन:कर्मणोरैक्यम् । अनेन सीताचारित्र्यस्य जनतागतं प्रत्यक्षमदर्शि ।।२८।। चीरधारण–पतिशरीररक्षाभ्यां च दुर्जातावप्यशिथिलपातिव्रत्यमनुमानविषय: ।।२९।। सता आप्तेन अधिसिंहलं लंकायां विषमतमायामपि स्थितावित्यर्थ:, चरित्रशुद्धा निरूपिता वर्णिता । यथा–"शीलमासाद्यं सीताया मम च प्रीणितं मन: [सुन्दरे काण्डे]" –इति । एतेन शब्दप्रमाणमुक्तम् । प्रमाणत्रितयेपि विरुद्धबुद्धिरिति चार्वाकितोपि गर्हितत्वम् । कलिकालसन्निभमिति क्रियाविशेषणम्, भगवतो रामस्य युगान्तरे जातत्वात् ।।३०।।

क्व तावता प्रीतिपुरस्सरं तया गतेन कालेन वनं गृहीकृतम् ।
क्वा वा तिरस्कारवचोभिरद्य सा श्रवोविषैर्हन्त पुरस्करिष्यते ।।३१।।

संकेत: – तावतेति सुदीर्घत्वम् । श्रवसो: कर्णयो: विषै: दाहकै: ।। ३१ ।।

अहो विधात: कथमीदृशो ग्रह: सुरापगा–पावक–तुल्य–जीविताम् ।
मदेकचित्तामघ–मारुतैरिमां लतामिवाक्षेपयसे मम प्रियाम् ।। ३२ ।।

संकेत: – ग्रह: हठ: । सुरापगा गंगा, पावको वह्नि: तत्तुल्यं जीवितं यस्या: ताम्, तुल्यत्वं च विकशमलत्वेन । अघानि मारुता इवेति प्रियापक्षे, अघानीव मारुता इति च लतापक्षे । ममेत्यर्थान्तरसंक्रान्तं ममत्वाधिक्यद्योतनं च पदम् ।। ३२ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयि प्रिये, वैशसदारुणे मयि प्रतीतभावा ऋजुतापरिस्नुते ।
क्व के विगानग्लपितं सतीव्रतैर्विशुद्धमेतद् वपुरत्र शोत्स्यते ।। ३३ ।।

संकेत: – प्रिये इति संबोधनम् । अहं वैशसदारुणः, त्वं च प्रतीतभावा विश्वस्तचित्तेति स्वस्य गर्हितत्वं प्रियायाश्चार्यत्वं व्यंजितम् । विगान निन्दा । सतीव्रतैरिति बहुवचनेन विशुद्धमिति सोपसर्गेण शुद्धिवचनेन पुनःशुद्धिसंभवोपहस्तितः । अत्र लोके शोत्स्यते शुद्धं भविष्यति ।। ३३ ।।

किमत्र कार्यं विपरीतताकटुः स्थितिः समक्षं मम संप्रति स्थिता ।
परित्यजानि स्वचितिं, जनानुत, व्रजानि वह्नौ यपि वाद्य वारिधौ ।३४।

संकेत: – चितिपदेन सीताया अध्यवासः, तेन तस्या दयिततमत्वम् । वह्नि–वारिधीति पक्षद्वयगत्योभयत्राप्यक्षेम इति ।। ३४ ।।

समाजधर्मः स्थित एकतोऽन्यतो विभाति वैयक्तिकता च मत्पुरः ।
उदस्यतामत्र लता, द्रुमोऽथवा, परस्पराश्लिष्टतमात्मनोर्द्वयोः ।।३५।।

संकेत: – द्वयोरिति सामान्येन निर्देशः । तेन लतावृक्षयोरिव व्यष्टि–समष्ट्योरपि परस्परोन्नद्धत्वमायातम्, तदेव च भारतीयायाः संस्कृतेर्जीवितसर्वस्वम् ।। ३५ ।।

तदेत्थमन्तश्चलमस्य वैशसाद् बभौ विभोरुत्तरकोसलौकसाम् ।
यथा पयोधौ तरले प्रभंजनात् प्लवोऽथवा वारिरुहं सरोवरे ।। ३६ ।।

संकेत: – अन्तः अन्तःकरणम् । विभोः व्याप्तमहिम्नः प्रभोः । प्रभंजनात् तरलत्वं पयोधाविव सरोवरेऽपि योजनीयम् ।। ३६ ।।

स वृक्षवृत्तिर्जनताकृते प्रियां लतामिव त्यक्तुमनास्ततोऽभवत् ।
भवन्ति चेतांसि महात्मनां सदा परार्थसंपादनसौख्यभांजि यत् ।। ३७।।
ततः सतीं तां स्व-विकार-मूर्च्छितां महागजः पंकजिनीं यथा वहन् ।
सभागृहं प्राप स पूरुषोत्तमो विसर्गरंगं स यथा नटोत्तमः ।। ३८ ।।

संकेत: – स्वं श्रीरामः तद्विकारः सीतापक्षे तद्ग्लानिः, पंकजिनीपक्षे स्वं गजः, तद्विकारो मत्तता, तज्जनितो विकारो विमर्दादिर्वा । विसर्गरंगः प्रलयताण्डवमंचः । नटोत्तमः शिवः । "महावराहो धारिणी"–मित्यपि वक्तुं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शक्यते तथापि परित्यागवैशसद्योतनाय गजकमलिनीसाम्यमेवान्तरंगतमम्।
वराहेण हि रक्षितुं धरणी समुद्धृता, न नाशयितुम् ॥ ३८ ॥

ततश्च सर्वा अपि सानुजाः सुवः सामह्वयत् तत्क्षणमेव राघवः।
निजस्य सर्गस्य निवेदनाय यन्न धर्मकृत्ये रघवो विलम्बिनः ॥ ३९ ॥

संकेतः – रामस्य कर्तृत्वादनुजपदेन तस्यैवानुजा भरतादयो ग्राह्याः, सात्मजा इत्युक्ते रामस्य ताटस्थ्यं प्रतीयेत स्वानुजनिषु मातृषु च। सुवो मातृः, प्रसवार्थकस्य सुनोतेर्धातुत्वात् "अचि श्नुधातु०"–इति शसि प्रत्यय उवङ् ॥३९॥

अनर्थ-शंका-कुल-मानसस्ततः सुतैः समेतो जननीजनः क्षणात्।
सभागृहं वीचिचयः सहाम्बुजैस्तटं यथा मारुतमूर्च्छितोऽभ्यगात् ॥४०॥

संकेतः – बिम्बप्रतिबिम्बभावमूला पूर्णोपमा। मूर्च्छितो वेल्लितः। उभयमपि प्रकृतमेवात्र ग्राह्यमुपमेयोपमानयोः, तेन चानिष्टलक्षणमपि संगृह्यते ॥४०॥

अभी विभान्ति स्म भृशं विशंकया विवर्णदेहा नरनाथबन्धवः।
विभान्ति यद्वच्छशिपार्श्ववर्त्तिनो ग्रहा उदीते निशि धूमकेतने ॥४१॥

संकेत – बन्धुपदेन भ्रातरो मातरश्चेति द्वितयेपि ग्राह्याः। विशंकापि स–विशाल–पुच्छो मनःप्रकाशः ॥४१॥

सशंकमेते मिलिताश्च तद्गृहे तथैव रामेण तटस्थचेतसा।
यथा महेन्द्रप्रमुखाः सुराः सतीवियोगिना दक्षगृहे पुरारिणा ॥४२॥

तटस्थवृत्तिश्च स तेषु राघवस्तथा बभासे निजबन्धुषु स्थितः।
यथा स कश्चित् पुरुषः प्रकाशते गुणेषु सांख्ये महादादिभिर्वृतः ॥४३॥

संकेतः – बध्नातीति व्युत्पत्त्या बन्धुपदं महदादिष्वपि सार्थकम्, तैरपि ज्ञ–रूपस्य पुरुषस्य व्यक्ताव्यक्तत्वमुपेयिवद्भिरेवंविधा बन्धुता सांख्यशास्त्रे लभ्यत एव। तत्र "प्रकृतेर्महान्"–इति कारिकावचनान्महत्पदेन प्रकृते प्रथमो विकारो बुद्धिर्ग्राह्यः। तस्य व्यक्तत्वेन तत्कृतस्य बन्धनस्य सुगमत्वात् अव्यक्तायाः प्रकृतेरत्रानुपादानम्। आदिपदेन 'अहंकारः, तन्मात्राः, इन्द्रियाणि, भूतानि" चात्र ग्राह्यानि। यदुच्यते भगवतेश्वरकृष्णेन–"प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः, तस्मादपि षोडशकात् पंचभ्यः पंच भूतानी"–ति ॥४३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विपक्वगर्भां च वधूं दृगम्बुभिर्निजैः ससंज्ञां च निरीक्ष्य मातरः ।
निशश्वसुर्मुष्टिमतीं यथा महीं तरङ्गितां वीक्ष्य कृषाणचेतनाः ॥४४॥

संकेतः – मुष्टिः परिपक्व–शुष्कं सस्यं "फसल"–शब्दवाच्यम् । ोकस्थित्यै कृषकपक्षे वग्रह आक्षेप्यः ॥४४॥

कृतप्रणामान् विहिताशिषश्च तान् यथायथं संश्रितविष्टरानपि ।
कथंचिदुद्धूतविवासवेदनानिष्टभीतिर्नहि भाषितुं ददौ ॥४५॥

संकेतः –तान् रामादीन् ॥४५॥

ततः कथंचित् कुलिशान्तरात्मतामवाप्य तेभ्यो मितसारवाक्पतिः ।
न्यशामयद् दूतमुखेन यच्छ्रुतं स्ववंशकौलीनविषं विशांपतिः ॥४६॥

संकेतः – विशांपतिः नृपतिः श्रीरामः । कौलीनं जनप्रवादम् ॥४६॥

स वाग्विसर्गो विदधे द्विधाह्रदो यथा समस्तानपि तान् सभासदः ।
भवन्ति कारुण्यवतां वपुर्भृतां मनांसि संवादशुभानि यत् सदा ॥४७॥

संकेतः – संवादः समानोनुभवः ॥४७॥

निपीडिताः कर्णकुटीषु तद्वचोऽनलेन सर्वा अपि राममातरः ।
अमूमुहन्नन्तरतीतपन्नथो व्यलीलपन्नेवमुदस्तसंविदः ॥ ४८ ॥

कथं विधातर्घनसारसन्निभामिमां कुलं शोधयितं स्नुषामदाः ।
कथं च तत्राग्निनिभं विपद्व्रजं विधातुमेतान् महतो ग्रहानगाः ॥४९॥

संकेतः – घनसारः कर्पूरम् । शोधयितुं कर्पूरधूपेन शुद्धिर्भवतीति निहितोभिप्रायः । ग्रहान् हठान् ॥ ४९ ॥

निषेकपाकं धरिणी वृषाकपेर्यथात्मजस्यास्य बिभर्त्ति मे वधूः ।
विधेऽत्र वृत्रासुरवत् कथं ततः कलंकवर्षोपलमाः सिसृक्षसि ॥ ५० ॥

संकेतः – निषेको गर्भः । वृषाकपिरिन्द्रः । वृत्रासुरो मेघपर्यायतया संहितासु प्रसिद्धः ॥ ५० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्व भूतधात्र्या दुहिता स्नुषा च मे, प्रतीपभावा क्व च तादृशी कथा ।
उपांशु मल्ली न विषं, न चन्द्रिका तमो, न गंगा कलुषायितं भजेत् ।५१।

संकेतः – भूतधात्री पृथिवी । मे ममेत्यर्थान्तरे संक्रान्तम् । प्रत्यक्षं सौरभ्य–प्रकाश–शुद्धि विकिरन्त्यो मल्ल्यादय उपांशु रहसि वैपरीत्यं न भजेरन्निति भावः ।। ५१ ।।

मरुस्थली सोर्वरतामुपेयुषी चिरेण मे पुत्र–वधू–युगेक्षणात् ।
कलंकदुष्काल इमां पुनः कथं विधे समुज्जासयितुं प्रवर्त्तितः ।। ५२ ।।

संकेतः – सा विवासकालविकराला । दुष्कालो वग्रहः । समुज्जासयितुं नाशयितुम्, जसु हिंसायाम् चौरादिको धातुः ।। ५२ ।।

इयं विमर्द्दे वकुलावली यथोत्तरोत्तरं सौरभमेव म वधूः ।
सृजत्य,– सौ चेत् कलुषा ततः शुचिर्जगत्त्रये का नु पतिव्रता भवेत् ।।५३।।

संकेतः – वकुलः मौलिश्री– [मोलसिरीति] –नाम्ना व्यपदिश्यमानं केसरपुष्पं तदवली । केसरं हि परिशुष्कमपि न विक्रियते, अभ्युक्षणेन हरितायते चेति प्रसिद्धमेव ।। ५३ ।।

सुतोऽस्ति मे पंकजकोश एष, मे वधूरियं तत्र च माधवी स्तुतिः ।
अरातिभृंगस्य पदेन कीदृशस्तयोर्विभेदो विपरीततापि वा ।।५४।।

संकेतः – अरातिः शत्रुः, स चात्र रावणः । तद्रूपस्य भृंगस्य पदेन चरणेन स्थानेन च । बलादपहरणकाले रावणेन सीताशरीरस्य स्पर्शाद् उक्तिरियम् ।। ५४ ।।

कृपीटयोनौ प्रतिमेव हैमनी न कृच्छ्रयातापि सती विवर्ण्यते ।
अथास्ति या वल्लभमीदृशं श्रिता शिवं कलेन्दोरिव तत्र का कथा ।।५५।।

संकेतः – कृपीटयोनिः अग्निः । हैमनी सुवर्णनिर्मिता ।। ५५ ।।

प्रभा प्रदीपादिव रामजीवनादपैति सा चेदतिपेशलाशया ।
तदाऽऽर्यपुत्रात् प्रथमं विनाकृतं कुलं रवेः को नु परः प्रकाशयेत् ।।५३।।

संकेतः – आर्यपुत्रो दशरथः । रवेः कुलं परो रविभिन्नः ।। ५६ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

0802469

क एष मार्गो निजरक्षणे जनो धृतव्रतं दूषयते निजाधिपम् ।
किमत्र कार्यं भगवानुषर्बुधो भवेद् दिधक्षुर्यजमानमेव चेत् ॥ ५७ ॥

संकेतः – उषर्बुधो वह्निः । स चात्र यजमानपदसाहचर्याद् यज्ञीयः ॥ ५७ ॥

इति शकलितचित्तास्तास्तथैवानुजाता–
नविरलगलिताश्रूँल्लोकनाथः स दृष्ट्वा ।
स्वयमपि निजसर्गं वक्तुमीशां न चक्रे
भवति हृदयभूमौ मानवो मानवो हि ॥ ५८ ॥

संकेतः – ताः जननीः अनुजातान् भ्रातॄन् लोकनाथो राजा रामः सर्गं प्रतिज्ञाम् वक्तुं न ईशांचक्रे । व्यवहितप्रयोगस्य कालिदासाश्वघोषादिषु प्रचलितत्वात्, अपाणिनीयत्वेपि न क्षतिः । "ईशो न जात" इत्यादेः पाठस्यापि संभवे तथाप्रयोगो व्यवहारसौभाग्यमभिप्रेत्यैव कृत इति मन्तव्यम् । अधिकश्रद्धत्वे पुनः 'ईशां शक्ति साहसरूपां न चक्र' इति व्याख्यातव्यम् ॥ ५८ ॥

मनसि विधृतमोहा सा सभा राघवाणा–
मपि वचसि तदासीदंकवीणेव मूका ।
न हि भवति मनुष्यस्यान्तरंगे निवासी
विकृतिषु परमात्मा पक्षपाती मृषासु ॥ ५९ ॥

संकेतः – वीणा अंकमारोप्यते चेत् तदुद्देश्यं वर्णपरिचयः स्वरसंयोग एव वा भवति । तर्हि सत्यामपि स्वरसंयोगस्पृहायां यथा तस्या मूकता विवक्षोन्मिश्रा भवति तथैव प्रकृते । मृषासु अलीकासु । अव्ययत्वाविवक्षायामेवं प्रयोगः ॥ ५९ ॥

अथ रघुपतिजायैवात्मदेवस्य साक्ष्या–
ज्झटिति विमलचेता निश्चिकाय स्वधर्मम् ।
वदितुमथ च धैर्यात् किंचिदाकुंचिताक्षी
धृततनुरिव काशी प्रक्रमं सा चकार ॥ ६० ॥

संकेतः – आत्मा हि देवः । अक्ष्याकुंचनेन विवेकबुद्धिरनुभाव्यते । काश्यौपम्येन च तस्या एव पोषः ॥ ६० ॥

इति सनातनोपाह्व–श्रीमद्–रेवाप्रसादद्विवेदिकृतौ "सीताचरित" नाम्नि सर्गबन्धे जानकीकौलीनं नाम द्वितीयः सर्गः ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयः सर्गः

सा निसर्गमधुरस्वरा ततः सत्यहेम्नि लिखितेव देवता ।
आजहार हृदयानि भाविनी बान्धवस्य पटुभाषिणी सती ॥ १ ॥

संकेतः — लिखिता उत्कीर्णा । हेम्नि नष्टे यथा तल्लिखिता मूर्त्तिरपि नश्यति, तथैव सत्ये नष्टे सीताया अपि नश्वरतात्र गम्या ॥ १ ॥

तामवीवददनल्पतापिनी लोकनाथहृदयस्य विद्रुतिः ।
स्वं परीत्य जगति प्रसर्पिणी कापि रात्रिरिव चक्रवाकिनीम् ॥२॥

संकेतः — लोकनाथो रामः । विद्रुतिः शोकक्षोभजनिता द्रवता, वैशसरूपो विद्रवश्च । स्वं सीतां परीत्य परिवेष्ट्य विषयीकृत्येति यावत् । पक्षान्तरेपि रात्रिः तदैव संतापयित्री भवति यदा सा चक्रवाकं दूरीविदधती चक्रवाकीमपि परिवेष्टयति जगति प्रसर्पति च ॥ २ ॥

द्यौर्न नीरदभरच्युतां विना विद्युतं श्रयति शब्दकारिताम् ।
नैव मारुतविसर्पणादृते रौति कापि च मरालमानिनी ॥ ३ ॥

संकेतः — मरालमानिनी हंसी ॥ ३ ॥

साऽब्रवीत्—प्रतिहतेन चक्षुषा सर्वथा स्वतमसाऽत्र मानुषः ।
वीक्षते परपरिस्थितिं परं, वीक्षते न पर–धर्म–दर्शने ॥ ४ ॥
वीक्षते यदपि सूर्यबिम्बतः शैत्यमुद्भवति नैव जातुचित् ।
एवमेव न निशीथिनीपतेः क्वापि नश्यति तुषारशीतता ॥ ५ ॥
किन्तु विश्वसिति दूषणं प्रमापूतमेव जनता स्वतः सदा ।
तोयजं भवति पंकजं हि तन्मानसे श्रयदपि प्रभां रवेः ॥ ६ ॥

संकेतः — स्वतमसा प्रतिहतेनेत्यन्वयः । परिस्थितिः लोकगता समविषमस्थितिः । सीतायाः लंकावासः परिस्थितिरेव । परस्य परे चेति धर्मदर्शने तद्द्वयी । दर्शनं हि धर्मस्य प्रभवभूः । चक्षुःपदेनात्र स्वदर्शनं गम्यते ॥ ४ ॥ वीक्षते मानव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति पूर्वानुर्वाति ॥ ५ ॥ दूषणं स्वतः प्रमापूतं प्रमाणमिति भावः। कमलं हि जलादुत्पद्यते, न पंकात्, नालमात्रस्य पंकादुत्पन्नत्वात्। ततश्च पंकोत्पन्नत्वमस्य वितथमेव। यच्च तथ्यं तद्धि तस्य सूर्यप्रभाभासुरत्वम्। तदाश्रित्य केनापि कमलं न व्यपदिश्यते ॥ ६ ॥

विश्वसेदथ च नैव विश्वसेत् कोपि, नास्ति विदुषे ततो भयम्।
स्वं प्रमाणयति कृत्यदर्शने शक्यते न सुजनेऽन्यनेयता ॥ ७ ॥

संकेतः – स्वं स्वान्तरात्मानं प्रमाणत्वेन स्वीकुर्वति सुजने संस्कारवति शिष्टे ततो नाव्यवस्थाभीः। अन्यनेयता परानुशिष्टिसापेक्षता ॥ ७ ॥

किन्तु देव ! यदि सौख्यवारिभिः शीतमस्ति तव राज्यमक्षयम्।
तेन मादृश–विगीत–वृत्तिना जन्तुना किमिह तापकारिणा ॥ ८ ॥

संकेतः – सौख्यस्य वारिणोपमया तुच्छत्वम्, विगीता निन्दिता वृत्तिश्चारित्र्यं यस्य तेन जन्तुनेति तुच्छताप्रत्यायकम् ॥ ८ ॥

अस्तु मे भवदभीप्सिता गतिर्यत्र कुत्रचन कानने वने।
विश्वमानवमशल्यतां व्रजेत् काममद्य सह कीर्त्तिभिस्तव ॥ ९ ॥

संकेतः – कानने वन इत्याम्रेडनं वैषम्यातिशयप्रतीतिसार्थकम्। कामं पर्याप्तम् ॥ ९ ॥

आर्य ! यावदवधि प्रजाहिते दीक्षितोसि सुखमात्मनस्त्यजेः।
स्नेहदाहसहितो हि दीपको विश्वमुज्ज्वलयितुं प्रगल्भते ॥ १० ॥

संकेतः – स्नेहो रागः, तैलादि च। तत्र यो दाहस्तत्सहितः ॥ १० ॥

कृच्छ्रपंकविधृतोपि निश्चलः शीर्यते न, स हि पंकजायते।
यद्यशःपरिमलेन भावकाः साधुवादमलिगुंजयन्ति यत् ॥ ११ ॥

संकेतः – कृच्छ्रं विपद्, निश्चलो जन इति यावत्। अलिगुंजनं कुर्वन्तीति अलिगुंजयन्ति ॥ ११ ॥

न प्रजा, न निजबन्धुता, परं जीवितात् सह समेति जन्तुना।
तत्र केवलमनाविलं मनस्तस्य साक्षिपदमश्नुतेतमाम् ॥ १२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संकेतः – बन्धुता बन्धुसमूहः "ग्रामजनबन्धुभ्यस्तल्"। जन्तुना सह जीवितात् परं न समेति ॥ १२ ॥

तेन कोपि किमपि ब्रवीतु, ये पारमार्थिकविवेकमांजनीम्- ।
आगमाक्षिनिपुणाः शलाकिकामाश्रयन्ति, विचरन्ति तेऽभयम् ॥१३॥

संकेतः – तादृशविवेक एव आंजनी शलाकिका, ताम् ॥ १३ ॥

आर्य ! यद्यपि मनस्विनीजनः स्त्रीति विश्ववचनीयतास्पदम् ।
लोकनायक ! विवेकदीपकं तत्कृते न परिहीयते परम् ॥ १४ ॥

यद्यपि प्रतिविधित्सुरप्यसौ मानवो न विधिलेखमुत्खनेत् ।
चित्तसाक्षिकमथापि तुष्यति स्वेन शुद्धिमनुवर्त्तितो हि सः ॥ १५ ॥

संकेतः –चित्तसाक्षिकं यथा स्यात् तथा शुद्धिमनुवर्तितः स स्वेन तुष्यतीत्यन्वयः ॥ १५ ॥

अद्य यावदियमावयोर्मनःस्निग्धभूमिविधृता प्रतानिनी ।
पुष्यति स्म युगमंगलं सुमं, साद्य यद्यपि विशस्यतेतमाम् ॥ १६ ॥

किन्तु पूर्वसदृशं चराचरं विश्वमेतदनया प्रसाध्यताम् ।
सौमनस्यमभिवर्ष्य, माधवी मिष्टता च खलु तत्र धीयताम् ॥ १७ ॥

आवयोर्हृदयदुग्धसिन्धुनोत्थापितोऽयमनुरागनीरदः ।
दुर्दिनेष्वपि चिराय सक्षमो विश्वतापहरणाय जायताम् ॥ १८ ॥

संकेतः – सुमं कुसुमम् । विशस्यतेतमाम् जनैरिति शेषः ॥ १६ ॥ चराचरं चराचरात्मकम् । प्रसाध्यताम् अलंक्रियताम् ॥१७॥ दुर्दिनेषु वार्षिकेषु विषमेषु च दिनेषु ॥ ८ ॥

सैव काचिदपि शाश्वती स्थितिः प्रेम्णि हेम्नि रुचिरा यथा द्युतिः ।
विप्रियाग्निषु न यत्र विक्रिया लेशतोपि लवतोपि जायते ॥ १९ ॥

अन्तरिक्षमवनिर्दिवानिशं विश्वकर्मणि भवन्ति साक्षिणः ।
किन्तु दैवहतकेन वाग्मिता तेष्वपि द्युकुसुमायिता कृता ॥ २० ॥

संकेतः – द्युकुसुमायिता अभावात्मिका ॥ २० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आर्य यद्यपि शुचित्वमात्मनः सेद्धुमर्हति न साक्षिणं विना ।
किन्तु वश्यमनसां महात्मनां वर्त्मगे न परतः प्रमाणिता ।। २१ ।।

मेति मेति निगदन्तमीश्वरं साब्रवीत् पुनरपूर्वभाषिणी ।
आर्यपुत्रचरणद्वयीरजः किन्तु कुत्र सुलभं भविष्यति ।। २२ ।।

हन्त सर्वमपि तावदस्यतां नाथ ते प्रणयभिक्षुकीमिमाम् ।
क्षीरसिन्धुविशदस्य चेतसः पार्श्वदूतिपदतो न हास्यसि ।। २३ ।।

पश्चिमा प्रणतिरङ्घ्रितीर्थयोर्नाथ तेऽद्य मयका विधीयते ।
मातरश्चरणरेणुरद्य वः स्वांचलेऽत्र मयका निधीयते ।। २४ ।।

प्राणतोपि यशसि स्पृहा गुरुः सूर्यवंशिषु हि या प्रशस्यते ।
तां विभाव्य कलुषा स्नुषाऽद्य वो याति दूरमनुमन्यतान्तमाम् ।।२५।।

येन सौभगमपि स्वकं पुरा त्याजिताः स्वकुलगौरवेण, तत् ।
वीक्ष्य मातर इहापि दुष्क्षणे वत्सलत्वमवमन्यतान्तमाम् ।। २६ ।।

पुत्रिकेव भवतीभिरुक्षिता याञ्चलेन सततं पयोमुचा ।
राजधर्मपरिपालनव्रतं वीक्ष्य सापि परिहीयतान्तमाम् ।। २७ ।।

राजमातृपदवी गरीयसी मातरो द्रुतिमुपेत्य चेतसः ।
प्राणतोपि यदि पाल्यते व्रतं तर्हि सा मम कृते न दूष्यताम् ।। २८ ।।

विश्वचित्ररचनापटीयसी वेधसो मतिरतीव चित्रिता ।
तत्र हन्त परिवर्त्तनं प्रियं चक्रयोरपि तथाध्वनोरपि ।। २९ ।।

संकेतः – चक्रं हि परिवर्त्तमानं सत् तदीयं पन्थानमपि क्षोदयत् परिवर्त्तयति यद्यपि तत् स्थिरमिवैव भासते । प्रकृते च केन कस्य साम्यमिति स्वमनसैवोन्नेयम् ।। २९ ।।

विश्वदैवतमुपास्य कार्मणं यस्तु वाञ्छति चराचरप्रियम् ।
तेन पादपनिभेन केवला पूज्यतेऽनुपहिता परार्थता ।।३०।।

संकेतः – कार्मणं वशीकरणम् । अनुपहिता उपाधिरहिता निश्छला निष्कामा चेत्यर्थः ।। ३० ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यामि मातर इतः स्वतस्ततो यामि, यामि विपिनं न मे व्यथा ।
कीर्तिकायमवितुं सुमानुषा मृत्युतोपि न हि जातु बिभ्यति ।।३१।।
आह साथ विषमेपि सेवया पूजितुं गुरुजनं दृढव्रतम् ।
लक्ष्मणम्, "गुरुरसि त्वमेव मे धर्मपालनविधाविह क्षणे ।।३२।।
अग्रणीरसि सदा सनातने कालचक्रपरिचङ्क्रमे नृणाम् ।
आत्मनः प्रियमपास्य यो गुरूनन्वगच्छ इह छायया समः ।।३३।।
याम्यहं विपिनमेकला गुरुं त्वं पुरेव परिरक्ष सर्वतः ।
त्यक्तधारमपि वारि शैत्यतो विप्रकर्षमुपगन्तुमक्षमम् ।।३४।।
साथ बाष्पनयनाबलोचितं कातरत्वमवरुध्य चेतसः ।
प्रांजलिर्भरतमन्वयाचत प्राग् वने विधृतमात्मवल्कलम् ।।३५।।
वज्रपातमिव साखिला सतीभाषितं तदुपकर्णमागतम् ।
सोढुमक्षमतया सभाभवद् भूविलुण्ठितनुर्लता यथा ।।३६।।

संकेतः – भूविलुण्ठिततनुत्वेन मूर्च्छितत्वमनुभाव्यते । लतापक्ष उपकर्णमुपकण्ठम्।

मातरस्तदनु लब्धचेतना बाष्परुद्धवचसः कथंचन ।
प्रास्तुवन् निजवधूं प्रचेतसः सूनवेऽर्पयितुमाप्तसंविदे ।।३७।।

संकेतः – निजवधूं सीताम् । प्रचेतसः सूनुः वाल्मीकिः । आप्तसंवित्त्वेन तस्य सीता-विषये वास्तवदर्शितायाः शंसा ।।६७।।

राघवोपि जननीजनोदितं तद् वचः शिरसिकृत्य लक्ष्मणम् ।
यन्त्रवन्निजनिदेशकारिणं "पूर्यतामिदमि"–ति व्यजिज्ञपत् ।।३८।।
"तात मातरमहो कथम्", "कथं मा वदे"–ति शतकोटिचेतनः-।
राघवोऽर्धवचसि प्रतिक्षिपँल्लक्ष्मणं, व्यवृत मानसं निजम् ।।३९।।

संकेतः – शतकोटिर्वज्रम् ।।३९।।

वेत्सि नो, ननु विहाय जानकीं कुण्डली शिरसिजां यथा मणिम् ।
भेत्स्यते शिरसि तेऽयमग्रजो नूनमेव शतधा सहस्रधा ।।४०।।

संकेतः – मणिर्द्वयोरित्यमरः ।।४०।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किन्तु हन्त मुकुलैरुपस्कृतां नूतनैः किसलयैश्च संवृताम् ।
मल्लिकां परशुना निकृन्तति यस्तु चर्महृदयेन तेन किम् ॥४१॥

यो हि नीलघन–कुट्टिमाम्बरोद्यानलास्य–पटु–मुग्ध–चंचलाम् ।
प्रीतिपूतमनसा मनस्विनीं न क्षमेत, वद सोऽपि मानुषः ॥४२॥

संकेतः – नीलं च तद् घनं च, नीलश्चासौ घनश्च तद्वच्चेति नीलघनम्, अर्शआदिभ्योऽच्, तच्च तत् कुट्टिमं गृहमध्यांगनं तदेवाम्बरोद्यानमाकाशोपवनं तत्र लास्ये पटुः, मुग्धा चासौ चंचला विद्युत् तद्वत्स्फुरणसुभगा ताम् ॥४२॥

तेन तां गगनपुष्पितां कथां रामसौख्यमवलम्ब्य तस्थुषीम् ।
मा स्म चिन्तय नियोगमात्मनः पूरय त्यज तव प्रजावतीम् ॥४३॥

संकेतः – गगनपुष्पवदाचरतीति गगनपुष्पति, तन्निष्ठायां गगनपुष्पितेति सर्वथाऽभावाभिप्रायकं वचनम् । प्रजावती भ्रातृजाया ॥४३॥

पुत्रभावमवलम्ब्य तात यां काननेषु विचरन्नुपाचरः ।
सैव गर्भभरनिर्भरालसाप्यद्य शस्यत इदं च मृष्यताम् ॥४४॥

संकेतः – शस्यते हिंस्यते । शसु हिंसायाम् ॥४४॥

यूयमेष भवदग्रजश्च ये क्षात्रकुक्षिषु विपाकमापिताः ।
तैः समग्रमतिभिः प्रजाहितं सूर्यवच्च शशिवच्च पाल्यताम् ॥४५॥

संकेतः – एष भवतामग्रज इति वक्तू रामस्यात्मानं प्रति निर्देशः ॥४५॥

यावदेव शृणुतेऽस्य शासनं लक्ष्मणो विमुखमानसः प्रभोः ।
आर्षशोणितसमुद्भवा ततस्तावदेव निपुणं न्ययुङ्क्त तम् ॥४६॥

संकेतः – आर्षशोणितसमुद्भवा सीता ॥४६॥

मात्र कापि महती शरीरिणो मान्यता भवतु तत्कलेवरे ।
तत्र गूढगतिरस्त्यवस्थिता तोयदेषु चपलेव चेतना ॥४७॥
तत्र कल्पलतिकेव सौमनस्याभ्रसिन्धुरुपबृंहते न वा ।
सा परिस्थिति–समौचिती तटद्वन्द्वतो निरवधि गता न वा ॥४८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तात जीवनरथस्य चक्रयोः प्रेयसोः परमिदं निरीक्ष्यताम् ।
दम्पतीतिपरतत्त्वमूर्ज्जितश्रि स्पृहास्ति यदि वीक्षितुं जने ।।४९।।

संकेतः – कलेवरे स्थूले करणग्रामे ।।४७।। तत्र चेतनायाम् । सौमनस्यं हि कामधुक्, अतः कल्पवल्लिसाम्यम् । तस्यैव पुण्यत्वबुद्ध्यै अभ्रसिन्धूपमा । परिस्थितिः सीताजीवने लंकावासः, रामजीवने वनवासः, समौचिती पुनस्तत्र चारित्र्यरक्षणम् । निरवधि अवधिरहितं कंचित् सिन्धुभूतमनन्तं व्योमभूतं वा विभुम् ।।४८।। दम्पती दाम्पत्यमेवेति भावप्रधानो निर्देशः ।।४९।। एतदेव विवृणोति––

मानवी निज–चिति –त्रिमार्गगां गर्वशैलशिखरान्निपातयेत् ।
किं च तां समरसाद् वसुन्धरापृष्ठतो–म्बुधिमनन्तमापयेत् ।।५०।।
स्नेहसिन्धुमथ पूरुषाश्रयं प्रोत्तरंगमसमं प्रकर्षयेत् ।
आर्य–भूतल–रजोरुहं ततः प्राप्तजीवितफलं स्वमुद्दिशेत् ।।५१।।

संकेतः – समरसाद् इत्यनेन सामरस्यमेव वसुन्धरापृष्ठमिति सूचितम् । तत्र वसूनि धरतीति योगार्थमादायार्थान्तरमपि शक्याक्षेपम् ।।५०।। सिन्धुः समुद्रः स्वमात्मानं प्राप्तजीवितफलमुद्दिशेदित्यन्वयः । स्वम्पदार्थविशेषणमेवेह आर्यभूत-लेत्यादि ।।५१।।

एवमार्य–महिला–समीरिता भारती विरत–भावमाश्रिते ।
लक्ष्मणेऽभिनवचेतनांकुरं प्रोद्बिभेद मुकुलं यथा द्रुमे ।।५२।।

संकेतः – आर्य–महिलेति साभिप्रायं विशेषणम् । तेन भारतीयत्वमाक्षिप्यते । विरतभावो विरतिः ।।५२।।

एकतोऽग्रजनियोग एकतः स्वाभिमानमृषिशोणितात्मनः ।
तद्द्वयेऽस्य परमानुरागिता मेघ–वात–पथ–दीपिकीकृता ।।५३।।

संकेतः – अग्रजनियोगो रामाज्ञा । ऋषिशोणितात्मा सीता । अस्य लक्ष्मणस्य मेघवातपदेन वायौ सीकरसान्द्रता प्रवेगत्वं चोन्मीलिते । दीपिकापदेन दीपस्यापि लघुत्वमुद्भावितम् ।।५३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अंजलिं भरतमूर्ध्नि निश्चलं साभिवन्द्य रिपुघातियोजितम् ।
स्यन्दनं तत उपारुरोह खं वैधवीव शुभदर्शना कला ॥५४॥

संकेत: – रिपुघाती शत्रुघ्नः ॥५४॥

शुभ्रकेतुरवदात–वाहनः श्वेतरश्मिरतिशुद्धसंस्तरः ।
द्योतते स्म रथ एष तां वहन् तद्विशुद्धिपरिवेष्टितो यथा ॥५५॥

संकेत: – रथ एष सर्वशुक्लः । एष एव हि भारतीयतायाः प्रतीकम् ॥५५॥

मातृभिर्विहितमंगलक्रिये भ्रातृभिः स्वयमुदस्तसंचरे ।
यत्र वर्त्मनि रथः स संस्थितो धौतमेतदमराश्रुवृष्टिभिः ॥५६॥
तं निरस्तममतोऽथ लक्ष्मणो बाष्पपूरितदृगंचलो रथम् ।
आर्यधर्ममिव मौनिना हृदा यन्त्रवत् किमपि रोद्धुमायसत् ॥५७॥
राघवोपि शितिकण्ठवत् ततः क्ष्वेडपानमिव मीलितार्धदृक् ।
जानकीगतमुपांशु वैशसं तन्नितान्तपरुषं न्यपीपिबत् ॥५८॥
रामवासभवनस्य देहलीमुद्गताश्रु मुहुरीक्षमाणया ।
सीतया प्रियमवीक्ष्य सा पुरी सूचिकेव नयने व्यभाव्यत ॥५९॥

संकेत: – रामो देहलीं यावदपि सीतागमनावसरे नायात इति गुह्यम् ॥५९॥

लक्ष्मणेरितरथाऽथ साऽचलच्चेतनेव रघुवंशिनां, पुरः ।
तां विसृज्य बत पूश्च सा सती न व्यशिष्यत सुरद्रुहां पुरः ॥६०॥
स्वस्य जीवनमखस्य जीवितं तां विसृज्य सुरभिं रघूद्वहः ।
दृश्यते स्म बत निष्परिष्क्रियो यूपदण्ड इव वेदिकाच्युतः ॥६१॥

संकेत: – सुरभिः गौः, मनोज्ञा च, वेदिकातश्च्युतो वेदिकाच्युतः ॥६१॥

वस्तुतो यदि सुमानुषी सृतिः पद्मिनी, श्रयति पद्मतां प्रिया ।
साऽस्ति चेद् यदि शिखा विभावसोरूष्मतां स्पृशति तत्र च प्रिया ॥६२॥
सैव जीवनसुधांशुचन्द्रिका सैव संस्कृतिवसन्तकोकिला ।
तां विना न चरितार्थता सृतेः कल्पवल्लिमिव नन्दनावने: ॥६३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूरुषोऽग्निपरमाणु–रच्चितिः सतिप्रयैव ननु तत्र, तां विना ।
नाम–रूप–कलना–प्रसूरियं संहितापि ननु कच्छपीपयः ॥६४॥

ज्योतिरिङ्गण–मयूखतो हि या भास्करावधि विभाव्यते प्रभा ।
संविदक्षिणि ततोऽप्यसौ परा मातृशक्तिरनुबिम्ब्यते परम् ॥६५॥

तां हि दुग्धदशनो यथा जनः कश्चिदप्यतितरामधिष्ठितः ।
याति हन्त यजमानतां परां याति हन्त जनुषः कृतार्थताम् ॥६६॥

संकेतः – यदि सुमानुषी दाम्पत्यमयी सृतिः सृष्टिः पद्मिनी र्तह्नि प्रिया पद्मतां तत्प्राणतां श्रयतीत्यन्वयः ॥६२॥ वेद–विज्ञानानुसारमग्निपरमाणावपां चितिश्चयनमेव नाममूलां भिन्नतां तदाश्रयभूतां रूपतां च याति । सैवेयं परा कला, तस्याः प्रसूर्माता संहिता संघातभावः । सा कच्छपीपयोऽभावात्मिका ॥६४॥ ज्योतिरिंगणः खद्योतः । ततः तस्याः प्रभायाः सकाशात् । परं केवलम् ॥६५॥ यजमानता "सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः । अनेन प्रसविष्यध्वमेष वोस्त्विष्टकामधुक् ॥–"इति गीताचार्यवचनात् प्रजातन्तुवितानरूपयज्ञकर्तृत्वम् । तदेव च जनुषो जन्मनः कृतार्थतायाः मूलम् ॥६६॥

हृदयं हृदयेन संवदेदयमात्मा च वपुःपरिच्छिदाम् ।
अपनीय परात्परं विशेदिति हेतोर्गृहमेधिता सताम् ॥६७॥

इति भावितमानसो नृपः प्रविवेशाश्रममेष यं पुरः ।
शलभादिव दीपकस्ततो निरवेदीन्न हि तद्वियोगतः ॥६८॥

संकेतः – यमाश्रमं गार्हस्थ्यम् । निरवेदीत् निर्विण्णो जातः ॥ ६८ ॥

निज–नरपति–धर्म–रक्षणायां
हिमगिरि–निश्चलतां वहन् निराशीः ।
धृतवपुरिव कर्मयोग एष
क्षपित–ममत्वतया तदान्वभावि ॥६९॥

इति सनातनोपाह्व–श्रीमद्–रेवाप्रसादद्विवेदिकृतौ "सीताचरित" नाम्नि सर्गबन्धे जानकीपरित्यागो नाम
तृतीयः सर्गः ॥ ३ ॥

—★—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्थः सर्गः

तनयां जनकस्य लक्ष्मणो भुवमिक्ष्वाकुकुलस्य सन्ततेः ।
विदधातु वनेचरीं कथं कथमार्यस्य वचश्च लङ्घतु ॥ १ ॥

संकेतः – इक्ष्वाकुकुलसन्ततिभूत्वेन गर्भिणीत्वमाक्षिप्यते । आर्यस्य श्रीरामस्य ॥ २ ॥

विचिकित्सितमानसस्ततश्चिरमश्रूणि विमुच्य जानकीम् ।
भगिनीभिरथोर्मिलादिभिः परिसंभावयितु गृहं ययौ ॥ २ ॥

संकेतः – पारिसंभावयितुं परिपूजयितुम् ॥ २ ॥

अथ तां भ्रमरीमिवाब्जतः परिहीणामनवेत्य हृष्यता ।
स्वहृदा कमलामिवोर्मिला सपदि प्रत्युदियाय सोदराम् ॥ ३ ॥

संकेतः – कमलापि कमलसोदरा ॥ ३ ॥

शिरसाऽलकशोभिना पदे प्रणणामोर्मिलमानसोर्मिला ।
जनकात्मभुवो विधित्सती कमले केचन शैवलांचिते ॥ ४ ॥

संकेतः – पदे कमलोपमे, सालकं शिरश्च शैवलोपमम् ॥४॥

द्वितयं द्वितयेन संगतं लभते स्मानुपमां द्युतिं तयोः ।
अरुणद्युति चूर्णकुन्तलं नखराग्रं च पलाशपेशलम् ॥५॥
श्लथबाहुलताऽऽनिनाय तां भगिनीमन्यमनस्कतां गता ।
उरसि ज्वलिते विदेहजा नलिनीं यद्वदतीव शीतलाम् ॥६॥

संकेतः – अन्यापि या तापमपाचिकीर्षति सा नलिनीं हृदये दधाति ॥६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरटामिव वारिदावली तरला साश्रुजला च सा सती ।
भगिनीं न हि सष्वजे दृढं, क्व विषादे हृदयं प्रवर्त्तते ।।७।।

संकेत:: – वरटा हंसी । वारिदावलीपक्षे अश्रुतुल्येन जलेन सहिता साश्रुजला वारिदावल्यपि हंसजातिं मानसं यावत् सहायितया परिगृह्णन्त्यपि विद्युतमिवाश्लेषबहुमानेन न मानयति ।।७।।

कुसुमास्तरणे कृतस्थितिर्भ्रमरी चेत् करकाभिरर्द्यताम् ।
बिभृयादियमत्र दुष्क्षणे मृदु साम्यं यदि जानकीचिदः ।।८।।

संकेत: – अत्रास्मिन् । मृदु साम्यं न तु पटु साम्यम् । यदीत्यनेन तत्रापि न नितान्तं निर्भरता । तस्यां गर्भकदर्थनाया अभावात् ।। ८ ।।

विदुषी तदनूमिलापि सा स्वसुराधिं मनसोऽभिलक्ष्य तम् ।
भगिनीं विहितार्चनक्रिया मसृणं मंजु च तां व्यजिज्ञपत् ।।९।।

अयि दुर्ललिते! पितुः, प्रभोर्घनसारांजनवर्त्तिके दृशोः ।
किमिति श्रयसे स्वसः श्रियं विधुमूर्त्तिर्नु विभातचन्द्रिकाम् ।।१०।।

संकेत: – विभातचन्द्रिका हि परिम्लानायाः श्रिय उपमानम् ।।१०।।

तव मामपि वीक्ष्य वत्सले! प्रणयश्वेतसरोनिमज्जनात् ।
कथमद्य न पुण्डरीकतां नयनद्वन्द्वमिदं समश्नुते ।।११।।

संकेत: – प्रहर्षाभावस्य पर्यायेणाभिव्यंजनात् पर्यायोक्तमत्र चमत्कृतिनिदानम् ।।११।।

छविशालिनि किं न शीलति प्रणयाब्धिस्तव मद्विलोकने ।
तरलत्वमथोत्तरंगतासचिवं ह्लादमितः पुरा यथा ।।१२।।

संकेत: – विलोकने दर्शने । इतः अस्मात् पूर्वं यथा ।।१२।।

नयनं भ्रमरद्वयं यथा सितपद्माद्वयगात्रयष्टिके! ।
तव मामपि वीक्ष्य निर्भरं वद मातर्वद किं न मोदते ।।१३।।

संकेत: – सितपद्मस्याद्वयो गात्रयष्ट्यां यस्यास्तत्संबुद्धौ । ज्येष्ठाया भगिन्या मातपदेनामन्त्रणमौचित्याविरोधि ।।१३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथमद्य नभोमरालतां दधदप्यम्बुधिदुग्धफेनताम्– ।
अविमुंचदपि क्षपाकृतो वपुरासादितसोदरं न हि ॥१४॥

संकेतः – आसादिता सोदरा पद्मा येन तत् । अत्र सीताया मुखपद्मस्य क्षपाकृद्वपुष्टयाध्यवसायः ॥ १४ ॥

दशनद्वयमेतदद्य ते कुमुदाभं स्मितवत्सलान्मुखात् ।
न निगच्छति, कुन्दकुड्मलं विसपत्नं च कथं विधित्सति ॥१५॥

भवतात् तव शोणिमोत्तरे दशनस्योत्तरवाससि स्वसः! ।
स्मितिशारद–चन्द्रशीतलैर्विशदैरंशुभिरुच्छ्रिता छटा ॥१६॥

संकेतः – शोणिम्ना उत्तरे महिते । दशनस्योत्तरवाससि उत्तरोष्ठे ॥१६॥

शुक एष यथात्र दाडिमं मणिपात्रे विधृतं जिघृक्षतु ।
पृथुकः कलहंससंभवोऽप्ययि कह्लारदलाम्बुविद्रुमम् ॥१७॥

संकेतः – शुक एष इति नासिकाया अध्यवसायः, मणिपात्रेणाधरस्य, दाडिमेन च दन्तद्युतेः । एवमेव कलहंससंभवपृथुकपदार्थेनापि नासिकाया एवाध्यवसायः कह्लारदलेनाधरस्य, अम्बुविद्रुमेण च दन्तस्मितस्य । तदेवमत्रातिशयोक्तिमाला ॥

अपि चामृतसन्निभेन ते वचसा मामशिवेतरं दिशेः ।
भगिनि ऋशिमानमागतैर्मसृणस्निग्धकपोलकुंचितैः ॥१८॥

संकेतः – अशिवेतरं शिवेतरविपरीतम् ॥१८॥

अयि दुर्ललितां किमद्य मां पुनरप्यंशुमता स्वचक्षुषा ।
विकचद्युतिनाम्बुजन्मना नलिनी हंसवधूमिवेक्षसे ॥१९॥

न नभो, जननी न वा मही, न दिशश्चापि तृणाय रोचते ।
सकलेन मुखेन्दुना तव स्फटिकांशुं किरता विना मम ॥२०॥

संकेतः – जननी माता सीताप्रसूत्वात् ॥२०॥

तदलं बहुना, निबोध मां हतधैर्यां, भगिनि! ब्रवीतु सत् ।
प्रणतिप्रवणेषु साधवो विरताभ्यन्तरबाह्यमुद्रणाः ॥२१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति सोर्मिलया विनिद्रया कमलिन्या भ्रमरीव जानकी ।
मुखरत्वमवापिता बलात् प्रणयामोदपरागपुञ्जया ।।२२।।

संकेतः – विनिद्रता जागरूकता, पक्षे च विकासः । प्रणयामोदः प्रणयरूप आमोदः, प्रणय आमोद इवेत्युभयथान्वयः ।।२२।।

अयि साग्रहमानसे ! तव स्पृशतु स्वच्छकपोलमद्य मे ।
किमिव प्रणयाम्बुगर्भितं कदलीपत्रमिवानलः करः ।। २३ ।।

संकेतः – कदलीपदेनात्र सुवर्णकदली ग्राह्या ।। २३ ।।

तव साञ्जनमेतयोर्युगं सरलेऽक्षणोरसिताब्जमित्रयोः ।
किमिवाम्बुपरीतमिन्दिरे रघुवंशस्य विधातुमुत्सहे ।। २४ ।।

संकेतः – रघुवंशस्य इन्दिरा लक्ष्मीः, तत्संबुद्धौ ।। २४ ।।

सुभगे ! प्रतिपत्तिनिष्ठुरो विधिरेव व्यवसाययत्यमूः ।
क्षणमात्रसखीरनर्गला विपथे पान्थमतीः कुतार्किणीः ।। २५ ।।

संकेतः – प्रतिपत्तिनिष्ठुरो निष्ठुरप्रतिपत्तिक इत्यर्थः । क्षणमात्रसखीः क्षणिकत्ववल्लभाः, अस्थिरा असमाहिता इत्यर्थः । पान्थत्वेन लोकयात्रापथिकत्वं ग्राह्यम् ।। २५ ।।

स्मितमंजु परन्तु ते चितिः प्रियचेतोविटपैकवल्लरि !
मधु–मिष्ट–निधीनुपाश्रयेदिति मे प्रार्थयते मनः सदा ।। २६ ।।

संकेतः – स्मितमंजु यथा स्यात् तथा । प्रियो लक्ष्मणरूपः, तस्य चेतो विटपरूपः, तत्रोर्मिला वल्लरीरूपा । वल्लरी च यदि मधुनो मकरन्दस्य मिष्टतां न बिभृयात् तर्हि दुर्भगैव सा भवेत् । उर्मिलायाश्चितिश्च मधुपदेन दाम्पत्यसौभाग्यप्रसूता आनन्दमात्रा ग्राह्या ।। २६ ।।

नवशाद्वलकोमलक्षितौ तव रोमन्थमुखी नवा मृगी ।
रुचये भवतादुदंचितुं प्रियगात्रं निजशृंगघर्षिणी ।। २७ ।।

संकेतः – संप्रयोगसौख्यं तव रुचये भवेदिति पर्यायेणात्र पिशुनितम् ।।२७।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुलिशप्रतिमौ भुजो भुजौ भुजजाते! तव भर्त्तुरग्निवत् ।
विदधान इव स्पृशेत् सदा निजदेशाय च सौभगाय च ॥ २८ ॥

संकेतः – तव भुजस्व भर्तूः भुजौ, हे भुजजाते क्षत्रिये, अग्निवत् अग्नितुल्यौ विदधानः सन् स्पृशेदित्यन्वयः। तस्य च फलं स्वदेशरक्षा, स्वसौभाग्यलाभ-श्चेत्युभयमपीति वीरोचितं वचः ॥ २८ ॥

तनुतां तनुवल्लरी तवाव्यय–भर्तृद्रुम–बाहुमाश्रिता ।
किमपि प्रतिमापरं फलं जगती–मंगल–मूल–मात्मजम् ॥ २९ ॥

संकेतः – आत्मजमेव फलमिति संबन्धः। लताया अपि फलमात्मजमेव ।२९।

अहमस्मि न साम्प्रतं स्वसो रविवंशस्य वधूः परात्परा ।
अधुनास्मि वराटचेटिका भुवनस्यास्य पुनर्वनेचरी ॥ ३० ॥
स्वसुरेवमुदीर्यमाणया नववाचाऽभवदूर्मिलोर्मिला ।
उपदेशगिरो वयस्ययोर्न हि ताटस्थ्यमृते भवन्ति यत् ॥ ३१ ॥

संकेतः – नवत्वमिदंप्रथमतया श्रूयमाणत्वात् उर्मिला तरंगवती शंकातरलेति यावत् ॥ ३१ ॥

अथ तामवदद् विपद्भयात् तरलान्तःकरणा लघुः स्वसा ।
क्रियते मुखरा प्रभंजनान्न पिका नो यदि शस्यते लता ॥ ३२ ॥
कथययस्व निबोधयस्व मामयि मे शैशवसंगिनि स्वसः ।
विपदा नु कया तिरस्कृतं तव चेतःकुसुमं विभाव्यते ॥ ३३ ॥
कतरत् तव पायसोपमे दधिविप्रुट् शिवजीविते स्वसः ।
कुत आपतताः कुतःपुर्नविधिरास्ते विपरीततां गतः ॥ ३४ ॥
अथ यावदियं प्रसादनप्रणतिं तत्पदपद्मयोर्व्यधात् ।
श्रुतकीर्तिरथात्र माण्डवी, द्रुतमाजग्मतुरङ्घ्रिपंकजैः ॥ ३५ ॥
प्रिययोर्मुखपुण्डरीकतः श्रुतवृत्तं भगिनीद्वयं तु तत् ।
अकरोत् तदनूर्मिलामपि प्रतिपन्नामतिर्मूच्छितान्तराम् ॥ ३६ ॥

संकेतः – प्रतिपन्नामवगतार्थाम् ॥ ३६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ सा निमिवंशजासमिद् वचसां शोधयति स्म पद्धतिम् ।
विवृतैर्ललिताननाधरैर्मधुरैर्योगमवाप्य तस्थुषीम् ॥ ३७ ॥

समजेषु निरर्गलेष्वपि श्रयते निर्घृणता न तां प्रथाम् ।
श्रयते मनुजेषु यां, खगाः किमु नो नीडकृतः प्रजाकृते ॥ ३८ ॥

अवला प्रथमं ततो वधूः परिणीताथ निषेकपाकभृत् ।
अपि चेन्दुमयूखनिर्मला विबुधैर्हन्त तथापि हीयते ॥ ३९ ॥

अपि मुद्रयितुं जनाननं स्वसती—त्यागविधिः किमौचिती ।
नियतं विधुमूर्त्तिमप्यसावनृतांकां न कदापि सेवताम् ॥ ४० ॥

यदि लोकमतेन केवलं क्रियतां धर्मविनिर्णयो बुधैः ।
तदधर्म इनि श्रवस्तपा श्रुतिरेवास्तु निघण्टनिःसृता ॥४१॥

संकेतः – श्रवः श्रोत्रम्, तत् तापयतीति । निघण्टात् कोशात् निःसृता निष्कासिता ॥ ४१ ॥

ऋतमेकमुपासितुं जने यतमानेऽनृतभाषिणः शतम् ।
उदिते रविमण्डलेऽन्यथा प्रलपन्तो न न कौशिकोपमाः ॥ ४२ ॥

संकेतः – शतं शतसंख्याकाः । कौशिको घूकः ॥४२॥

अयि मातरुदस्यतां त्वया जनकोपे प्रतिकोप ईदृशः ।
न हि कुक्कुरधिक्कृतौ गजो बुधवन्द्यो भजति प्रतिक्रियाय् ॥ ४३ ॥

तव साहसमीदृशं स्वसो नियतं वन्द्यमथापि नः कृते ।
प्रसवावधि केवलं त्वया क्रम एष व्यपनीयतां यदि ॥ ४४ ॥

क्व ममत्वमयी गुरुः स्वसा क्व वनान्ताः क्व दशा तवेदृशी ।
क्रकचान्नलिनीं सुपुष्पिणीं वद चेद् दारयितुं क्षमं यदि ॥ ४५ ॥

कियती ननु रे विडम्बना नियतेर्मानवदेहधारिणाम् ।
शतचक्रतयाऽद्य यावदाः शिरसि प्रोद्भ्रमति प्रमाथिनी ॥४६॥

क्रियतां परमत्र किं जनैः कटुसामाजिकरीतिभीषितैः ।
हृदय–द्रविणेऽथ दुर्विधैर्यदि न प्रत्ययभूमिकार्च्यते ॥४७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदि विश्वसनस्य भूमिकामुपरिष्टाच्च मनुष्यभावनाम् ।
अधिकृत्य न संप्रवर्त्यते न समाजः स छलं हि तन्महत् ।।४८।।

संकेतः – विरामापेक्षया "स छलम्" इत्यत्र तुगभावः ।। ४८ ।।

परमार्थविचारणेऽत्र चेत् सदसन्नीररजोविवेचिनीम् ।
कतकोपमितां मतिं महान् भजतां, मानवता कृतक्रिया ।।४९।।

श्रुतमस्ति न वंशदारणो भ्रमरः पंकजकोषमिच्छति – ।
रसपायिभिरात्मनः करैरपकर्त्तुं, पटुरत्र मानवः ।।५०।।

अलमत्र भृशं प्रलप्य, ते चरणावंगुलि–निर्गत–द्युती ।
तमसामपनुत्तये चिदः श्रयतां नः परिसेव्यतां स्वसः ।।५१।।

वयमप्यनिषिद्धनिर्गमा भवतीमत्र विहातुमक्षमाः ।
गृहवद् वनमप्यसौ समं निमिकन्यासमितिः सुखं व्रजेत् ।।५२।।

यश एव यदीन्द्रियार्थतः प्रगुणं तत्कृतमत्र वैभवैः ।
ननु भारतभूमिरस्ति नः सकला सूः शरणं च सर्वदा ।। ५३ ।।

पुरुषः पुरुषार्थचत्वरे पदवीं ज्ञातुमितोऽभिलष्यति ।
महिला समयं परीक्ष्य तां दिशतीत्येवमुभौ महाव्रतौ ।।५४।।

द्वयतापरिधेर्विमोक्षणादथवा लोकविपर्ययादपि ।
पुरुषः प्रमदासखः क्षमो जनताध्वान्तमपोहितुं स्वसः ।।५५।।

प्रमदाप्यथ मानवं श्रिता सदशं दीपमिव प्रभा तमीम् ।
परिवर्त्तयितुं प्रगल्भते जगतीमानसकल्मषं भृशम् ।।५६।।

पुरुषः स्थितिमीदृशीं यदि प्रतिहन्तुं क्रमते स्वतस्ततः ।
अबला प्रबलात्वमीयुषी किमु न स्याज्जगती–शिवेच्छया ।।५७।।

संकेतः – समयः कालः, शास्त्रस्थितिश्च ।। ५४ ।। विपर्ययः परिवर्त्तनम्, न तु प्रलयः ।।५५।। दशा वर्त्तिः ।।५६।। स्थितिः मर्यादा । जगतीशिवम् विश्वकल्याणम् ।। ५७ ।।

तदलं विचिकित्सयाऽऽज्ञया परमेताः परिवर्धयस्व नः ।
विपिने निजकुक्षिजन्मभिः सममेता वयमप्यटाम यत् ।।५८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृषती पृषतीदृशस्तव स्पृशतु स्वङ्घ्रितलं रसज्ञया ।
अथ दूरयितुं व्यथां स्वसः शिशवोऽस्याश्चपलैस्तथेक्षितैः ।।५९।।

संकेतः – पृषती हरिणी। शोभनं च तद् अंघ्रितलम् । रसज्ञा जिह्वा ।।५९।।

धवलैः खग–पक्षतेः पुटैः प्रचयैश्चापि दलस्य भूरुहाम् ।
शुकपक्षविमिश्रितं भवेच्छयनीयं तव कोमलं वने ।। ६० ।।

संकेतः – पक्षतिः पक्षमूलम् । एवमेव दलस्यत्यत्रापि । तत्र पक्षपुटैर्धवलत्वम्, शुकपक्षैश्च नीलहरितत्वमिति शयनीयगतमनेकवर्णोत्तरच्छदत्वमुत्प्रेक्ष्यम् ।६०।

तव नेत्रजलं मनोव्यथार्जनितं मानिनि ! पेशलाशया ।
अटवी हरितां शिरःस्थितैर्नवनीहारकणैर्विडम्बयेत् ।।६१।।

संकेतः – एतेन प्रकृतेः समदुःखत्वं सूचितम् ।।६१।।

कलवादिनि ! देववाहिनीपुलिनश्वेतमरालसन्ततेः ।
चलितेषु मनागपि स्थिरा तव रम्येषु कनीनिका भवेत् ।।६२।।
अपि नाम कुहूनिशा विभामयतां यातु सुखेन्दुना तव ।
न भवन्तु यथोत्पलाकराः शितिपक्षेष्वपि मुद्रिताननाः ।।६३।।
तव वत्सलमंचलं स्मितैः सितिमानं विकिरिद्भरार्जवात् ।
विकचाम्बुरुहेक्षणाः क्षणं न हरिण्यश्चलयन्तु नाननैः ।।६४।।
अपि सोदरभावभावितादटवीशाखिगणाद् फलग्रहैः ।
वयमप्यनुभूतकानना भवितास्मो भवतीपदार्चनात् ।।६५।।

संकेतः – फलग्रहैः भवतीपदार्चनादित्यन्वयः ।।६५।।

विसृजेदिदमुग्रवेदनं प्रणिधायाश्मचयस्य मानसम् ।
शतशः कलनादमिश्रितं विपिने प्रस्रवणाः ततस्ततः ।।६६।।
ऋषिशोणितसंभवाथ सा सबलेन स्वहृदा स्वविप्रियम् ।
विषमात्मजनोदितामृतैः शमितप्रख्यमवोचदुज्झती ।।६७।।

संकेतः– स्वाविप्रियमेव विषम् ।।६७।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिदेवनाविलमनोभिरेव मे प्रियकांक्षिणीभिरपि यद् विचारितम् ।
यदपि स्थितिं तदपि रक्षयत् स्थितं, गृहमेधितास्तु परमा परन्तु वः ।।६८।।

प्रियशतमवदन् यदप्यमुष्या व्यसनकृशा, न हि जानकी तथापि ।
अनुसृतिमनुमोदितुं स्वसॄणामलमभवद् गुरवो निजार्थबाह्याः ।।६९।।

संकेतः – प्रियशतवदनक्रियायां व्यसनकृशपदार्थभूतानां स्वसॄणां कर्तृत्वेनान्वयः ।।६९।।

अपकृतिमभिलष्यति प्रियस्य प्रणयिजनो नहि कृच्छ्रगोपि यस्मात् ।
रघुकुलसुखसंपदां समृद्धयै निजभगिनीररुणद् गृहाय सीता ।।७०।।

अथ दिवसविरमाशंसिनि ध्वान्तपुंजे
पटहपटुनिनादैः सार्धमुज्जृम्भमाणे ।
भुवनविवरतुल्यं राजपुंसां मनांसि
विशति च भुजगांशः स्यन्दनं संयुयोज ।।७१।।

संकेतः – राजपुरुषमनोवेशक्रियाकर्तृतया विवक्षितं ध्वान्तं शोकरूपम्-भुजगांशः लक्ष्मणः ।।७१।।

अथ श्रियमिवोल्वणा विपद,–पामिव स्वच्छता–
मकालपवनः, कुहूर्विधुकलामिवानाविलाम् ।
विदेहतनयां महामुनितपःप्रसूतां शुभां
विशुद्धिमिव मानसीं तिरयदाः कठोरं जगत् ।।७२।।

इति सनातनोपाह्व–श्रीमद्–रेवाप्रसादद्विवेदिकृतौ "सीताचरित" नाम्नि
सर्गबन्धे साकेतपरित्यागो नाम
चतुर्थः सर्गः ।। ४ ।।

—★—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चमः सर्गः

सौमित्री रघुकुलकेतुपट्टिकां तामुत्सृज्य स्थितमिव दण्डमात्रमेकम् ।
रामाख्यं शुभमवदातमार्यधर्ममर्यादापरिघमियाय काननान्तात् ॥१॥

अत्रैषा हिमकणसन्तते द्युनद्याः सत्पात्रे पदजलजातमर्पयन्ती ।
प्रत्यूषे चलनयनं मृगीभिरह्नो वैभाती द्युतिरिव जानकी लुलोके ॥२॥

संकेतः – द्युनद्या गंगायाः । शोभनं च तत् पात्रं तटान्तर्भूः सत्पात्रम् ॥२॥

सात्यच्छं जलमिव सिन्धवे द्युसिन्धू रामाय प्रणयपरीतमेव सीता ।
स्वं भावं विकचमिवाब्जमाश्रयन्ती वैभाती रुचिरिव भास्कराय रेजे ॥३॥

संकेतः – भावोन्तःकरणम् । प्रकृतोभयनिष्ठोपमा ॥३॥

वैदेही त्रिभुवनरक्षकस्य भर्त्तुर्निष्ठ्यूतं ज्वलदिव बिभ्रती महौजः ।
ऊषा च स्थगितदिवाकरा स्वगर्भे भ्रेजाते युगपदिलातलं स्पृशन्त्यौ ॥४॥

मांजिष्ठीकृतमनुरागमात्मभर्त्रे प्रत्यूषेऽरुणरुचिभिर्विभासयन्ती ।
जाह्नव्याः सितसिकते तटप्रदेशे चक्रस्त्रीसमसुखशीलतामवाप ॥५॥

संकेतः – चक्रस्य चक्रवाकस्य स्त्री चक्रवाकी ॥५॥

मुग्धाक्षी, क्व नु खलु यानि काननेस्मिन् किं तावच्छरणमवाप्स्यते हतायै ।
इत्येषा रघुकुलभास्करस्य पत्नी ध्यायन्ती सुरसरितं पदैः पुपाव ॥६॥

संकेतः – सुरसरितं पदैः पुपाव चलितु प्रचक्रम इति यावत् ॥६॥

नृणामाः प्रविकचचेतनाशिखानामुत्संगः प्रकृतिविनिर्मितोपि लौल्यात् ।
संकीर्णः समजनि पक्षिसन्ततीनां मुक्तानामिव बत पंजरप्रदेशः ॥७॥

तेनासौ कतिपयभित्तिभिर्निबद्धे गेहाख्ये वियति निवासमेव वासम्- ।
मन्वानः श्रयति नु दासताममुष्य व्याकीर्णं भुवनमिदं करोति न स्वम् ॥८॥

संकेतः – आदिमानवस्य कदाचिदियमेव भावना स्यात् ॥८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्त्येते जनपदसोदरेषु वन्या दंधन्या उटजतलेषु ये महान्तम् ।
संतोषं प्रतिपदमाप्नुवन्ति, दिव्यैः संस्कारैः श्रमजनिते स्वतां श्रयन्ति ।।९।।

संकेतः – धान्यार्थकाद् धनधातोर्यङि "धनगणं लब्धे" – [४।४।८४] – ति-पाणिनीयेन शासनेन यति सति दंधन्यपदं नासाधु ।।९।।

धिक् कोयं निजरुचिनामको जनानां विश्वस्मिन् मनसिशयोस्ति भेदहेतुः ।
येनेदं जगदखिलं समुद्रशैल–नद्याद्यैः शकलितमेकतां न याति ।।१०।।

एते ये भुवनतले चितेर्विकासा दृश्यन्ते निपुणतरं विभिद्यमानाः ।
सर्वैस्तैः सहचरसोदरैः समेता भ्राम्यामः, किमिति वियोगमाप्नवाम ।११।

तातो मे जनक उदाहृतो जगत्या माता मे नृभुवनसूरियं धरित्री ।
भर्त्ता मे युगपुरुषोऽन्तरात्मभूतः, किं तद् यद् भवतु ममापि कापि सीमा।१२।

व्यूहोऽयं परिमितिगोचरोऽपि सर्वो निस्सीमं ध्रुवमभिकांक्षति प्रवेष्टुम् ।
वाहिन्याः जलमिव सागरं, न तस्मात् संकोचं विबुधजनाः समाश्रयन्ति।१३।

मानुष्यं वपुरधिगम्य यस्तु तत्त्वं निर्देष्टुं प्रभवति नापि वीक्षितुं स्वम् ।
मात्राभिर्विघटितचक्षुषस्तु तस्य सर्वत्र प्रसरति नाग्रतो न रात्रिः ।।१४।।

संकेतः – मात्राभिः शब्दादिभिर्विषयैः ।।१४।।

इत्येवं परिणतदोहदालसा सा संन्यस्ता विपिनचरीव संभ्रमन्ती ।
आत्मानं कथमपि भावभूमिकाभी रक्षन्ती परिसरभूमिमाजगाम ।१५।

तत्रैषा गहनलतास्वभावकीर्णपुष्पौघक्षपितकठोरतं निकुंजम् ।
आवासं मनसि चकार पक्षिगीतैः स्फीताक्षैर्मृगशिशुभिश्च हृष्टभावा ।१६।

तत्रास्याः शुचिमुखचन्द्रदिव्यकान्तिलुप्तान्धं किसलयपुंजमुत्प्रवालम् ।
भैभाग्यादवहत सप्रसूनपातं वैतानीं शबलितभद्रपीठशोभाम् ।।१७।।

संकेतः – भद्रपीठं राजसिंहासनम् । तस्योपरि यद् वितानम् तस्य शोभामनेकवर्णत्वात् तल्लक्ष्मीम्, अवहत धारयामास । अत्यक्तरागं विकसितं पत्रं किसलयम्, तथाविधमेवोद्भिद्यमानमंकुरात्मकं तत् प्रवालमिति भेदः ।।१७।।

यत् तस्या व्रततिवनाधिदेवताभिर्दोर्ह्य सकुसुमपातमालुलोके ।
तज्जातं च्युतमकरन्दरेणु पूर्वं भावार्घ्यं, तदनु च पुष्पतल्पमस्यै ।।१८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तां तस्मिन् मधुरसरूषितो लतानां तन्वीनां प्रशिथिलवृन्ततः पतन्तम् ।
व्याकीर्य प्रसवमसेवत द्रुमाणां मार्गे वै शिशुरिव तद्वनान्तवायुः ॥१९॥

वल्लर्यो मरुति चले मिलद्भिरस्यै पत्राद्यैः करपुटमंजलिं बबन्धुः ।
कासांचित् प्रकृतिरपि स्वतः सपर्यां व्यक्तीनां जगति चिकीर्षति प्रभावैः ।२०

संकेतः – करपुटमेवांजलिं बबन्धुरित्यन्वयः ॥२०॥

नैसर्गो नियम इति प्रकृष्टभावाप्येषाऽऽस प्रणयशमी हि तत्र भर्त्रे ।
येनास्याः सकृद,–पि सप्रकाशमार्यं शोकाग्नेर्विकणिकयाप्यदूयतान्तः ।२१।

संकेत :– सीतायाः शमीत्वेन प्रणयस्य तद्गर्भस्थिताग्नित्वमाक्षिप्तम् ॥२१॥

ज्ञानाख्ये मणिमयधाम्नि चित्तभूमौ
सस्नेहो मृदुतमभावनादशावान् ।
शोकाख्यां ज्वलनशिखामवाप्य दीप्रो
दीपो यः स हि जगतीह दुर्निवारः ॥ २२ ॥

संकेतः – चित्तभूमिः भूमिकारूपा, तत्र ज्ञानं मणिमयसौधरूपम्, तत्र स्नेहमेव तैलादिरूपं स्नेहम्, म्रदिष्ठभावनामेव दशां वर्त्तिकाम्, शोकरूपां च ज्वलनशिखामवाप्य यो दीपो दीप्यते स कुतो नु निवार्येतेति हृदयम् ॥ २२ ॥

वैदेही कुवलसोदरेऽक्षियुग्मे शोकाश्रूंस्तुहिनकणानिव श्रयन्ती ।
पार्श्वीयाश्चलदलवल्लरीः प्रसूनं वर्षन्तीरनुशयतापतश्चकार ॥ २३ ॥

या पूर्वं शशिविशदां तनुं श्रयन्ती पीयूषद्रवमिव चक्षुषोरसिंचत् ।
तच्छोकोऽञ्चलचलनोहितस्तदानीं सर्वेषां नयनजलैर्बभूव सिक्तः ।।२४।।

संकेतः – अञ्चलपदेन स्तनौ विवक्षितौ, "आंचरे"- ति भाषायां तथाप्रचारात्। ऊहितस्तर्कितः । शोकस्य स्वशब्दवाच्यतात्र न दोषः, तस्यात्र स्थायितयाऽविवक्षणात् । यस्य चात्र तथा विवक्षा स हि प्रकृतिगतः कारुण्यात्मा भावः । न चासौ वाच्यः । अत एव भरतेन रससूत्रे स्थायी नोल्लिख्यते ।।२४।।

वामोऽस्या विधिरपि मार्गितुं प्रवृत्तश्छिद्राणि,प्रसवनिकारमुत्प्रसूय ।
तत्कालं स्वनजनितव्यथां मरालीमुत्पाद्याशनिमिव वारिदोऽभ्यवर्षत् ।२५।

संकेतः – प्रसवनिकारमुत्प्रसूयाभ्यवर्षदिति मुख्योर्थः ।।२५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालेऽस्मिञ्छ्रुतिसुखकूजितेष्वसक्तान् विच्छायद्रुमतलराविणो विहंगान् ।
संपश्यन्नचटुलशावका मृगीश्च वाल्मीकिः कविरतिविक्लवो बभूव ।२६।

संकेतः – द्रुमाणां विच्छायत्वमपि प्रकृतिसमदुःखताप्रयुक्तमुन्नेयम् ।।२६।।

मानुष्ये वपुषि महात्मतां दुहानस्तत्कालं समुदयमाप कोऽपि रश्मिः ।
हृद्देशे सलिलनिधाविवोर्मिरार्षे सत्त्वानामपकृतिसंशयं विवृण्वन् ।।२७।।

संकेतः – "भंगस्तरंग ऊर्मिर्वा स्त्रियामि"– त्यमरवचनात् ऊर्मिरपि पुंल्लिगः ।। २७ ।।

भावानामनयनगोचरं रहस्यं संपश्यन्नुटजमुखेऽर्धदत्तपादः ।
वाल्मीकिः सवनविधिं समर्प्य शिष्ये जाह्नव्यास्तटभुवमाप्तुमुच्चचाल ।२८

साम्राज्यं समजसमाजगं सवित्री मानुष्यं सहृदयसंज्ञिका प्रवृत्तिः ।
संकेतैस्तरुमृगपक्षिभिः प्रदत्तैः साहस्रीमलभत मूर्त्तिमादिसूरौ ।।२९।।

सत्यं भो, नियतिरितीरिता श्रुतज्ञैः काप्येका भ्रमयति देहिनो विपत्सु ।
यच्चक्रं विगलितपल्लवासु दोषास्पृष्टासु व्रततिषु लक्ष्यते प्रकाशम् ।३०।

बोधाख्यज्वलनशिखेव कापि सूरिर्वेवेक्ति स्वपरमनोगतान् स भावान् ।
तद्दृष्टौ जड इति चेतनेति भेदः कार्पण्यात् प्रकृतिकृतान्न सिद्धिमेति ।३१।

संकेतः – किं तावत् सूरित्वमिति प्रश्न उच्यते "कापि बोधाख्यज्वलनशिखेव सूरि"– रिति । स सूरिः सर्वमनोगतान् भावान् वेवेक्ति भृशं विनक्ति पृथक्तया वेत्तीत्यर्थः, विचिर् पृथग्भावे, ततो यङि लटि रूपम् । प्रकृतिकृतात् कार्पण्यात् योयं जडचेतनात्मा भेदः स सूरिदृशि न सिद्ध्यतीत्येका योजना, जडचेतनात्मा भेदः प्रकृतिकृतात् कार्पण्यात् सिद्धिं नेतीति द्वितीया । तत्र सूरिपक्षे कार्पण्यं भावकतातिशयः ।।३१।।

वल्मीकं कृमिजनितं स्वसिद्धिहेतुमाचार्यं स तु मनुते न भूतिमात्रम् ।
विश्वस्मिन् कविरिति संज्ञितः परां तां वाग्रूपां हृदयनदीं य उज्जीगीर्षुः ।
आर्योऽसौ हृतहृदयस्ततस्तदानीं वैक्लव्यात् स्खलितपदो यथाकथंचित् ।
आरण्यान् द्रुमतृणवल्लरीसमूहान् संपृच्छन्नचलदनामयप्रवृत्तिम् ।।३३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेऽप्यस्मै स्वपरविभेदवर्जिताय शाखाभिः कलरवमंजुभिश्चलाभिः ।
मर्यादां प्रकृतिकृतां निवाहयन्तः स्वोद्गारान् मुनिवदुदीरयाम्बभूवुः ।३४।

संकेतः – मुनयोपि मौनेनापि स्वोद्गारमुदीरयितुं क्रमन्ते, तद्वत् तरवोपि ।।३४।।

मुनिस्ततः स्वच्छजलान् जलाशयान् हृदः स्वकीयस्य सहोदरोपमान् ।
विभूतिमाद्यां प्रकृतेर्विलोकयन्नुपागमत् तां सरितं जगच्छुभाम् ।।३५।।

संकेतः – प्रकृतेराद्या विभूतिर्जलमेव, "अप एव ससर्जादावि"-ति स्मृतेः ।३५।

शतैः सहस्रैश्च युगैस्तपस्विनो भगीरथस्यार्यमतेर्जगत्त्रये ।
जगच्छिवां कर्मठतां वितन्वतीं शरीरिणां दैवतभावभूमिकाम् ।।३६।।

निजाक्षिबिम्बैर्यमुनामलाम्भसा विमिश्रतोयामिव संविधित्सुभिः ।
पिपासितैरेणचयैरुपासितां सुवं यथार्त्तैः पृथुकैरितस्ततः ।।३७।।

स हंसकारण्डवकेलिनिर्भरां प्रसन्नतोयां सितशर्करां च ताम् ।
उपान्तवानीरनिकुंजनिर्गतैरुपास्यमानां पतगैरवैक्षत ।।३८।।

अवासयष्टिः पुलिने परिभ्रमञ्छिखिव्रजो बन्धुरगात्रयष्टिभिः ।
अनाययद् यां परभागसौभगं स्थलीं वदातामिव रंगवल्लिभिः ।।३९।।

संकेतः – "परभागो गुणोत्कर्षः" इति वचनात् वर्णान्तरव्यतिकराज्जायमानं वर्णान्तरं परभागः । स च रंगवल्ल्युपमया गतार्थः ।।३९।।

प्रसन्नतोयां सरितं विलोक्य तां स शान्तचेताः स्थिरतामवापत ।
भवन्ति तीर्थानि शुभाशुभं प्रति प्रसादसौम्या मुकुरा महात्मनाम् ।।४०।।

वनान्तवायुः पटुमर्मरैः स्वरैः प्रपूर्य वेणून् सुषिरेषु तत्क्षणम् ।
प्रवाद्य तालाँश्च चकार गीतिमन्मुनिं समन्तादथ वायुमण्डलम् ।।४१।।

संकेतः – मुनिं समन्तात् परितः । वायुमण्डलमिति लोकप्रचलितं पदम् ।।४१।।

वनस्थलीदैवतगीतिरीतिभिस्तथोच्चवृक्षच्युतपुष्पराशिभिः ।
दिशां चयं भूमितलं च सर्वतः कविः स साक्षादकरोत् प्रपूरितम् ।।४२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यचारयत् सोऽथ नवं पुरातनं पुरातनं किं च नवं विभाव्यते ।
अवश्यमेवात्र परोक्षविग्रहा प्रवर्त्तते क्रान्तिरुपात्तसंक्रमा ।।४३।।

किमित्ययं प्राकृतिकः क्रमो झटित्यपास्य वेषं प्रथमं शुचाञ्चितम् ।
नवं ममैवात्र पुरः प्रपश्यतो बिभर्त्ति हर्षान्नटनो यथा, वने ।।४४।।

इदं विचारादपि वर्त्तते परं पटैः क एतास्तरुवल्लरीः स्थलीः ।
पिशंगपीतैर्नवनीलमेदुरैरचित्रयत् कस्य कृते महात्मनः ।।४५।।

इतः प्रभालेपिषु केसरद्रुमेष्वहो वदातद्युतिपुष्पमौक्तिकैः ।
स्थले स्थले यामुनगांगसंगमप्रभंगिमा किं नु निशाम्यते वने ।।४६।।

संकेतः – केसरा बकुला मौलिश्रीवृक्षाः । यामुनं गांगं चेति तज्जलपरम् ततो न पौनरुक्त्यम् ।।४६।।

द्रुमोत्पलैः काननदेवताशिरःसुशोभितैर्मेदुरिता वनस्थली ।
कथं नु दृष्टि भ्रमरावलीसखीं करोत्यकाण्डे मकरन्दनिर्भरैः ।। ४७ ।।

संकेतः – द्रुमोत्पलः कर्णिकारः, अमलतासेतिनाम्ना व्यपदिश्यमानः । कर्णिकारेषु मकरन्दः शून्यप्राय एव भवति तथापि तन्निर्भरतात्र लोकोत्तरत्वाय साधुरेव ।।४७।।

स्थले स्थलेऽशोकपलाशमल्लिकाप्रसूनपुंजैः सितरक्तपीतकैः ।
चतुष्कभंग्या पतितैः कथं स्थली सपत्रपंक्तिः प्रमदेव रोचते ।। ४८ ।।

इमानि किं स्नानजलानि सैकतं विलंघ्य किंचित् प्रसृतानि पुष्पकैः ।
परागगन्धैश्छुरितानि सर्वतो विभान्ति पानानि यथा वनौकसाम् ।।४९।।

दिशस्सु किं कश्चन मंगलध्वनिर्ध्वनत्यपूर्वस्वरसाधुतामयः ।
तृणानि कृत्स्नान्यपि केसरद्युतिं कुसुंभगन्धांश्च किरन्ति सादरम् ।।५०।।

वनान्तवायुर्द्रुमपर्णसंहतीर्विभेद्य पुष्पासवसेवनोन्मदः ।
स्वयं नटत्यार्जवशालिनीस्तथा किमित्ययं नाटयते च वल्लरीः ।।५१।।

कथं च भृंगावलिमत्र संभ्रमात् सरस्वतीपाणिकुशेशयेरिताम् ।
समन्त्रतन्त्रीमिव मूर्च्छयन्त्यमूर्दिशः पलाशप्रसवारुणाननाः ।। ५२ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं पिकानां सहकारमंजरीकषायकण्ठोद्भविनी च किंकृते ।
नवांगनानामिव गीतिपद्धती रुतिः समुच्छ्वासयतीव काननम् ।। ५३ ।।

कुरंगनाभीसुरभीकृतास्तथा दिशां कपोलाः कथमाश्चकासति ।
विनिर्मितं कस्य कृते च कुंकुमद्रवैरिदं व्योमसरो महौजसः ।। ५४ ।।

प्रियंगुरेषा सहकारकस्तथा प्ररूढपत्रौ च परागिणौ च यौ ।
द्विजांगना मंगलगीतिभिः कुतः प्रमोदतः संगमयन्ति ताविमौ ।। ५५ ।।

इयं च मे दन्तुरिता स्वकुड्मलैः प्रतिप्रतानं वनमल्लिका सितैः ।
नवा वधूटीव नतांगगौरवा करोति दृष्टिं वशवर्तिनीं कथम् ।। ५६ ।।

गतेष्वुरेवेयमहो मृगी कुशं ममैव पाणिस्थितमाजिहीर्षत ।
विहाय तच्चापलमुन्मदां गतिं मदातिरेकेण बिभर्त्ति साद्य किम् ।।५७।।

प्रसूनरेणुः किमु शक्रचापतामवाप्यते व्योम्नि लताप्रतानकैः ।
अवश्यमस्मिन् पटमण्डपे क्वचित् क्लमच्छिदां कोपि महाभटोऽश्नुते ।५८।

अरण्यमेवं श्रितभिन्नभूमिकं निशाम्य कृत्वा च मनस्तथाविधम् ।
शरत्सरो हंस इव प्रसन्नधीर्निमीलिताक्षः स समाधिमाययौ ।। ५९ ।।

संकेतः – तथाविधमरण्यसदृशं भिन्नभूमिकमित्यर्थः ।।५९।।

कविः समाधिं गमितः स्वमानसे विवेकबीजाद् यमवापदंकुरम् ।
दुदोह भूतार्थमहौषधिं ततो, न योगभूमौ प्रथते परोक्षता ।।६०।।

संकेतः – तत इति द्वितीयार्थे तसिः, तस्य सार्वविभक्तिकत्वात् । अपरोक्षतेति छेदे नेति प्रश्ने ।।६०।।

स खलु विमलमेधः सूरिराद्यः समाधौ
जनहृदयविकारात् काननं सेवमानाम् ।
फलितसुतयुगां तां जानकीं भारतीयै-
र्व्रततिततिमरुद्भिः सेव्यमानामपश्यत् ।।६१।।

विलोक्य तं क्रौञ्चवधं तदक्षिणी तथा च सीतापरिरक्षणं वने ।
बभूवतुर्मानुष-मानुषेतर-द्वये विवेकद्युतिभिर्विकस्वरे ।।६२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततः स्वतो निश्चितिपीठमाश्रितः कविः स्वकर्त्तव्यपथे महामतिः ।
अकम्पपादं चलितो मनस्विनीमुपेयिवांस्तां वनदेवतासखीम् ।।६३।।

संकेतः – स्वतो न तु परप्रेरणया । अकम्पपादं यथा स्यात् तथा चलितः, दृढतया चलितः, न तु विचिकित्सयेति भावः । सेयं कवेः सक्रियता ।।६३।।

स कैश्चिदाभास्वरसौम्यलोचनद्वयारविन्दारुणरश्मिभिः कविः ।
स्थलेऽत्र पिष्टातकमुत्क्षिपन्निव व्यभासतास्यै च सुतद्वयाय च ।।६४।।

संकेतः – अन्योपि प्रियजनस्य स्वागताय गुलालादिपदवाच्यं पटवासपिष्टातकादीनि द्रव्याणि व्योम्नि क्षिपति ।।६४।।

अभिनवजनिताभ्यामोजसा वेष्टिताभ्या-
मिह यमलसुताभ्यां सार्धमेतां स सूरिः ।
जगति निजमहिम्ना सूर्यवंशं प्रभात-
द्युतिमिव गमयन्तीं सत्प्रतिष्ठां ददर्श ।।६५।।

संकेतः – यमलौ सहजौ ।।६५।।

जनकदुहितुरस्या मंगलां कायकान्ति
प्रजननसमयेपि स्वर्णवर्णां पुरीव– ।
विपिनपरिसरेऽपि प्रेक्ष्य तुष्टः स जातो
जयति हि निजराष्ट्रस्वास्थ्यमेवार्षदृष्टौ ।।६६।।

संकेतः – 'स्वस्थे नारीदेहे नागाभूमौ यथा प्रसूतिभ्यः, भवति न कोपि विकारो राष्ट्रस्वास्थ्यं हि तेन लक्ष्येत' ।।६६।।

मुनिरपि जगदम्बाज्योतिषि स्नातचेता
विमलमतितटीकस्तत्क्षणं हन्त जातः ।
न हि विघटनमूलं प्रातिभं ज्योतिरार्षे
प्रभवति शिवचित्ते प्रेतशूलं यथैव ।।६७।।

संकेतः – जगदम्बाज्योतिः मातृशक्तिप्रकाशः । सा च शक्तिः रचनात्मिका । तद्दर्शनमेवार्षप्रतिभाकर्म । तत्र प्रेतशूलं यथा विघटनात्मकं दर्शनं नोदेति, न च प्रसरति ।।६७।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रघुपतिदयितापि स्वान्तरात्मानुकारं
विमलिमपरिवीतं तं विलोक्यादिसूरिम् ।
अतिधृतिभिररण्यस्याधिदेवीभिरर्चां
व्यधित कुसुममाध्वीं पत्रपात्रे निधाय ।। ६८ ।।

संकेतः – अतिधृतिभिरिति तासां परविपदि सेवाधर्मित्वमागूरितम् । पत्रपात्रं द्रोणम् । माध्वीमिति मधुपर्कव्यंजकम् । वनदेवीभिरिति स्वाशुचित्वपैशुन्याय ।।६८।।

व्रततिविटपिनश्च प्राच्यदेशस्य शिष्या
इव विनयपरीतास्तत्कवेरङ्घ्रितीर्थे ।
मृदुविपिनमरुद्भिः पुष्पवृष्टिं विधाय
विदधुरिव सपर्यामन्तरात्मप्रवृत्ताम् ।। ६९ ।।

संकेतः – अन्तरात्मप्रवृत्तां न तु बलादापादिताम्, अयमेव हि भारतीयानां शिष्याणां विशेषः ।।६९।।

पूजामेतां कविरपि महान् स प्रतीच्छ्य प्रसीद–
न्नन्तर्वाणीं बहिरुगतामन्ववादीदितीव ।
पुत्रि ! स्वस्ति स्पृशतु चरणस्ते भुवं नः सुताभ्यां
राष्ट्रार्पात्तिं क्षपयितुमिमे निर्मिता आश्रमा नः ।। ७० ।।

संकेतः – चरणपदेनाचारोपि, भूपदेन च भूमिकापि गम्येत । सुताभ्यामिति सहयोगे तृतीया ।।७०।।

आज्ञामेतां जनकतनयाप्यादधानाशु मूर्ध्नि
वन्यद्वन्द्वैर्विधृततनया जाह्नवीं तां प्रणम्य ।
सिक्ते सूरेस्तरुणकरुणैः पावनैर्दृष्टिपातै–
र्मार्गे स्वीयं चरणकमलं दातुमेषा प्रवृत्ता ।। ७१ ।।

संकेतः – आशुपदेन क्षणमात्रं विचारमग्नतापि आक्षिप्यते ।।७१।।

इति सनातनोपाह्व–श्रीमद्रेवाप्रसादद्विवेदिकृतौ "सीताचरित" नाम्नि
सर्गबन्धे कुमारप्रसवो नाम
पंचमः सर्गः ।।५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षष्ठः सर्गः

सुतयुगसहिता विदेहपुत्री प्रसवनिकारमुदस्यतः प्रवातात् ।
विपिनपरिसरान्मुनेः पदं सा पितुरिव धाम परं शनैरवापत् ।। १ ।।

संकेतः – प्रवातस्य प्रसवप्रातिकूल्याभावविवक्षयात्र सीताया उत्तमं स्वास्थ्यं सूचितम् ।।१।।

पृषतचटुलिकासु दन्तुराभिः सितशबलाभिरसौ स्मितच्छटाभिः ।
पुनरिव मुनिधाम रामजाया व्यधित पवित्रमपि स्वतः पवित्रम् ।। २ ।।

परिणतफलभंगुरांगयष्टिं व्रततितर्ति नयनैर्निपीय पाण्डुम् ।
अशिशिरममुचद् दशां स्वकीयां प्रसवकृतामनुचिन्त्य बाष्पमेषा ।। ३ ।।

अकृत मनसि–'हन्त हन्त नारी जगति समर्पितचेतना परार्थे ।
न खलु न खलु विद्यतेऽत्र तस्या अणुपरिमाणमपि 'स्व'–संज्ञितत्वम् ।।४।।

प्रणयसरसि वल्लभद्विपेन्द्रादसहमवाप्य करोपमर्दमेषा ।
वहति कमलिनीव विश्लथं स्वं परिगतसौभगमात्मनो हि सर्वम् ।। ५ ।।

संकेतः – गजकमलिन्युपमया पुरुषं प्रत्यपरक्ततात्र व्यज्यते । तेन सीताया लोकतो वैराग्यमुत्प्रेक्ष्यते ।। ५ ।।

अशिथिलचरणं पुरो व्रजन्ती मनुजनुषां ननु चेतनेतिहासे ।
प्रणयपरवशे ! पुरंध्रि सत्यं त्वमिह परार्ध्यसमर्पणैकभावा ।। ६ ।।

रविकुलमहिषीति दिग्धचेता मनसि बभार विकल्पनाशतानि ।
अपि सुरसरितस्तरंगमाला भवति जले पवमानपीडिते हि ।। ७ ।।

मुनिजनवनिताभिरार्यधर्मे दृढमतिभिस्तपसि स्थिराभिरेषा ।
तनयमिथुनशोभिता परार्ध्यैरुपकरणैरभिसत्कृताऽत्र हर्षात् ।। ८ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋषिजनकृतमंगलोपचारामुटजकुटीमुपलभ्य तत्प्रदिष्टाम् ।
इति मनसि चकार दिव्यभावा नरपतिसौख्यतृष्णेषु सा वितृष्णा ॥९॥
नियतमतितमां भवामि धन्या सुरजनसंस्पृहणीयमाश्रमं या ।
कृत-गृह-चरितार्थता प्रसूत्या प्रथमकवेः कृपयास्मि संप्रविष्टा ॥१०॥
कुशलव–जल–सीकरोक्षितानि दधिघृतमिश्रितमिष्ट–पायसानि ।
मसृण-कट-पलाल-संस्तराणि शुभशयनानि भवन्ति यद्गृहाणि ॥११॥
शुकमृगशिशुशावकैः परीता शतशतधेनुधना समृद्धसस्या ।
विगतविभवविक्रिया च यत्र मुनिजनता क्षितनागरा यथास्ति ॥१२॥

संकेतः – समृद्धा नागरा विक्रियाजुषः, इमे पुनर्न तथेति तानिमे क्षिपन्तीति व्यतिरेकः ॥ १२ ॥

मनुजवपुषि भुक्ति–मुक्ति–लक्ष्म्यौ विधृतविभक्तितयापि यत्र युक्ते ।
भरतभुवनसंस्कृतौ स्वमर्थं "प्रतिजनजीवनमुक्तिम"– पर्ययेते ॥१३॥

संकेतः – विधृता विभक्तिः विभागो याभ्यां तद्भावेनापि यत्राश्रमे युक्ते अविभक्ते । जीवनमुक्तिशब्दस्य मुख्योऽर्थो भुक्तिमुक्तियोग एवेति नवीनः पन्थाः । प्रतिजनं तत्प्रतिष्ठा चाश्रमस्य विशेषः ॥१३॥

करणमिदमथेदमात्मतत्त्वं, द्वितयमपि प्रतिपूरुषं परस्य ।
परमपुरुषसंज्ञकस्य यस्मिन् परमशिवस्य तनूयितं बिभर्त्ति ॥१४॥

संकेतः – करणम् इन्द्रियग्रामः शरीरं च । संसारोऽपि परमशिववपुरेवेति शैवागमिनः ॥१४॥

"इदमभिमतमेतदस्ति हेयं" मतिरियमत्र जने जनेऽवदाता ।
नरपतिनिरपेक्षमत्र हन्त प्रचलति येन नृरूप एव मेधः ॥१५॥

संकेतः – हेयोपादेयसंवर्गणमेव धर्मः, तत्सहितं यन्नृजीवनं स एव नृरूपो मेधः न तु नरबलिसंपाद्यो मेधः । नरमेधशब्दस्येयमपूर्वा व्याख्या ॥१५॥

विशसनमिह पोषणस्वरूपमिह यजनं भजनेन मिश्ररूपम् ।
इह भजति महान्ति राष्ट्रलक्ष्मीः स्वयमुपगम्य फलानि शान्तिदानि ।१६।

संकेतः – विशसनम् छेदः लतादीनाम् । भजनम् सेवनं च राष्ट्रादीनाम् । इह राष्ट्रलक्ष्मीः शान्तिदानि फलानि स्वयमुपगम्य भजत इति लोक–मंगलत्वमपि ॥१६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इह वसति पुमान् द्विधा विभक्त इह खलु कामयते बह्वीः प्रजाः सः ।
सृतिरिह नियतिं नियम्य सम्यक् प्रसरति मृत्युमपास्य दास्यकेऽपि ॥१७॥

संकेतः – स्त्रीपुंसौ हि सिसृक्षोः पुरुषस्य द्वौ भागौ । तेन "ईदृशीरेव प्रजाः स्रष्टुमीश्वरः कामयत इति भावः । योगसिद्धिश्चात्र मृत्युजित्त्वम् ॥१७॥

इदमखिलमपीशवास्यमेव त्यजनशुभैव हि तेन भुक्तिरार्या ।
इति नियतिमुपास्य बोधयोगः प्रतिजनमत्र समश्नुते प्रतिष्ठाम् ॥१८॥

संकेतः – बोधयोगो ज्ञानयोगः । स एव हि "ईशावास्यमिदमि"– ति श्रुतेः प्रतिपाद्यः ॥१८॥

इह सनक–सनातना हि सर्वे मुनिशिशवो गिरिजारमाश्च कन्याः ।
शुकभरतभगीरथा युवानो मम पितरः स्थविराश्च हन्त सर्वे ॥१९॥

संकेतः – पूर्णब्रह्मचर्ये हि सनकादीनां साधारण्यम्, निष्ठावत्त्वे गिरिजा-रमयोः, शुकस्य परहंसतायां, भरतस्य वीरत्वपरिपालकत्वयोः भगीरथस्य च तपस्वित्वे । सर्वेषां स्वभूमिकासु पूर्णतैवात्र प्रतिपाद्या ॥१९॥

इह निवसति भक्तिरष्टमूर्तौ रवि–शशि–दीक्षित–पंचभूत-मूर्तौ ।
"कुशल" इति यतश्च यत्र शब्दः प्रतिमुनि हन्त सदान्वितार्थ एव ॥२०॥

संकेतः – 'रविशशिपंचभूतेषु यजमानत्वेन प्रतिष्ठित एव कुशल" इति सूत्रमित उन्नेयम् ॥२०॥

अधि–तमसमथाधि–गंगमस्मिन्नृषिकुलमस्ति समाधिनाशिताधि ।
'क्व नु खलु कविना स्वधाम कार्यंमि'- ति मतिरत्र हि निश्चितिं प्रयाति २१।

संकेतः – तमसा तमःप्रतीकम्, गंगा सत्त्वप्रतीकम् । एतदन्यतरैकान्तिकेन कविना न भाव्यमिति भावः। ईश्वरवद् विश्वमपि कविना सेव्यमिति भावः ॥२१॥

इति हृतहृदया नृपेन्द्रजाया मुनिपदसौभगमंजसा निरीक्ष्य ।
प्रसृतमपि पुरौकसां समाजे निजपरिवादममंस्त दिव्यदानम् ॥२२॥

कतिचन दिवसानथार्यलक्ष्मीर्जनकसुता पृथुकद्वयीलघुत्वात् ।
मुनिजनविनिवारिता श्रमेभ्यः कथमपि कृच्छ्रगतेव सा निनाय ॥२३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदनु कुशलवेति संज्ञया तन्मुनिजनभूमिसदृक्षया कवीन्द्रात् ।
तनय–युगल–मुत्प्रकाश्य सीता धृततरुचीरयुगा मुनित्वमापत् ॥२४॥

संकेतः – उत्प्रकाश्य प्रेम्णा प्रख्याप्य ॥२४॥

अभिनवर्जनिपेशलांगयष्टी अपि तनयावपि तौ दृढत्वकान्त्योः ।
नरपति–गृह–गर्भ–भर्म–कर्म–द्युमणिमणि–प्रतिमांगकावभूताम् ॥२५॥

संकेतः – नर्भभर्माणि हि कौटल्यादिभिः सम्यक प्रतिपादितानि । द्युमणि मणिः सूर्यकान्तमणिः ॥२५॥

कविनरपतिरेतयोरतोऽणुप्रतिममपि द्विजसंस्कृतौ न खिन्नः ।
भवति ननु कियान् स्वयंप्रभस्य श्रम इह संस्करणे मणिव्रजस्य ॥२६॥
जनकतनययापि वत्सलान्तःकरणतया सुतवन्मुनेः पदस्य ।
तृण–तरु–मृग–पक्षि–धेनु–वत्स–द्विज–तनयेष्वपि मातृभाव आपे।२७।
सितशर्बलतपृष्ठकान् मृगाणामतिलघुकान् पृथुकान् निजांकशय्याम् ।
अतिशयमधिरोप्य रामजाया किसलयदुग्ध–मधु–स्पृहानकार्षीत् ॥२८॥
प्रसवविकृतिमत्र मानवीनामथ च तथैव गवां मृगांगनानाम् ।
इयमतिकरुणा स्वहस्तदत्तैरुपकरणैरुपशान्तिमानिनाय ॥२९॥
इयमिह मुनिबालिकाः स्वशिल्पे कुशलकरा असृजन्नितान्तसूक्ष्मे ।
ऋषि–कुल-भुवि येन सभ्यताया अपि परमश्चरमो विकास आस ॥३०॥

संकेतः – स्वशिल्पम् नागरीसमुचितं कामशास्त्रादिप्रसिद्धं नृत्यसूचीकर्मादिरूपम् । सभ्यता हि बाह्यजीवनवृत्तिः ॥३०॥

विपिनभुवि पुरत्वमत्र जज्ञे यदि किल केवलयैव रामपत्न्या ।
किमिव पुरपुरन्ध्रयो न कुर्युर्जनपदसीम्नि, रुचिं यदि श्रयेयुः ॥३१॥

संकेतः – जनपदानि ग्रामक्षेत्राणि ॥३१॥

सुभगरुचिषु संयमः क्रमेषु, यमनियमेषु च सौभगं रुचीणाम् ।
इयमिह किल शिष्टताऽस्मदीया सहृदयता-सचिव-स्वभाव-सौम्या।३२।

संकेतः – अस्मदीया भारतीया । सहृदयता सचिवो यस्य तेन स्वभावेन सौम्या, न तु रूक्षताविषमा । यमा नियमाश्च योगशास्त्रे स्मृतिषु च नैकविधा प्रसिद्धाः ॥३२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वयमपि कलशीर्द्रुमेषु लघ्वीरियमसृजत् सलिलेन संभृतान्ताः ।
कथमिव ननु सान्यथा लभेत प्रतिकणमुच्चतमां स्वदेशभक्तिम् ।।३३।।

अभिनवकवितारसेन पूर्वं स्फुटितशिखाँल्लघुभूरुहः सती सा ।
अपि किसलयिताँश्च पुष्पिताँश्च व्यधित निजस्वरमाधुरीरसेन ।।३४।।

निजपरिसरतीर्थजातमेषा मुनिसहिता पदयात्रया ददर्श ।
अयि बत कथमन्यथा ममत्वं निजभुवि कोपि भजेन्न तां स्पृशेच्चेत् ।।३५।।

किसलयशिशुसोदरेण सीता कलमभुवः स्वकरेण मृद्नती सा ।
कठिन–कर–कृतां स्वभूमिसेवां कृषकजनस्य सुदूरमत्यशेत ।।३६।।

तरुण–तरणि–सोदरं वसाना वसनयुगं क्षुमया स्वयं कृतं सा ।
अतिशयपरितोषमाप राज्ञी–पट–परिधानसुखं विषूचयन्ती ।।३७।।

संकेतः – तरुणतरणिः पिंगरुचिः । क्षुमा अतसी । विषूचयन्ती निन्दन्ती ।३७।

स्वयमकृत कटं पटं घटं सा स्वयमसृजल्लघुपुत्तलाँश्च साध्वी ।
दिनकर–कुल–वर्धनौ ततस्तौ शिशुवयसः स्वकृतिव्रतान्यशिक्षत् ।।३८।।

संकेतः – स्वकृतिव्रतानि स्वयंसेवाव्रतानि ।।३८।।

तनयवदनशुक्तिदन्तमुक्ता-छविहृतचित्तशुका विदेहजा सा ।
विरहदहनशोधितां स्वदेहे सु–कनक–पंजरतां परामुवाह ।।३९।।

संकेतः – सुकनकं शोभनं पावकपाकेन निश्यामिकं हेमेत्यर्थः ।।३९।।

सुतयुगतनुकान्तिरूपसाम्यादतिशयभर्तृगतान्तरापि सैषा ।
प्रतिदिननिजकृत्यनित्यलग्ना लघु तु कदाचन सालसेक्ष्यतां नु ।।४०।।

हृदयमधित सर्वभूतमूर्त्तौ भगवति रामपदाभिधीयमाने ।
वपुरथ वनदेवतेव सौम्या धरणिसुता धरणौ श्रमारणौ च ।।४१।।

संकेतः – हृदयेन रामं स्मरन्ती वपुषा कृषिकर्म चक्रे इति भावः।।४१।।

हिमगिरिगुरुशृंगतः पयोधेर्गहनतमावट–गह्वराणि यावत् ।
निखिलमपि निजार्यभूमिवक्षो निजमृदुतल्पममंस्त भूशयाना ।।४२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रणिहितिहितमानसा समाधिं पितृगृहशिक्षितमत्र साधयन्ती ।
प्रशमित-परितापमात्मरूपं प्रियतममैक्षत सा सदा विरात्रे ।।४३।।

संकेतः – विरात्रे रात्रेरवसाने । साह्येव प्रबोधवेला । प्रतीकभूता च सा तमोहानेः ।।४३।।

वृषरवि-शिशिरेन्दु-तापशीतं घन-पवमान-शरत्कुशेशयाम्भः ।
अतिशयपरिशुद्धनाडिचक्रा जनकसुता सुखमत्युवाह सर्वम् ।।४४।।

संकेतः – वृषराशिस्थो रविः वृषरविः ज्येष्ठसूर्यः, शिशिरस्य ऋतोरिन्दुः सर्वाधिकं शीतः, तयोः तापशीतं तापशैत्यद्वन्द्वम् ।।४४।।

निजवपुषि निजप्रभुत्वमेषाऽऽसननियमादिभिरार्यदेशजाता ।
कथमिव न दधातु, संस्कृतिः स्वा भवति हि किं कथमप्युदस्तवृत्तिः ।४५।

संकेतः – निजप्रभुत्वं न तु मृत्युप्रभुत्वम् । संस्कृतिः संस्कारः । बाल्यात् प्रभृति योगविद्याया अभ्यास इति भावः ।।४५।।

सुत-वपुषि ततः स्वदुग्धराशेरियमतनोदिव कामधुग् यथैव ।
अमृतमयदृतित्वमात्मशुद्धिर्भवति हि मातृजनस्य राष्ट्रपुष्ट्यै ।।४६।।

संकेतः – दृतिः कुतूः । ततः नाडीचक्रपरिशोधनात् स्वप्रभुत्वाच्च ।।४६।।

रविधरणिसुताऽऽत्मजात-युग्मं प्रतिनिधितामिव रोदसीत्रिलोक्याः ।
निरतिशय-महः-सहिष्णभाव-द्वय-महितं जनुषः प्रभृत्यवापत् ।।४७।।

संकेतः – सुतश्च सुता चेत्येकशेषेण सुतौ रामसीते तयोरात्मजातत्वात् तादृशं महः प्रतापमूलमोजः सहिष्णुभावः सहिष्णुता च । रोदसीत्रिलोकी हि सूर्यलोक-पृथिवीलोकाभ्यां निर्मीयते । तत एव सूर्यपृथिव्योर्नप्तारौ तस्याः प्रतिनिधिभूतौ ।।४७।।

स्व-सुत-महिमनि प्रदिष्टचित्ता जनकसुताप्यथ सा यथोक्तरूपे ।
विकसति कुसुमे यथैव कल्पव्रततिरुवाह सदावधानशुद्धिम् ।।४८।।
भवतु विभवविस्तरो महीयान् ननु यदिवास्तु वनेचरत्वमुग्रम् ।
भवति बुधजनो न हि स्वदेशांकुर इव बालजने कदाप्युदस्तः ।।४९।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभवति न हि सौरभं न वन्ये सरसिजनौ, न च मिष्टता फले न ।
नियतिमनुकरोति भावजाते जनकगुणान्न तु देशसंविभागात् ॥५०॥

संकेतः – वन्यत्वं फलेपि योज्यम् । भावः पदार्थः ॥५०॥

निमि–रवि–कुल–लज्जयेति हर्षात् सुतयुगली विपिनेऽपि रक्तयेव ।
प्रतिनव–परिकर्म–संविधाभिः प्रतिदिनमंगसमृद्धिमाप्यते स्म ॥५१॥

संकेतः – निमिरविकुललज्जापदेन सीता विवक्षिता ॥५१॥

प्रतिदिनमभिवृद्धिमश्नुवाना विरतिमिव स्वमतिः सुतद्वयी सा ।
जनकदुहितुरन्तरात्मतत्त्वं प्रथमकवेरिव तोषयांबभूव ॥५२॥

संकेतः – स्वमतिः सीतामतिः । प्रथमकवेरन्तरात्मतत्त्वमिव जनकदुहितुरन्तरात्मतत्त्वमिति योजना । तदत्रोपमेयमिवोपमानमपि प्राकरणिकमेव ।५२।

अवयवपरिवृद्धिरात्मजन्मद्वितय उवाह गुणाभिवृद्धिलक्ष्मीम् ।
इति जनकसुता बभूव तुष्टा, भवति न पिण्डसमृद्धिरेव वृद्धिः ॥५३॥

प्रणतिपरतया तयात्मजातावृषिचरणाम्बुरुहे मरालितौ यत् ।
भरत-भुवन-भारती-प्रयाग-स्नपनविधौ कृतिनौ ततः कृतौ तौ ॥५४॥

संकेतः – मरालितौ मरालतां प्रापितौ । भरतभुवनं भारतम् ॥५४॥

स्व-शरण-भुवि गोमयेन साध्व्या मरकततां, सुतयोर्द्वयी, गतायान् ।
स्खलित-पदतया सहस्रवारं वपुषि बभार शिवां स्वदेशमृत्स्नाम् ॥५५॥

संकेतः – शरणं कुटीरम् "शरणं गृहरक्षित्रोरि" तिवचनात् ॥५५॥

निज–कर–नवनीत–जानु–याता सुतयुगली मुनिधाम संस्पृशन्ती ।
अतनुत च विनिद्ररोमलक्ष्मीमिव नवसस्यमिषेण तां स्वभूमिम् ॥५६॥

विलुलितशितिकाकपक्षलक्ष्मीर्मुनिजनयज्ञविभूतिकान्तभाला ।
अरुणरुचि च वल्कलं वसाना सुतयुगली गुहयुग्मतां वितेने ॥५७॥

संकेतः – शितिः कृष्णवर्णः । गुहः स्वयमेक एव इमौ तु द्वाविति गुहस्य द्वित्वमुत्प्रेक्षितम् ॥५७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नियमकृशवपुर्विदेहपुत्री धृतिसुभगेन परिश्रमेण पुत्रौ ।
अपुषद,–पि च बाललालनं न प्रथमतरं तप आर्यतापसेषु ।।५८।।

संकेतः – अपुषद् अपोषयत् । दैवादिकस्य पुष्यतेः "पुषादि–द्युतादी"–त्यङि रूपम् ।।५८।।

हृदय उदयमाप रामपत्न्या अतितरवत्सलता तथा व्यथापि ।
पतिहृदि निजवत्समाप्य नारी भवति हि तृप्ततमा स्वमातृभावे ।।५९।।
परमियमतिमात्रदान्तभावा विकृतिमिमामकरोत् सखीं क्षणं हि ।
वशिषु न हि विकारजातमम्भः स्वनल इव श्रयते प्रकाममायुः ।।६०।।

संकेतः– प्रकाममायुः दीर्घकालस्थितिम् ।।६०।।

"क्व नु खलु पृथिवीपतित्वमस्याः क्व नु बत पुत्रकयोर्वनित्वमेतत् ।
सृजति विधिरहो विपाकमुग्रं विषमतमं च समस्त एव जन्तौ ।।६१।।
इयमिह शुच एव हन्त वार्ता मनुसदृशैरपि राजभिर्धृतापि ।
नगर–जनपद–प्रजा विकास–मधिभरतावनि सर्वथा न लेभे ।।६२।।
ध्रुवमिह, यदिवा, परान्, नराणां वपुषि विधि–धृतजन्मनः करोति ।
इह हि तदनु सर्वदैव तेषां सुगतिकृते प्रहिणोति च स्व-वप्रम् ।।६३।।
भवति तत इहैव मोक्षलक्ष्मीपतिरपि हन्त सनातनेति मार्गः ।
प्लववपुरयमात्मनि स्थितांस्तान् गमयति संसरणाम्बुधेः परस्तात् ।।६४।।
भरतभुवनमस्ति तीर्थमार्यं ननु खलु तेन चराचरोद्दिधीर्षु ।
इति विविधमतिर्विभिन्नभाषो विषमगतिश्च जनो विकासमेति ।।६५।।
इति मुनिजनता सुतद्वयीं तामथ च सतीमपि तां वने निरीक्ष्य ।
हृदयमतिममत्वतोऽतिभूमिं गमयति हन्त विकल्पसंहतेः स्म ।।६६।।
परमियमुपलं विनाशहेतुमपि मसृणं सृजतेङ्गुदीफलेन ।
अधिगतविनया विधित्सुरासीज्जगदखिलं निजसिद्धिसिंचितं हि ।।६७।।

संकेतः – परान् नरेतरान् । वप्रम् पितरम्, "वप्रः पितरि केदारे वप्रः प्राकाररोधसोरि" – ति धरणिरिति भरतसेनो मेघदूत-[३–पद्ये]-सुबोधायाम् । आक्रोशे नास्य ग्राम्यत्वम् ।।६३।। सनातनधर्मो हि मोक्षलक्ष्मीपतिः । आत्मनिनिजे सनातन इत्यर्थः ।।६४।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशति दृढमपि स्तनं स्ववत्से विचलति वत्सलभावतो न धेनुः ।
अपि शकलयति स्वपत्रशाखमवनिरुहो न खगे विरुद्धवृत्तिः ॥६८॥

असति सति, लघौ पृथौ स्ववृत्तिर्विनिमयमेति न भारते कदापि ।
सति सति सति,यद्,विरुद्धवृत्तिः सरिति शिलेव शिवत्वमेति कच्चित्।६९।

संकेतः – सति सत्पुरुषे सति सत्त्वनिष्ठे सति विद्यमाने । यद् येन हेतुना विरुद्धवृत्तिर्जनः । सरित् सलिलमयी, शिला च पाषाणवपुः, एवं सापि सरितो विरुद्धवृत्तिरेव । यथा च सरिति सरित्तामत्यजन्त्यां शिलापि शिवपिण्डतामेति तथैव प्रकृते ॥६९॥

रघुपतिदयितापि तेन काश्चिच्छरद उदस्य विषादमात्मजातौ ।
निजभुवनविकासनेच्छुरेषा विधिवदपुष्यदतिप्रशान्तचेताः ॥७०॥

संकेतः – आत्मजातौ कुशलवावपुष्यत् दैवादिकस्य पुष्यतेर्लङ् ॥७०॥

तदनु च विशदात्मा सात्मनो ज्योतिषा, स्वं
तनयमिथुनमेतद् बोधवह्नौ विशोध्य ।
पुरुष–फल–चतुष्के जागरूकौ विधातुं
निरचिनुत गुरुत्वे दृष्टवेदं कविं तम् ॥७१॥

संकेतः – स्वयमेव दत्तशिक्षाविमौ । ततस्तयोः पुरुषार्थनिश्चयार्थमेव सा सीता तदुपयुक्तस्य गुरोर्निर्वाचनमकरोत् ॥७१॥

इति सनातनोपाह्व–श्रीमद्रेवाप्रसादद्विवेदिकृतौ "सीताचरित" नाम्नि
सर्गबन्धे जानकीमुनिवृत्तिर्नाम
षष्ठः सर्गः ॥ ६ ॥

—★—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तमः सर्गः

अथ धृत–चतुरस्त्रवेद–पीठं कविमुपनीय सुतौ विदेहजा तौ ।
शरवणभव–तेजसौ सुयोगे विहितनतिर्विनिवेदयाम्बभव ॥१॥

संकेतः – सुतौ कविं कवेर्वाल्मीकेः पार्श्वमुपनीयेत्यन्वयः शरवणभवः कार्त्तिकेयः । सुयोगे शोभने योगे ॥१॥

न खलु जगति कश्चनापि भावो नयनगतश्च तथाविधेतरश्च ।
नियतमिह चराचरे प्रपंचे भवति भवेद् भवतां न योऽनुभूतः ॥२॥

ऋषि–मुनि-कवि-तात्रिवेणिरार्या प्रवहति मानसनाम्नि वः प्रयागे ।
प्रभवति खलु विश्वदैवते वो हृदयमिदं ननु कार्मणे विधाने ॥३॥

संकेतः – भाववचनस्य तलो द्वन्द्वात् परत्वात् त्रितयेनापि ऋषिप्रभृतिनाऽभिसंबन्धः । विश्वदैवतं कार्मणं विश्वमेव देवता यत्र तादृशं वशीकरणम् ॥३॥

शिशुहृदि शयिता च येन विद्याज्वलनशिखा स्पृशतीव विश्वरूपम् ।
शिवतममिदमस्ति कारणं सत्कुलपतिपावनशारदाऽनुभावः ॥४॥

संकेतः – एतद्धि विश्वविद्यालयस्वरूपम् ॥४॥

पितरमिव भवन्तमाश्रिताहं भरतमहीलघुलेष्टुकाविमौ द्वौ ।
निज–निजजनता–परिष्क्रियार्थे चरणयुगे भवतो निवेदयामि ॥५॥

संकेतः – भरतमही भारतं वर्षम् । निजस्य पुत्रयोः स्वव्यक्तित्वस्य, निजजनतायाः पुत्रयोरेव या जनता तयोः परिष्क्रियाया इत्यर्थः ॥ ५ ॥

ऋषि–मुनि-जनसंसदि प्रसादि प्रमति च हारि च तद्वचो निशम्य ।
कविरभवदसौ समाहितात्मा क्षणमथ वाचमिमामुवाच गुर्वीम् ॥६॥

संकेतः – तस्यास्तच्च वचस्तद्वचः ॥६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुहित इह पुमान् स जातमात्रो भवति महान् स्वत एव, यः सतीनाम् ।
प्रभवति शिवकुक्षितो महार्हो मणिरिह रत्नसुवो भुवः प्रसूतः ॥७॥

संकेतः – जातमात्रो एवेति विवक्षा । जातमात्र एव स पुमान् महान् भवति य इत्यन्वयः ॥७॥

रविकुलमहिषी विदेहपुत्री भरतमहीमुनिशोणितोद्भवा च ।
त्वमिव जगति हन्त यस्य माता गुरुरपरः क इवास्य शिक्षतौ स्यात् ॥८॥

संकेतः – शिक्षतौ शिक्षणे ॥८॥

गुरुरपि खलु पुण्यभाक् स भूम्ना शिशव इमे ननु यत्कुले विनेयाः ।
अनल इह महान्, स मन्त्रपूतं वहति यतो हविरोषधीमहिष्ठम् ॥९॥

संकेतः – ओषधीमहिष्ठम् मन्त्रपूतं हविर्वहतोन्वयः ॥९॥

भगवति ! विदिताखिलो मनुष्यो भवति निसर्गत एव जन्मशुद्धया ।
न खलु वहिरुपाधिमाश्रयन्ते खनिजनुषो मणयः प्रकाशसिद्धचै ॥१०॥

संकेतः – जन्मशुद्धिर्हि ज्ञानलाभे भारतीयो मन्त्रः । ॥१०॥

अतिमहति सुजन्मनि स्वयं हि श्रुतिनिधयोऽप्युपचिन्वते वपूंषि ।
शितमहसि कुतो न रश्मिजालं प्रभवति, हन्त कुतश्च शीतरश्मौ ॥११॥

संकेतः – शितं तीक्ष्णं महः प्रकाशो यस्य स सूर्यः ॥११॥

भगवति ! भुवनान्तरालमेतन्निखिलमपि ज्वलितेऽनले यथार्चिः ।
प्रकृतिपुरुषयज्ञसंविधानात् स्वयमुपतिष्ठति मानुषे निकाये ॥१२॥

संकेतः – प्रकृतिपुरुषौ भूतयजमानौ बहिः, चैतन्यशरीरे चात्मनि संबद्धावेव भासेते । तयोः संबन्ध एवायं यज्ञः । निकायः शरीरम् ॥१२॥

रघुपतिदयिते! विदेहपुत्रि! द्विजललने! शृणु भारतप्रतिष्ठे ! ।
क्वचिदपि पुरतश्च कस्यचिद् वा नमयति शीर्षमतो न भारतीयः ।१३।

जननसमयतः स कल्पनानां तरुषु भवानि समश्नुते फलानि ।
अथ सुपरमचिन्तनामणीभिर्भवति च तस्य विनोददेवनानि ॥१४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिबति तदनु सोऽयमार्यबालो मधुरसमुच्छ्रिति–कामनागवीनाम् ।
मनसि वपुषि चायुषि त्रिलोक्यां व्रजति परात्परतां यतः स दिव्याम् ।१५।

संकेतः – कल्पनानां शिवतमसंकल्पानां तरुषु, राहोः शिर इवाभेदे षष्ठी सुपरमपदमांग्लभाषायाः सुप्रीम–पदेन निष्काश्यम् । तादृशानि चिन्तनान्येन मण्यश्चियन्तामणयः । ईकारान्तोपि मणिशब्दो लभ्यते । उच्छ्रितिः समुच्छ्रय उदात्ततारूपः तस्याः कामनैव गौः कामधनुः ।।१४–१५।।

भरतमनलमात्मसाद् विधाय प्रतिकलमभ्युदयैषिणो द्विजेन्द्राः ।
अधिशुचि दृढशाद्वलप्रतिष्ठा भुवनमिदं स्थगयन्ति यागयोगैः ।।१६।।

संकेतः – भरताख्योनलो वेदेषु प्रसिद्धः । यागो रासायनिकं मिश्रणम्, योगश्च संयोगः । यज्ञा योगाश्चेति समुदारौ शब्दौ ।।१६।।

कलुषरहितमात्मतत्त्वमार्यो रविकिरणेष्वनुसंदधाति सोऽयम् ।
अविरलविशदं तथैव चेतोऽप्यमृतगभस्ति–गभस्तिषु प्रबुद्धः ।।१७।।

संकेतः – कलुषरहितमात्मतत्त्वमात्मनः कालुष्यराहित्यम् एवमेव चेतसोऽविरलविशदत्वम् । अमृतगभस्तिः शशी ।।१७।।

इदमिदमिदमस्ति नेदमित्थं स्वयमुपबुद्धविशुद्धबुद्धिरेषः ।
अरुचिररुचिरे समानभावास्वनलशिखास्वनुवीक्षते विवेकम् ।।१८।।

संकेतः – अनुवीक्षते आनुवीक्षिकीं तनुते ।।१८।।

जगदिदमखिलं महाविराटद्रढिम–परीगत–दंष्ट्रिकालग्रलग्नम् ।
नियतमनृतमेव नास्ति सत्यमिति च कुहूं ब्रुवतीमसौ शृणोति ।।१९।।

संकेतः – महाविराटस्य द्रढिम्ना परीगतताया दंष्ट्रिकाया अग्रभागे लग्नं परिणामि ।।१९।।

अधिदिवसमथाधिरात्रि सन्ध्यास्वपि च पिनद्धमहोपदेशमाल्यः ।
प्रकृतिमहति वर्त्मनि श्रुतीनां भवति महापथिकः स्वयं द्विजेन्द्रः ।।२०।।

पुनरपि निगदामि तेन नासौ क्वचिदपि मस्तकमात्मनीनमार्यः ।
विनयपरिगतोऽपि शिक्षणाय श्लथयति कुत्रचनापि भारतीयः ।।२१।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुलपतिरथवा महोपदेष्टा शिशुषु परं सृजतीह संस्कृतिं स्वाम् ।
इयमुपचिनुते लतासधर्मा फलयितुमेव च जन्मनः फलानि ॥ २२ ॥

प्रतिहतगतिरस्तु सा मनुष्यः पठतु भागीरथसाहसस्य विद्याम् ।
अभिजन–जनते सरस्वतीनाममृतसरांसि समर्प्य तोषयेच्च ॥ २३ ॥

जनकदुहित एष ते नियोगः शिशुविनयाय ममास्ति मान्यमान्यः ।
भवति भगवती प्रजार्थतन्तुस्थितिविषये दृढमूलधर्मभित्तिः ॥ २४ ॥

युगलमिदमतः परीक्ष्य शिक्षारुचिमनुरूपमहं प्रशिक्षयिष्ये ।
व्रजति विफलतां सतां प्रयासो रुचिपयसां शिखिवर्त्मकर्षणेन ॥ २५ ॥

संकेत – पयो हि नीचैर्गमनशीलम्, शिखी चोर्ध्वगामी । कर्षणमप्राकृतः क्रमः ॥ २५ ॥

प्रथममिदमहं निभालयामि क्षितिपरिपालनदक्षमार्यवीर्यम् ।
स्फुरति कनकगात्रिकां दधानं सुतयुगले तव वा नवेति पुत्रि ! ॥२६॥

संकेतः – कनकनिर्मितं गात्रं कनकगात्रम्, तद्भावः कर्म वा कनकगात्रिका, शुद्धिरिति भावः । क्षत्रो हि क्षितिं परिपालयितुमेव लब्धसंज्ञः ॥ २६ ॥

तदनु ललितसंविधानमार्गे ध्वनिमहिते सुजनान्तरात्मविद्ये ।
गणितखनिजशिल्पभूप्रतिष्ठानिगमपथेऽप्यनयोः प्रकाशमीक्षे ॥ २७॥

संकेतः – ध्वनिमहितः सुजनान्तरात्मविद्याभूतश्च ललितसंविधानमार्गः साहित्यतत्त्वमार्गः । खनिजं भूगर्भशास्त्रम्, शिल्पमिति विज्ञानाभियान्त्रिकीशास्त्रम्, भूप्रतिष्ठा भूगोलशास्त्रम् । निगमः शास्त्रम् तच्च द्वन्द्वान्ते श्रूयमाणत्वाद् गणितादिभिः सर्वैरेव संबध्यते ॥ २७ ॥

इदमखिलमपि ब्रवीमि पूर्वं मतिपरिपाकविधानमेव देवि ! ।
जन–जन–हित–संविधानमन्यद् भवति यदेतदतः परं ब्रवीमि ॥ २८ ॥

सुपठितमपि भूयसा वृथैव द्विजललने भवतीह पण्डितानाम् ।
यदि भवति न तत् प्रजाप्रतिष्ठापरमफलाय निवासिनां समाजे ॥ २९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बत, बुधजन एवं सूत्रधारो भवति यदा प्रकृतेरनुक्रियायाः ।
जगति किमिति निष्क्रियत्ववज्रैरसमय एव हिनस्ति तां तदेषः ।। ३०।।

संकेत: – प्रकृतेरनुक्रिया हि यज्ञः । तं नाविद्वान् प्रवर्त्तयेत ।। ३० ।।

भवति कवयितुर्विपश्चितोऽदो व्रतमथवात्र महाव्रतं यदेषः ।
प्रतिजनहृदयं प्रकाशराशेर्विशदतया विशदीकरोतु कामम् ।। ३१ ।।
स हि परमतमो निजार्थदर्शी भवति जनः परिशील्य यस्तु शास्त्रम् ।
विपथगतिजुषां गतीर्निरोद्धुं विरततया यतते न लेशमात्रम् ।।३२।।
इनि रघुकुलकीर्तिकेतुभूते मनुजसमाजनियन्तरि द्विजातौ ।
तव कुश-लव-नाम्न्यपत्ययुग्मे प्रगतिमहं जनतासु संदिदृक्षुः ।।३३।।
भवति यदि न मे कथेयमच्छा वद तदभूत् किमु कारणं यदार्थः ।
स्थितिषु परमपूरुषोऽपि रामोऽत्यजदमलां भवतीमभिन्नचेताः ।।३४।।
भगवति ! परमेकमत्र तत्त्वं तव परिदेवनमूलमुन्नयामि ।
रघुपतिजनता न शिक्षितास्ति, भवति च तन्त्रमितः सतां विरक्तिः।३५।
अयि बत, यदि विद्यया सतीनां न हि परिपालनमस्ति किं तया नः ।
सुरभिरपि वृथैव पायसेश्चेद् यदि न सनेधयतेऽत्र विक्लवान् सा।३६।
क्षणपरिमितमस्ति चेत् समस्तमचरचरात्मकमेतदीक्ष्यमाणम् ।
तदिह तरवीचिकासु सिन्धुर्नियतमुपास्यतमो हि विश्वमूर्त्तिः ।।३७।।
स च नरि नरि चेतनास्वरूपात् स्थितिमधिगम्य विभुः प्रकाशमानः ।
यदि न निगमराशिभिर्मनुष्यैरपचितिरस्य विधीयते कृतं तैः ।।३८।।

संकेतः – अपचितिः पूजा ।।३८।।

इयमिह मम वर्त्तते मनीषा तव तनयावथ तद्वदेव सर्वे ।
द्विजकुलशिशवो जगन्ति विद्याविशदपथेन विवेकतो नयन्तु ।।३९।।
अथ च कमलपत्रतां दधाना विषयसरोऽम्भसि नीरजस्कभावात् ।
हृदयगगन आविलाभ्रभावैरनिबिडतां समुपार्जयन्तु सर्वे ।।४०।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति सरलमना विवेकशीलो भुवनहितेच्छुरथान्तरे विरक्तः ।
अलमलमिति संकथां समाप्य प्रतिजगृहे रविवंशशावकौ तौ ॥४१॥

दिनमपि कथनेन सार्धमेव स्थविरदशामगमत् पदे महर्षेः ।
गतवयसि विटे नु यत्र रागै रुचिचिकुराः सिततां निराचिकीर्षन् ।४२।

संकेतः – रागै रंजनद्रव्यैः खिजाबादिलोकपदाबाच्यैः ॥४२॥

वटुजन इव सान्ध्यिकः प्रणामस्वर उदियाय पतत्त्रिणां समूहे ।
ऋषिजन इव किं च दिग्विभागादुटजभुवं समियाय गोसमूहः ॥४३॥

संकेतः – उपमेयमुपमानं चेति द्वितयमप्यत्र प्राकरणिकमेव ॥४३॥

हविरुपशममानिनाय धूमैर्हरिति हरित्यघमग्नये विसृष्टम् ।
श्रुतिसुभग ऋचां स्वरोऽन्तरीक्षं परिहृतपातकमातनोच्च पूर्णम् ॥४४॥

संकेतः – हविः अघमुपशममानिनायेत्यन्वयः ॥४४॥

अवनिरुहशिखासु सान्ध्यमोजः शलभसमूह इवाश्रयं विलेभे ।
उटजपरिसरे च दीपलक्ष्मीर्गृहहरिणीव रुचिं परां बभार ॥४५॥

संकेतः – रुचिः कान्तिः, प्रियत्वं चेति श्लेषः । प्रकृतोभयौपम्यम् ॥४५॥

अधिनिजलघुगोष्ठकं निरुद्धा सुरभिमृगार्भकसंहतिस्तदानीम् ।
प्रसुवमभि नितान्तमुत्सुकत्वात् प्लुतगतिरास विहंगतां गतेव ॥४६॥

संकेतः – प्रसुवं जननीमभि प्रति । विहंगार्भका अपि तदा तथैव ॥४६॥

चरमगिरितटेऽथ सान्ध्यमोजो दवदहनाद्धि शिशिक्ष रक्तिमानम् ।
सर इव खलु येन दिग्वधूटीघुसृणविवर्णमिवोर्ध्वमालुलोके ॥४७॥

संकेतः – चरमगिरिरस्ताचलः । तत्तटे दवदहनोपि विद्यमान एव । तत्र यथा रक्तिमा, तथा तदानीमोजस्यप्याविर्बभूव । घुसृणं कुंकुमम् ॥४७॥

दिवसशतदलं दलानि कृत्स्नान्यपि करसंपुटतां व्रजन्ति कृत्वा ।
रविमभि हृदयेन यामयात्राप्रणतिपरं भुवनान्तरे व्यलोकि ॥४८॥

संकेतः – रविमभि प्रति । भुवनं जलमपि ॥४८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतसृषु हरितां वनीषु यस्मादवतरति स्म सिताऽसिता तदानीम् ।
रजनिमुखतमःकपोतपाली निववृतिरे निलयाय तेन हंसाः ॥४९॥

संकेतः – रजनिमुखं निशामुखम् । तम एव कपोतपाली । हंसाः सूर्यरश्मयोपि ॥४९॥

भवति विरलसंहतेः सदैव द्युतिमहतोपि जनस्य शत्रुशातः ।
इति वददिव दीपकं तमांसि शिरसि बभार रवौ गतेऽस्तगर्भे ॥५०॥

संकेतः – दीप इव दीपकमिति प्रकाशकत्वसाम्यान्निखिलमपि दीपादिकं ग्राह्यम् ॥५०॥

अथ विलुलिततारकं नभोऽभून्नयनमिव द्युतिशून्यमन्धकारे ।
विरल–खग–रुतैश्चराचरस्य करुणतमां च दशां लता विबव्रुः ॥५१॥

संकेतः – तारकपदेन नयनपक्षे कनीनिका ग्राह्या । निशामुखे तस्या अपि विलुलितत्वमानुभविकम् ॥५१॥

तदनु कपिलधेनुतां दधाना विशदरुचामपदेशतः स्वदुग्धैः ।
अधिगत–शशि–वत्सका निशा सा भुवनघटं परिपूरयांबभूव ॥५२॥
विरलमधुपबाधया तटाके निभृतपरागहृताऽनिलेन सार्धम् ।
कुमुददयितया च शर्वरीशद्युतिषु सुविभ्रमलास्यकं नु तेने ॥५३॥

संकेतः – हृता हरणशीलेन ॥५३॥

निभृतहरिणसंचरासु रथ्यास्वमृतकरेण सुधोज्ज्वलीकृतासु ।
अभवदिव समीरणो वियोगी पथिक इयाय य उत्पथं वनान्ते ॥५४॥

संकेतः – अमृतकरः शशी । निभृतेत्यादिना जनरहितत्वमुद्भावितम् । सुधोज्जलीकृतत्वेन च पथिकं प्रति नितान्तदुःसहता एकमात्रधवलत्वेन च भ्रमसंभवः प्रकटः ॥५४॥

कृतदिवसविरामधर्मकृत्यः कुलपतिराश्रमिभिः स संपरीतः ।
कुशलवशिरसोः स्वपाणिपद्मं व्यधृत च तां विससर्ज संसदं च ॥५५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋषिमुनिसमितिर्निशामुखे सा कवयितुरस्य निदेशतो विसृष्टा ।
अविशदुटजमुत्पलं दिनश्रीरिव यदिवा हृदयं चिदः प्रवृत्तिः ॥५६॥

संकेतः – उपमानद्वयमप्यत्र प्राकरणिकम् । चिदः प्रवृत्तेर्हृदयप्रवेशो मुनीनां योगनिद्रां गमयति ॥५६॥

उपनयनविधिं विधाय सून्वोरिति दुहिता जनकस्य शद्बबुद्ध्योः ।
निजमुटजमियाय तत्समेता मुनिवचनात्, प्रथमो गुरुः प्रसूर्हि ॥५७॥

संकेतः – सुतसमेतत्वे हेतुः मुनिवचनम् । तस्य च पोषकं मातुः प्रथमगुरुत्वम् ॥५७॥

निगमविधिभिरन्येद्युः स सूरिर्यथावद्
विधृतयजनसूत्रौ क्षौरभद्रौ च तौ द्वौ ।
धृत-चलदल-दण्डौ मुंजिनौ चापि कृत्वा
बलिनियमकृते हि प्रापयद् वामनत्वम् ॥५८॥

संकेतः – बले राक्षसविशेषस्य वलिनां च नियमकृते नियंत्रणायेत्युभयत्राप्यनुगामि ॥५८॥

तदनु नियमशुद्धौ तौ परां चापरां च
प्रतिपदमुपदिश्य प्राच्यविद्यां कवीन्द्रः ।
अगमयत् पटिष्ठामस्त्रविद्यां च दिव्यां
न हि भवति वृषात्मा धर्म उत्सृष्टशृंगः ॥५९॥

संकेतः – परा विद्या उपनिषदः । अपरास्तदतिरिक्ताः । वृषो हि धर्मप्रतीकम् । स च प्रकृत्या हिंसारहितोपि रक्षणाय हिंसासाधनं शृंगं दधदेव पुराविद्भिरालेख्यते । हरप्पादिषु प्रियदर्शिस्तम्भेषु कालिदासादिषु च तथा तस्योपलब्धेः । तथा च कालिदासः– "खे खेलगामी तमुवाह वाहः ०० धुन्वन्मुहुः प्रोतघने विषाणे" [कु० ७ । ४९] इति ॥५९॥

सकलमतिगुणौ तौ सार्धमन्यैश्च बालै-
र्गुरुजनवचनानां पालने दत्तचित्तौ ।
स्मरणमिव सुमेधौ सर्वमेवाध्यगाष्टां
भवति निगमलाभो गर्भ एवार्यजातौ ॥६०॥

संकेतः –'शुश्रूषाश्रवणग्रहणधारणोहापोहार्थविज्ञानतत्त्वज्ञानानि धीगुणाः'।६०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविमतिरिव साध्वी दर्शने सत्पदस्य
नियतिरिव च धीरा कर्मयोगेषु सापि ।
अलभत सति चित्ते स्वेऽक्षरं ज्योतिरेकं
प्रियविरहपतंगो यत्र शान्ति जगाम ॥६१॥

संकेत: – सत्पदं कविपक्षे शोभनानि पदानि । कर्मयोग: फलासंगविवर्जित: कार्यविधि:, पक्षे अदृष्टरूपकर्मणां योगेषु विनियोगेषु । स्वे स्वकीये । ज्योतिरात्मज्योति: ॥६१॥

स्तनयुगपरिवेषे कुंकुमश्रीर्विभूत्या
करयुगमणिबन्धे कौतुकश्री: कुशैश्च ।
वपुषि सितदुकूलश्री: श्रिया वल्कलानां
विनिमयमिव लब्ध्वा चक्रुरस्यां तपांसि ॥६२॥

संकेत: – मणिवन्ध: अंगविशेष: । कौतुकं हस्तसूत्रम् ॥६२॥

इति सुतयुगली सा, सा च तस्या: सावित्री
ऋषि–मुनि–कवि–ताढ्ये धाम्नि तत्रात्मलाभम् ।
अलभत हिमशैले भारतीया यथा भू:
सह निजतनयाभ्यां भोटनेपालकाभ्याम् ॥६३॥

संकेत: – भोटो भूटाननाम्ना प्रचलित: प्रान्त: । तादृश एव च नेपाल: । हिमांचले प्रसिद्धाभ्यां ताभ्यां युक्ता आर्यभूर्भारतभूमि: यथा आत्मलाभं लभते तथैव सीतापि तत्सुताभ्यां सहात्मलाभं सफलत्वमध्यात्मसिद्धि चालभत ॥६३॥

इति सनातनोपाह्व–श्रीमद्रेवाप्रसादद्विवेदिकृतौ "सीताचरित" नाम्नि
सर्गबन्धे विद्याधिगमो नाम
सप्तम: सर्ग: ॥७॥

—★—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टमः सर्गः

प्रतिपादितपुत्रा सा कवये दिव्यचक्षुषे ।
बभावर्पितशब्दार्था प्रतिभेव सुमंगला ॥१॥

संकेतः – सुमंगला कल्याणिनी, न तु विनाशिनी ॥१॥

सोऽपि बालान्, कणान् दीर्घसत्राग्निज्योतिषो यथा ।
अभ्यासैश्चन्दनैर्यद्वत् पोषयन्नुग्रवद् बभौ ॥२॥

संकेतः – दीर्घत्वेन तादृशशिक्षासत्रस्यापि नित्यप्रवृत्तत्वमाक्षिप्तम् । अभ्यासाः पाठाः । उग्रो दीक्षितात्मनि समाविष्टस्तन्नामा शिवः ॥२॥

चातुर्विद्यवने मत्तमातङ्गत्वमुपागतौ ।
सच्छात्रस्य शुभां वृत्तिं तावपि व्याख्यतामलम् ॥३॥

संकेतः – चत्वारो विद्या एव चातुर्विद्यम्, भावे ष्यञ् ॥३॥

सांगेषु सर्वशास्त्रेषु भावितौ वीक्ष्य तौ कविः ।
समावर्तनसंस्कृत्या इव काव्यं निजं जगौ ॥४॥

संकेतः – काव्यं रामायणम् । संस्कृतिः संस्कारः । तस्या इवेति फलोत्प्रेक्षा ।४।

एवं सीता, सुतौ तस्याः, स चापि गुरुरेतयोः ।
अन्वार्थयन् निजैर्धर्मैराश्रमत्रितयं निजम् ॥५॥

संकेतः – आश्रमत्रितयं गार्हस्थ्यं, ब्रह्मचर्यम्, वानप्रस्थं चेति । तत्र सीता गार्हस्थ्यम्, सुतौ ब्रह्मचर्यम्, वाल्मीकिश्च वानप्रस्थम् । तदत्यागश्च पुत्रपालनार्थः ॥५॥

निरस्त–तमसावन्त–र्बहिर्ध्वस्तरजो च तौ ।
अन्वहार्ष्टां समुल्लेखशुद्धौ रत्नमहोपलौ ॥६॥

संकेतः – समुल्लेखः शाणोत्कषणम् ॥६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मेन्द्रियमनोबुद्धिप्रसाद–शुभ–विग्रहौ ।
रक्षितुं क्ष्मां क्षमामेतौ दिङ्मातङ्गाविवोद्यतुः ॥७॥

संकेतः – "प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयत" इत्यभियुक्तोक्त्या स्वस्थाविति फलितोर्थः ॥७॥

अनुभावार्तिभूभूताविमावाश्रमिणां पदम् ।
ररक्षतुस्ततस्तेजोव्ययं चापि महामुनेः ॥८॥

संकेतः – अनुभवः प्रभावः । ततः आश्रमपदरक्षणात् तद्रक्षणे संभाव्यं तेजोव्ययं च ररक्षतुरिति योजना ॥८॥

वटुभिर्वेष्टितौ तौ हि सदृशैर्भूरितेजसौ ।
ख्यापयामासतुर्वीतध्वान्तां स्वाध्यायपद्धतिम् ॥९॥

संकेतः – छात्राणामुत्तमं स्वास्थ्यं समानत्वं च स्वाध्यायपद्धतेः शुद्धि प्रमाणयतः ॥९॥

पर्याप्तवक्षसो दीर्घबाहवः पीनकन्धराः ।
शातोदराश्च ते शिष्या वर्णदण्डैर्हि भेदिनः ॥१०॥

संकेतः – वर्णा ब्राह्मणादयः, तत्र ब्राह्मणस्य पालाशः, क्षत्रियस्य पैप्पलः, वैश्यस्य चौदुम्बरो दण्डः ॥१०॥

अनुशासितचेतःसु तेषु दायित्वधूरभूत् ।
पर्याप्तप्रसरा लक्ष्मीर्यथा वक्षसि शार्ङ्गिणः ॥११॥
कुलं कुलपतेरासीद् विनीतैस्तैर्वृतं तथा ।
यथा तस्यैव सद् वर्ष्म दान्तान्तःकरणेन्द्रियम् ॥१२॥

संकेतः – तस्यैव कुलपतेरेव वर्ष्म शरीरम्, दान्तानि अन्तःकरणानि मनआदीनि, इन्द्रियाणि ज्ञानकर्मणोरिन्द्रियाणि चक्षुःपाणिप्रभृतीनि ॥१२॥

राष्ट्रमुच्छ्वसिति स्मात्र प्राणिति स्म च संस्कृतिः ।
सदाचार–विचारौ हि तयोः प्रभव आदिमः ॥१३॥

संकेतः – संश्चासावाचारः संश्चासौ विचारश्चेति विग्रहः । तयोः राष्ट्रसंस्कृत्योः । तत्र राष्ट्रस्य प्रभवः सदाचारः, राष्ट्रस्य कर्मरूपधर्माश्रितत्वात्, संस्कृतेश्च प्रभवो विचारः, तस्या दर्शनाश्रितत्वात् ॥१३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थं मुनेः पदं कल्पतरोश्छायामिव श्रिता ।
सीता संपूर्णकामाभूद्, विफलत्वं क्व सत्पदे ॥१४॥

संकेतः – संपूर्णकामत्वं च पुत्रसंस्कारात्, आत्मनो दर्शनाच्च ॥१४॥

अथ खण्डत्वमुद्वास्य कर्तुमेकात्मतां भुवः ।
दिग्जयायाश्वमेधाश्वं व्यसृजत् कोसलेश्वरः ॥१५॥

संकेतः – पृथिव्याः खण्डत्वं निराकर्तुं रामेणाश्वमेधश्चिकीर्षितः, न तु स्वर्गायेति नूतनता यज्ञफले ॥१५॥

तद्रक्षणप्रसंगेन बलेन महता वृतः ।
लक्ष्मणस्यौरसश्चन्द्रकेतुराश्रममीयिवान् ॥१६॥
तद्वीराणां जयोद्घोषानन्यक्षत्रावमानिनः ।
सोढुं नाशक्नुतां सीतासुतौ वीरस्वभावतः ॥१७॥
तावश्वस्य निरोधं हि तादृशामुत्तरं गिराम् ।
अमन्यातां, कटूक्तीनां कटूक्त्या प्रशमः कुतः ॥१८॥
चन्द्रकेतुबलं मत्वा पूर्वं तद् बालचापलम् ।
हेलयैव हयं ताभ्यामायसत् कर्तुमात्मसात् ॥१९॥
पश्चात् तयोर्धनुर्मेघ–शर–वर्षैर्निपीडितम् ।
तद्धि प्रधनमेवात्र साधनं प्रत्यपद्यत ॥२०॥

संकेतः – प्रधनम् युद्धम् । साधनमश्वप्राप्त्युपायम् ॥२०॥

एकतो मुनिबालौ द्वावन्यतो महती चमूः ।
आश्चर्यसाहसोत्साहा आसँस्तत् तत्र दर्शिनः ॥२१॥
एकत्र तमसातीरमन्यत्र बलसागरः ।
कारुण्यैकरसं यस्मात् पूर्वं युद्धं व्यभाव्यत ॥२२॥
पश्चाद् बालावदृश्यातां कन्यावृषरवी यथा ।
सैन्याम्बुदसमुद्रेऽस्मिञ्छोषाय शररश्मिभिः ॥२३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तयोः शस्त्रे च शास्त्रे च समं दृष्ट्वा पराक्रमम् ।
भारती भारतस्यास्य प्रीतिलास्यं तदाऽऽददे ।।२४।।

कविः कारुण्यभूर्यो हि पित्रे रामायणं व्यधात् ।
आसीदद्य स पुत्राभ्यां शौर्यबन्धाय बाधितः ।।२५।।

तटस्थत्वाद् विकारेभ्यः शुभोदर्कतया च सः ।
युद्धमेतन्निरोद्धुं नो मुनिरैच्छन्महामतिः ।।२६।।

हन्त पर्जन्यधारासु विभावसुकणा इव ।
बालयोरस्त्रवर्षासु चमूबाणा वृथाऽभवन् ।।२७।।

यद्वा प्रलयकालाग्नौ यथा तेजसि बालयोः ।
महतामपि योद्धॄणां पतंगत्वं शरा ययुः ।।२८।।

"क्व रथाः क्व च मत्तेभाः क्व हयाः क्व च पत्तयः ।
इति यत्र न योद्धारोऽबुध्यन्त कृतबद्धयः ।।२९।।

क्व तलं क्व जलं क्व द्यौः क्व ग्लौः क्वाग्निः क्व भानुमान् ।
इति यत्र न धूलीनां पटले प्रत्यपद्यत ।।३०।।

चन्द्रकेतुभटानां तत् प्रधनं निधनं व्यधात् ।
ब्रह्मबालास्त्रसंपाताद् देहे पश्चात् पुरा मतौ" ।।३१।।

संकेतः – ग्लौरिति युद्धस्याहर्निशप्रवृत्तत्वमनेकदिवसव्यापित्वं च सूचितम् ३०

आत्मना सा हि रामस्य युयुत्साऽऽसीत् परिच्छदे ।
अद्वैत–द्वैतयोर्यद्वत् संख्या कात्र जयाजये ।।३२।।

संकेतः – रामस्येति आत्म–परिच्छदाभ्यां काकाक्षिगोलकवद् योज्यम् । युयुत्सा चात्र परिच्छदैकवृत्तिरभ्युपेता । संख्या बालयोर्द्वित्वम्, सैन्यानां चासंख्यत्वम्, इति योयं संख्याव्यतिरेकः स जये अजये वा अप्रयोजकता-मात्राश्रयः। परिच्छदपदेन शरीरादीनामपि ग्रहणाद् यथा आत्मनि कृपा-सुधां वर्षत्येव शरीरादीनि सक्रियाणि तिष्ठन्ति, येन च तेभ्यः सकाशाद् आत्मन एव बलवत्त्वं सिद्धयति, तथैव प्रकृतेपि ।।३२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुप्तौ ताटस्थ्यमापन्न आत्मनीन्द्रियवत् ततः ।
जृम्भकास्त्रोदयात् तत्र सैन्यमास गतासुवत् ॥३३॥

संकेतः – सुप्तिर्निद्रा । आपन्ने आपद्यमान इत्यर्थः, आद्यकर्मणि क्तः । गतासुर्मृतः ॥३३॥

प्रतिबिम्बं प्रतीबिम्बाभ्यां यथा लक्ष्मणात्मजः ।
रामात्मजाभ्यां संघर्षमज्ञानादातनोत् ततः ॥३४॥

संकेतः – प्रतिबिम्बसंघर्षः ४४–पद्येऽत्रैव सर्गे द्रष्टव्यः ॥३४॥

आसीद् विक्लवता तेषु को नु कं प्रहरेदिति ।
आत्माऽऽत्मानं विजानाति प्रमाणं तत्र नेष्यते ॥३५॥

संकेतः – तेषु लव–कुश–चन्द्रकेतुषु । विजानातीति अवोधपूर्वं प्रत्यभिज्ञानम् ॥३५॥

परस्परमुखालोकोज्जासितामर्षयोरपि ।
औचित्यमात्ररक्षायै ततज्ये धनुषी तयोः ॥३६॥

संकेतः – उज्जासित उत्सारितोऽमर्षो ययोः तयोः । तते रोपिते ज्ये प्रत्यञ्चे ययोस्ते ॥३६॥

उत्साह–क्रोध–वार्त्तापि तयोरासीन्न पक्षयोः ।
नटयोरिव किन्त्वासीत् प्रयोगे पटिमा परः ॥३७॥

संकेतः – नटे अभिनेतरि स्थायिनो रसस्यापि वा अभावात् ॥३७॥

लाघवातिशयं प्रेक्ष्य प्रयोगेऽस्त्रस्य तत्क्षणे ।
अस्त्रवेदोऽपि कार्तार्थ्यं बालाभ्यां प्रत्यपद्यत ॥३८॥
मेघनादस्तयोः कण्ठे रावणश्चापयोस्तथा ।
कुम्भकर्णश्च सैन्येषु तदानीमाश्रयं गतः ॥३९॥
तदानीं चापनिर्घोषैरस्त्रनिष्पेषणैस्तथा ।
आपूर्यत दिशां कुक्षिः सिंहीनां तु व्यरिच्यत ॥४०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्नावाग्निमिवाहूय वज्रे वज्रं निपात्य वा ।
यत्र युद्धं प्रवृत्तं स्यात् तत्र का तारतम्यधीः ॥४१॥
जगच्चतुर्दशी तत्र कुहूत्वमिव जिघ्रती ।
अकालप्रलयाशंकामतनिष्ट चराचरे ॥४२॥
पूर्वापरसमुद्रोर्मि–विडम्बि–शरवर्षिणोः ।
विग्रहो विग्रहायैव स तयोः समपद्यत ॥४३॥
एकस्यैव तु सूर्यस्य प्रभामादाय भास्वतोः ।
आदर्शयोस्तु संघर्षे तेजोहानिः क्व जागृयात् ॥४४॥
रामरावणयोर्युद्धे जयो रामस्य निश्चितः ।
राम–राघवयोस्त्वस्मिन् को जयः कः पराजयः ॥४५॥
अप्राप्तानां शरीरं तु रामलक्ष्मणपुत्रयोः ।
सायकानां हि युद्धं तत् परस्परमदृश्यत ॥४६॥
तत्र घातप्रतीघातौ कौशलस्य हि दर्शकौ ।
हिंसा वा रक्तपातो वा न मनागप्यदृश्यत ॥४७॥
एकत्र यज्ञसंरक्षा मदग्लानिः परत्र च ।
उद्देश्यं यत्र, युद्धं तच्छस्त्राभ्यासात् परं नु किम् ॥४८॥
हृतेऽपि यत्र नाश्वेऽभूदश्वमेधक्षतिः, परम् ।
महात्म्यं तद्धि रामस्य तस्य वा महतः कवेः ॥ ४९ ॥
अथाधिकारमर्यादां वर्णानां संविधानतः ।
पातुमत्प्रेरितोऽमात्यै राजा शम्बूकमीयिवान् ॥ ५० ॥

संकेत: – अधिकारमर्यादा स्वस्वकर्मसंविभागः। संविधानम् धर्मशास्त्रम्। उत्प्रेरितः अत्यन्तं प्रार्थितः ॥ ५० ॥

मुनिवृत्तेरमुं शूद्रं विनिवार्य महामतिः ।
उपोद्घातेन तेनैव हयमप्यदिदृक्षत ॥ ५१ ॥
पुष्पकेण क्षणेनैव मनसेव स राघवः ।
वाल्मीकिपदमानिन्ये कारुण्याच्छौर्यमागतम् ॥ ५२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रावतारं रामस्य विदित्वा स महाकविः ।
प्रत्युद्ययौ फलैः पुष्पैर्मधुश्च्युद्भिः पदाद् बहिः ॥ ५३ ॥

द्रष्टृ–दृश्य–द्वयी तत्र पारेसाम्यं व्यवस्थिता ।
प्रणिपाताशिषां यत्रोपाधयोऽप्यैक्यसूचकाः ॥ ५४ ॥

आसीच्च तत्र कैवल्यं द्वयोर्द्वैत–विवर्जितम् ।
अतः सीतापि मायेव तदा लेभे न तत् पदम् ॥ ५५ ॥

संकेतः – द्वावपि तत्रैकाकिनावेवास्तामिति प्रकृते । अप्रकृतं तु यत् तद् विबुधैः स्वयमुत्प्रेक्ष्यम् ॥ ५५ ॥

एकस्य चरितं गूढं सूक्ष्ममन्यस्य दर्शनम् ।
याथात्म्यमेतयोः को वा परो वेत्तुं प्रभुर्भवेत् ॥ ५६ ॥

संकेतः – परः तयोरन्यः ॥ ५६ ॥

कैवल्यधाम्नि तस्मिंस्तु काव्यपुंसे कविर्निजम् ।
काव्यं समर्पयामास बिम्बाय प्रतिबिम्बवत् ॥ ५७ ॥

सोऽपि तस्मिन् निजं रूपं प्रत्यभिज्ञाय पूरुषः ।
तद् युद्धं तच्च कौलीनमात्मपूजाममन्यत ॥ ५८ ॥

कृतार्थसंविदोः पश्चादपरां भूमिमीयुषोः ।
सूनुपक्षद्वयी पक्षौ तयोरास्तां महीयसोः ॥ ५९ ॥

संकेतः – वाल्मीकिः कुशलवपक्षमासेदिवान्, रामश्च चन्द्रकेतुपक्षमिति भावः ॥ ५९ ॥

कविरेकत्र काव्यं च तस्यैवान्यत्र, तत्र कः ।
पक्षो वाथ विपक्षो वा जयो वा यदिवाऽजयः ॥ ६० ॥

संकेतः – राम एवात्र काव्यत्वेनाध्यवसितः । रामायणस्य तन्मात्रशब्दरूत्वात् ॥ ६० ॥

स्व–स्व–पूज्य–प्रणामाय त्यक्तसंरम्भयोर्द्वयोः ।
शिशूनां पक्षयोस्तत्र संघर्षो विनयेऽप्यभूत् ॥ ६१ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चक्षुषे कृतवान् सूर्यः प्रणामं हन्त तत्क्षणे ।
स्वप्रकाश्य-प्रकाशाय रामो यत् कवयेऽनमत् ॥६२॥

संकेतः – प्रकाशयतीति प्रकाशः प्रकाशकः । चक्षुर्विना सूर्यप्रकाशस्याप्रकाशनात् तत् तस्य प्रकाशकम् । एवमेव रामस्यापि कविः ॥६२॥

ऐकात्म्यमात्रसाम्राज्यं यत्र जागर्त्ति संविदाम् ।
तत्राजयो हि पुण्ड्रेक्षुर्जय एव महाकटुः ॥६३॥

संकेतः – पुण्ड्रेक्षुस्तन्नामा सर्वोत्कृष्ट इक्षुभेदः । महाकटुः अत्यन्तं कटुः निम्बश्च ॥६३॥

सत्काव्यस्य महावाक्यं नीतेर्मन्त्राक्षरं नु वा ।
स कविः स च काव्यत्मा मेने तान् वीरबालकान् ॥६४॥

संकेतः – काव्यात्मा रामः ॥६४॥

पूज्ययोरेकतां दृष्ट्वा बाला अप्येकतां ययुः ।
अभिन्नत्वे समुद्राणां को नु भेदस्तदूर्मिषु ॥६५॥
अन्योन्यभुजवीर्यं ते पूजयित्वास्त्रदैवतैः ।
इदानीं मिश्रयामासुः परीरम्भापदेशतः ॥६६॥
एतेषां वक्षसां घर्षे वज्रग्राव्णां यथाऽऽर्यभूः ।
उच्छश्वास, यतो वीरमैत्र्यां राष्ट्रं निषीदति ॥६७॥
रामो लवकुशौ, तौ च रामं ज्ञात्वापि रूपतः ।
तत्त्वतः पर्यचिन्वन्न तदानीं कव्यनीहया ॥६८॥

संकेतः – कविर्वाल्मीकिः । स च सद्गुरुरूपः । तदनुग्रहं विना जीवस्य परमात्मसाक्षात्कारासंभवः । अयं विशेषो यदत्र परमात्मापि कविकृपां विना जीवं प्रत्यभिज्ञातुं न प्रभवति ॥६८॥

अबोधपूर्वमात्मैक्यं स्मरन्तः सर्वं एव ते ।
प्रसादमपि चेतःसु विषादोन्मिश्रमादधुः ॥६९॥

संकेतः – अबोधेति यथोक्तं महाकविना " तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननान्तरसौहृदानि" – । इति ॥६९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविरथ महान् वीरैस्तैरात्मजैः परिवारितं
रघुपरिवृढं रामं धाम स्वकं खलु नीतवान् ।
जनकतनया ज्ञात्वाप्येतद् बभूव पराङ्मुखी
न खलु वशिनां त्यक्ते वस्तुन्युदेति पुना रतिः ॥७०॥

संकेतः – त्यक्तं वस्तु श्रीरामस्य स्थूलं रूपम् ॥७०॥

बलमपि च तदानीं जृम्भकास्त्रस्य मोक्षाद्
घनतुहिनविमोक्षाद् व्योमवद् दीप्तिमापत् ।
अथ च तुरगलाभाद् दृष्टमप्यत्र घोरं
प्रधनममनुतैतत् स्वप्नवृत्तान्ततुल्यम् ॥७१॥

इति सनातनोपाह्व–श्रीमद्रेवाप्रसादद्विवेदिकृतौ "सीताचरित" नाम्नि सर्गबन्धे कुमारायोधनं नामाष्टमः सर्गः ॥ ८ ॥

—★—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नवमः सर्गः

अथ प्रभाते गुरुणा समेता रामस्य सर्वाः ससुता जनन्यः ।
स चापि राजा जनकः कवीन्द्र–संकल्पतस्तस्य पदं प्रपन्नाः ॥१॥
त्रिभिर्मुनीन्द्रैस्तिसृभिश्च सूभिर्वृतो बभासे पुरुषोत्तमोऽत्र ।
यथा त्रिवेण्या सहितः प्रयागस्त्रिभिः समुद्रैश्च यथैष देशः ॥२॥

संकेतः – पुरुषोत्तमः श्रीरामः चूलिकाक्रमेणोपमानयोजनायां न दोषः ॥२॥

आसीद् विदेहाधिपतेः सुता तु तथा तटस्था निखिलेषु तेषु ।
यथा विलीनात्मनि राजहंसी यद्वापि गीः कापि परा स्वपुंसि ॥३॥

संकेतः – आत्मनि स्वरूपेपि, हंसशब्दस्य युक्तयोगित्वसूचकत्वात् ।
परावाचः पुरुषव्यतिरिक्तत्वाभावात् ॥३॥

क्व द्वेषरागौ क्व च लोभमोहौ क्व क्रोधकामौ मदमत्सरौ वा ।
यदात्मलाभे परमात्मसंज्ञं ज्योतिः परं किंचिदुदेति पुंसि ॥४॥
न देहभेदेन विभिद्यते स्वं विभिद्यते यच्च तदस्ति न स्वम् ।
स्वनाम्नि भूम्नि स्थितिमान् बिभेति न वा वियोगान्न च देहपातात् ।५।
सा हन्त विद्वत्परिषत् तदानीं ज्ञानस्य भक्तेरथ कर्मणोपि ।
योगत्वलाभादिह भारतीयं व्यक्तित्वमुद्भासयति स्म पूर्णम् ॥६॥

संकेतः – ज्ञानभक्तिक्रियायोगत्रितयसामंजस्यमेव भारतीयत्वम् ॥६॥

वाल्मीकिराहूत–समस्त–सेना–जनस्ततस्तत्र वनाधिदेवैः ।
उपास्यमानं फलमूलकन्द–मधु–प्रसूनैर्विदधे समाजम् ॥७॥

संकेतः – समाजो महती सभा ॥७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्यक्षतां श्रीजनकोऽत्र चक्रे परावरप्रत्यय-निश्चितार्थः ।
य आबभासे मुनिभिर्वृतोऽत्र यथात्मयोनिर्दिवि नारदाद्यैः ॥८॥

मध्येसभं तत्र च भूर्जपत्रैर्वृतं महत् स्थण्डिलमेकमसीत् ।
यत्पार्श्वभागे वनदेवतानामासीत् समाजो मधुवर्षिणीनाम् ॥९॥

किमेतदस्तीति तु तत्र कश्चित् प्रष्टुं कविं नो चकमे समाजे ।
आप्तेषु वाचां प्रसरः क्रमेषु न भारतीयैरुपधीयते यत् ॥१०॥

कुतूहलाक्रान्तहृदां च तेषामतीव विस्फारितलोचनानाम् ।
औत्सुक्यमासीद् प्रपतद् यथैव पक्ष्माग्रभागात्, कमलाद् यथालिः ॥११॥

मुखेषु मौना अपि ते तदानीं मनःसु चांचल्यभृतो विरेजुः ।
सरोवरा यद्वदनुत्तरंगाः परन्तु मध्ये चलमीनसंगाः ॥१२॥

अत्रास्ति नेता कविरेव, रामो भूत्वापि नेतास्ति विनेय एव ।
का नाम शक्तिः परमेश्वरस्य जगत्प्रसिद्धयै निगमेतरस्य ॥१३॥

संकेतः – निगमा वेदाः, तेभ्य इतरस्य भिन्नस्य । भिन्नत्वं च तदप्रमाण-कत्वेन ॥१३॥

मौनेऽपि लीलां कवितुर्वसिष्ठो नासीत् तदानीं न हि संविदानः ।
परार्धपाथोधितिमिंगिलानां किं वा परोक्षं कविपुंगवानाम् ॥१४॥

संकेतः – कवितुः कवेः वाल्मीकेरिति यावत् । संविदानः प्राप्नुवानः विदल् लाभे कानच् । प्राप्तिश्च ज्ञानरूपा । परार्धम्, मायोत्तरमर्धम्, मायिकस्यार्धस्य पूर्वार्धत्वेन प्रतिपन्नत्वात् । तत्र तिमिंगिला महामत्स्याः तदवगाहनशौण्डाः । कविः क्रान्तसाक्षात्कारी, तेषु पुंगवाः श्रेष्ठाः ॥१४॥

ता मातरस्ते च चमूचरेन्द्रास्ते वा मुनीन्द्रा स च रामचन्द्रः ।
सभासदो यत्र परात्पराः सा सभा क्व भूता क्व च संभवित्री ॥१५॥

अथोदतिष्ठत् कुशपूतपाणिर्निजासनात् कारुणिकः कवीन्द्रः ।
यः क्रौञ्चशोके कृतवान् दयां च निषादकं चाप्यभिशप्तवांश्च ॥१६॥

संकेतः – एतेन कवेरपि सक्रियतोक्ता ॥१६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमुत्थितं वीक्ष्य विनिर्मितं च, तत् स्थण्डिलं सभ्यजनान्तरंगम् ।
दोग्धारमायान्तमवेक्ष्य गां च वत्सो यथातोव समुच्चचाल ।।१७
दर्भासने पिंगरुचौ स्थितः स प्राचेतसो भास्वरदिव्यदेहः ।
मेरोः शिलायामुषसि स्थितस्य बभार कान्ति रविमण्डलस्य ।।१८।।

संकेतः – तं वाल्मीकिम् ।।१८।।

श्रीशारदायाः स्फटिकाक्षमालां यथा प्रसन्नां स ततः कवीन्द्रः ।
विशुद्धतर्का च विनिश्चितां च च्छन्दस्वतीं वाचमिमामुवाच ।।१९।।
"यज्ञेन देहानलभन्त विश्वे भावा रयिप्राणवशंवदेन ।
अनुक्रियां तस्य विधित्सुरेष रामोऽश्वमेधं तनुते यदीह ।।२०।।
तदर्थमेते वयमत्र साधुवादाशिषां वृष्टिमुदीरयामः ।
परन्तु सम्यक्त्वविनिश्चयाय सभ्यानिमान् वो विनिवेदयामः ।।२१।।
किं प्राणमात्रेण रयिं विनास्य चराचरस्यास्ति वपुःप्रसिद्धिः ।
यद्वाग्निमात्रेण विहाय सोमं ब्रह्माण्डपिण्डं प्रथतेतरां हि ।।२२।।
नैवेति चेद् यज्ञविधौ रयित्वं तथा च सोमत्वमुपासमानाम् ।
विहाय पत्नीं यजतोऽश्वमेधविडम्बनेयं न विडम्बना किम् ।।२३।।
यद्यस्ति हेम्नः प्रतिमां विदेहपुत्र्याः प्रतिष्ठाप्य कृतः समाधिः ।
विचार्यतां तत्र, कृतोऽपराधः स्वयं तया को नु विदेहपुत्र्या ।।२४।।
श्यामायते यन्न कृतेऽपि दाहे तदेव हेमात्र निगद्यते चेत् ।
रक्षःकपीन्द्रत्रिदिवौकसां किं साध्यक्षमासीदनले न शुद्धा ।।२५।।
सा चेद् विशुद्धापि जनापवादाद् वज्रात् सबीजा धरणीव सीता ।
हेम्नः सजीवा प्रतिमा विनाशमनायि दोषेषु सहस्रनेत्रैः ।।२६
तदद्य तस्या गतचेतनायाः किं शालभञ्ज्या अपि संग्रहेण ।
अशुद्धसत्त्वस्य मुखं जनस्य न चित्रकर्मण्यपि वीक्षणीयम् ।।२७।।
यद्यस्ति संप्रत्यतिमात्रधन्या 'सीतास्ति शुद्धे'–ति मतिस्तदाद्य ।
सा ह्येव पूर्वं निखिलैर्गवेष्या सती न देशेत्र वि द्यते यत्' ।।२८।।
सा ह्येव विश्वंभरयज्ञपूर्त्यै विश्वम्भराया दुहिताद्य पूज्या ।
सा का नु पूजा सुरभेर्विधिज्ञा या सौरभेय्याः क्षतजैः क्रियेत ।।२९।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संकेतः – 'मिथुनमेतत् प्रजननं कुरुते रयिश्च प्राणश्चेति' वेदवाक्यात्, "सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः, अनेन प्रसविष्यध्वमेष वोऽस्त्विष्ट-कामधुगि"–त्यादिभिः स्मृतिवचनैश्च यज्ञस्य रयिप्राणात्मकत्वं सृष्टिमूलत्वं च न न प्रतीतम्। अस्मदादिभिः क्रियमाणस्तु यज्ञस्तस्यैव भगवतः प्रकृति-यज्ञस्यानुक्रियेति संप्रदायवेत्तारः ॥२०॥ सम्यक्त्वविनिश्चयः प्रामाण्यग्रहः ॥१९॥ वपुःप्रसिद्धिः स्थूलशरीरनिर्वृत्तिः । चितिरूपमिदं स्थूलपिण्डजातं रयि-प्राणरूपाभ्यामग्नीषोमाभ्यामेव जायते ॥२२॥ विडम्बना अनुकरणम्। विडम्बना अनुकरणाभिनयः ॥२३॥ इन्द्रो हि कुपितः सन् सबीजां धरित्रीं वज्रेण हिनस्ति। तद् यथाऽनुचितं तथैव सीतायाः परित्यागोऽपीत्यर्थः। सहस्रनेत्र इन्द्रः ॥२६॥ गतचेतनेति शालभंजीविशेषणतया नेयम् । चित्रकर्म मूर्त्तिः, विष्णुधर्मोत्तरे चित्रसूत्राध्याये तथादर्शनात् ॥२७॥ अत्र देशे भारते, वाल्मीकिजनपदेऽपीति च ॥२८॥ यज्ञ एव विश्वंभरः, पृथ्वी च भगवती विश्वंभरा, तस्या अपि यज्ञरूपत्वात्। यथा चैतत् तत् वेदविद्भिर्न नावगम्यते। सुरभिः कामधुक् सौरभेयी च तस्या अपत्यं स्त्री गोमात्रम्। क्षतजं रुधिरम्। पृथिवी-रूपस्य यज्ञस्य पूर्त्त्यै पृथिव्या एव पुत्र्याः सीतायाः परित्यागस्तथाविध एव ॥२९॥

महार्थमेवं स निवेद्य सभ्यान् वाग्मी कवीन्द्रो विरराम वाग्भ्यः।
आवश्यकाद् योऽभ्यधिकं ब्रवीति स शारदायाः कुरुतेऽवमानम् ॥ ३० ॥
सा वाग् बभूवाश्रु वसिष्ठनेत्रे द्रुतिर्विदेहाधिपचेतनायाम् ।
रामे विसंज्ञत्वमथापरेषु सीतापुनःप्राप्तिकृतेऽतितृष्णा ॥ ३१ ॥
तदन्तरात्मस्वनुभूय तीव्रं लोकस्य सीताधिगमोत्सुकत्वम् ।
वसिष्ठनामा स महामुनीन्द्रो महाकवीन्द्रं प्रणयादवोचत् ॥ ३२ ॥
"महाकवे! संप्रति ते नियोगं दधामहे मूर्ध्नि यथा विधातुः ।
चराचरं ते प्रतिभेन्दुमूर्त्तिः प्रकाशमर्कस्य यथा व्यनक्ति ॥ ३३ ॥
मृषा न ते दर्शनमस्ति विद्वन् संकल्पमात्रं तव कल्पवृक्षः ।
सत्यं भवाँस्तत् कुरुतां स्ववाक्यं "सीता स्वदेशेऽत्र सुरक्षिते"ति ॥३४॥
लोकप्रवाहोऽयमुदात्तचित्तैस्तटस्थवृक्षैरिव विज्ञ! विज्ञैः ।
कृपाप्रसूनान्यभिवर्ष्य सूरे! सुगन्धनीयः स्वरसप्रवृत्तः ॥ ३५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संकेतः – इन्दुमूर्त्तिः अर्कस्य प्रकाशमिवेति वास्तविकस्य कलास्पर्शेन सौम्यतालाभं प्रतिपादियतुम्, सूर्यप्रकाशस्य चन्द्रद्वारा सौम्यतासंपादनात् ।।३३।।
प्रवाहो वृक्षशिखरं न स्पृशति, वृक्षः स्वयमेव तं स्वपुष्पपातेन सुगन्धयति ।।३५।।

इत्येवमामन्त्र्य विदांवरः स सरस्वतीं स्वामकरोदशब्दाम् ।
मितं न यद् यच्च न हन्त सारं विग्लापनामात्रमिदं स्ववाचाम् ।।३६।।
कविश्च सूक्तेः परमार्थबोधे प्रतिष्ठितं वीक्ष्य मुनिं जहर्ष ।
ध्वनिस्मृतिं यत् सहृदां मुनीनां बिना न सूक्तं सफलं कवीनाम् ।।३७।।

संकेतः – सूक्तं वेदमन्त्रः, काव्यं च, तदुभयं सहृदयग्राह्यं ध्वनिं मुनि-ग्राह्यमर्थं च विना विफलम् ।।३७।।

लोकोपि मैत्रावरुणस्य मान्यं प्रस्तावमेतं स्वहृदाभ्यनन्दत् ।
अब्धेः स्वभावः स यदेष चान्द्रं प्रकाशमन्वेति विना विकल्पम् ।।३८।।
मुनेर्नियोगं जनतानुरोधं स्वभावनां चापि ततः समर्च्य ।
राज्ञो मुखं नीरदचातकीयां प्रसूय शोभां कविरालुलोके ।।३९।।

संकेतः – चातकीयं लोकप्रतिनिधिः न तु याचकमात्रम् ।।३९।।

न वाङ् न लेखो न सखा न चान्यन्निवेदनाय स्वहृदस्तदानीम् ।
उपाजि राज्ञापि सुमानुषेण बाष्पप्रवर्षेण तु सर्वमूचे ।।४०।।
"सीतावपुर्मात्रमनेन मुक्तं पुराऽनुरोधाज्जनभावनायाः ।
बुद्धिप्रधाना न हि सूर्यवंश्या देहेऽनुषक्तिं दधतीन्द्रियार्थे ।।४१।।
गर्भं प्रजायै गृहमेधयाजी निषिच्य जायां भजते यदर्थम् ।
स एव सेवावसरोऽस्य हस्ताद् विच्यावितस्तेन हि दूयतेऽसौ ।।४२।।
इत्यादिभिर्नैकविकल्पनाभी रामाश्रु लोकान् नितराममथ्नात् ।
परस्य शोकः परचेतनायां कारुण्यमूर्त्या परिवर्त्तते हि ।।४३।।
वाल्मीकिरप्यान्तरतम्यमेक्ष्य स्वसंविदा सर्वजनस्य तत्र ।
संकेतयामास वनाधिदेवीर्मध्येसभं स्थण्डिल–पूजयित्रीः ।।४४।।
ताश्चापि भूर्जावरणं शमादिप्रवृत्तयोऽज्ञानतमो यथैव ।
शनैः शनैर्दूरयितुं प्रवृत्ता निगूढतत्त्वस्य निरूपणायै ।।४५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मिन् क्षणे लोकमनांसि यज्ञकुण्डे पतंगा इव तत्र पेतुः ।
येषु स्थविष्ठस्य शरीरकस्य महत्वबुद्धिर्न मनागशेषि ॥ ४६ ॥
"–'ततो जयः स्याज्जनकात्मजाया' विधाधरीणामिति तारतारैः ।
दिव्यैः स्वहस्तच्युतपारिजातप्रसूनवृष्टया सहितैर्निनादैः ॥ ४७ ॥
स्तम्बेरमाणां दशदिक्पतीनां शुण्डाभिरावर्जितपंकजाभिः ।
स्वर्वाहिनीपद्मरजोविमिश्रदिव्याम्बुविप्रुट्परिवर्षणाभिः ॥ ४८ ॥
वनान्तपुष्पद्रुमसंहतीनामामोदमादाय सह प्रसूनैः ।
तपोनिधीनां तपसा यथैव मिश्रैर्द्युनिद्याः पयसा मरुद्भिः ॥ ४९ ॥
कलापिनां छत्रकनिर्मितीभिः सहैव षड्ज–ध्वनन–प्रतानैः ।
प्रतानिनीनां च सभाज्यमाना सच्छिद्रवेणुस्वरहर्षनृत्यैः ॥ ५० ॥
पद्मासनस्था कमलेव नूत्नपयोधिमन्थादुपजायमाना ।
प्रज्ञेव पूर्णा विमले मुनीनां पदे पुनर्भास्वरतां दधाना ॥ ५१ ॥
ज्योतिष्मतीवेन्दुकलेन्दुमौलेर्नेत्रेषु लोकस्य सुधां दुहाना ।
वपुष्मतीव श्रुतिसंस्कृतिर्नः संन्यासकाषायमुपासमाना ॥ ५२ ॥
छन्दस्वतीव प्रतिभादिसूरेः प्रसादसौम्याशयतां श्रयाणा ।
सा संघशक्तिर्मुनिशोणितस्य सा कापि पुत्री पृथिवीतलस्य ॥ ५३ ॥
सा कापि पत्नी पुरुषोत्तमस्य सा कालरात्रिर्दशकन्धरस्य ।
भूर्जे हृते स्थण्डिलमण्डलेऽस्मिन् राष्ट्रस्य देवी च पुनर्व्यलोकि" ॥५४॥

संकेतः – विद्याधरीणां तारतारैः "जनकात्मजाया जयः स्यादिति निनादै" रित्यन्वयः ॥४७॥ यथैवेति पदं साम्यवत् संभावनाया अपि व्यंजनम् ॥४९॥ कमलया पद्मासनस्थितिः, नूत्नपयोधिमन्थेनाध्वसितातिमहत्कृच्छ्रलब्धत्वं च साधर्म्यमूलम्, प्रज्ञया पूर्णत्व–भास्वरत्वे, इन्दुकलया ज्योतिष्मत्त्वसुधाधुक्त्वे, श्रुतिसंकृत्या संन्यासकाषाययुक्तत्वे, प्रतिभया च प्रसादसौम्याशयता । तत्र प्रसादः प्रतिभापक्षे काव्यगुणः, सीतापक्षे प्रसन्नता ॥५१–५३॥ सीता हि भारतराष्ट्रस्य देवीपदमधिकरोति । त एवात्र राष्ट्रस्य देवीति राष्ट्रियः पक्षीत्यादिव्यपदेशवद् उदारा वाक् ॥५४॥

लघुत्वमोजस्यणिमा शरीरे तस्यास्तदानीं महिमा च वृत्ते ।
वशित्वमन्तःकरणे यशःसु प्राकाम्यमासीद् गरिमा च बुद्धौ ॥५५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तां मंचकस्थां भुवनेश्वरीं वा पीताम्बरां वा त्रिपुरां यथा वा ।
दिव्यानुभावां प्रति सर्वलोको भीत्या च भक्त्या च नतो बभूव ॥५६॥

संकेत: – मंचकस्थां श्रीमद्देवीभागवते मणिद्वीपवर्णने प्रसिद्धे चिन्तामणि-गेहस्थे मंचके स्थिताम् । पीताम्बरां श्रीवगलामुखीं भगवतीम् । त्रिपुरां त्रिपुरारहस्यादिषु प्रसिद्धचराम् ॥५६॥

तां सर्वलोकैरभिनन्द्यमानामवेक्ष्य हृष्टः स सभापतिश्च ।
सर्वोऽपि गेही तनयाजनस्य समादरे हृष्यति यत् स्वभावात् ॥५७॥

संकेतः – स सभापतिः "अध्यक्षतां श्रीजनकोत्र चक्रे" [९–८]–इत्येव प्रतिपादितो जनकः ॥५७॥

अथोद्गता तस्य मुखाच्च वाणी पुत्रीं प्रति प्रीतिभृतः प्रसह्य ।
'वत्से मम', त्वं सिततां गतानां लज्जासि सिद्धा मम मूर्धजानाम् ॥५८॥

सा राममाता च पुनः प्रतिष्ठामवेक्ष्य लोके तपसः सतीनाम् ।
'हृदि स्थितस्यापि च रावणस्य जाताद्य लोके मृतिरि'–त्यमंस्त ॥५९॥

तस्मिन् क्षणे सागरमेखलायास्तृणानि कश्मीरभवान्यभूवन् ।
अभूत् तथा भारतसिन्धुतोयं सुवासिताशं नवपाटलाम्भः ॥६०॥

संकेत: – सागरमेखला पृथिवी । कश्मीरभवानि केसरा: । भारतसिन्धुः हिन्दमहासागरः । पाटलस्थ गुलाबेति प्रसिद्धस्य अम्भः गुलाबजलमिति लोकभाषायां प्रतीतस्य ॥६०॥

प्राग्ज्योतिषो वंक्षुतटानि यावत् त्रिविष्टपात् सिंहलकं च यावत् ।
अष्टादश–द्वीप–शुभेयमार्यवेदिः समग्रैव तदाऽत्यभूषि ॥६१॥

संकेत: – प्राग्ज्योतिषः असम–घात–क्षेत्रात् । वंक्षुः आक्ससनाम्नी नदी । त्रिविष्टपम् तिब्बतदेशः । अष्टादशानि द्वीपानि सुमात्रावालिप्रभृतीनि सागरद्वीपानि । आर्यवेदिः भारतभूमिः । अत्यभूषि अत्यन्तमलंकृता बभूव ॥६१॥

भवेद् विदेहो यदि वाऽवधूतो युक्तोऽथ योगी यदि वा जडोऽपि ।
चारित्र्यशुद्ध्यै भरतस्य भूमौ वधानदानं निखिलः करोति ॥६२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्युत्थाय सा च तनया जनकस्य शिष्टा–
चारं व्यपेक्ष्य निखिलानपि तान् ननाम ।
मित्रे रिपौ जरति बालजने च लब्ध–
लाभा भवन्ति विबुधा समदर्शिनो यत् ॥ ६३ ॥

संकेतः – लब्धलाभा: पूर्णकामाः ॥६३॥

रामं कृशं कृशतरां तनयां, समाजं,
चाप्यत्र वीक्ष्य मुनिधाम्नि शुभां श्रियं च ।
मेने तदा स जनकस्तनयाविवाह–
मांगल्यकालमिव तत्र पुनः प्रवृत्तम् ॥ ६४ ॥

तुष्टापि पुत्रमभिवीक्ष्य मुखं च वध्वाः
संबन्धिसन्निधिमवेक्ष्य परन्तु माता ।
भर्त्रे तदाश्रुकलुषाऽऽस, कुटुम्बिनीनां
योयं कुटुम्बरस एष हि नाकलाभः ॥ ६५ ॥

इत्येवं, सा मुनिजनसमिन्मातरस्ताश्चमूः सा,
तौ स्त्रीपुंसौ, नयनकुहरे स्फारतारः स बाष्पः
या नामासीत् सहृदयदशा सत्कवेरस्य धाम्नि
स्यात् को वा तां कथयितुमलं मानुषेषु प्रवेकः ॥६६ ॥

संकेतः – मुनिजनसमित् इति शान्तो रसः, तौस्त्रीपुंसौ सीतारामौ इति शृंगारः, बाष्प इति करुणः, चमूरिति वीरः, मातर इति वात्सल्यम्, इत्येवं वाल्मीकेराश्रमे रसभावानामेव समाजः । तं को वर्णयितुं क्षमेतेति भावः ॥६६॥

इति सनातनोपाह्व–श्रीमद्रेवाप्रसादद्विवेदिकृतौ "सीताचरित" नाम्नि
सर्गबन्धे मातृप्रत्यभिज्ञानं नाम
नवमः सर्गः ॥९॥

—★—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशमः सर्गः

साकेतिनां तत्क्षणमेव तेषां तत्सन्ततावुत्सुकता परन्तु ।
अजाग उद्वास्य समस्तमेव भावान्तरं, या पतिपक्षवृत्तिः ॥१॥

संकेतः – तत्सन्ततौ सीतासन्ततौ । या पतिपक्षवृत्तिः स्त्रियं प्रति पतिपक्षस्तथैव चिन्तयतीति समर्थनवाक्यम् ॥१॥

चमूचरैर्जृम्भक–हेति–सिद्धौ रूपेऽनुभावेऽपि च राघवस्य ।
निरीक्ष्य साम्यं प्रतिपक्ष–वीर–बाल–द्वये तत्सुतताऽन्वमानि ॥२॥
क्व ताविति प्रोत्सुकचेतसां च तेषां चतस्रोपि दिशोऽक्षिभृंगाः ।
कस्तूरिकानाभिमृगौ यथैव गवेषयन्तः क्रमयाम्बभूवुः ॥३॥
अवेक्ष्य सीतां प्रसवाय तस्याः समुत्सुकास्ते च, वसन्तकाले ।
गृहाद् गता आम्रलतां निदाघे निवृत्य पश्यन्त इव व्यराजन् ॥४॥
पिता च माता च पितामही च मातामहश्चापि तदात्र सर्वे ।
विना कुमारैर्न तथा विरेजुर्विनांकुरैर्मूर्ध्नि यथा द्रुमाद्याः ॥५॥
आसन् कुमारास्तु तदा निजेषु स्वाध्याय–शस्त्राभ्यसनेषु लग्नाः ।
य उत्सवाद् बिभ्यति शस्त्र–शास्त्राभ्यासे स्वराष्ट्रं पिपुरत्यमी हि ।६।
स चन्द्रकेतुश्च वयस्यभावात् तेष्वेव बालेष्वभवत् स्वधीतिः ।
स उत्सवो यो हि वयः–प्रवृत्ति–साम्येन सम्यक् प्रथते प्रहर्षात् ॥७॥
स आश्रमश्चापि तदास्य सूरेस्तैः स्नातकैर्हन्त तथा चकास ।
यथा खलो निस्तुष–मुष्टि–राशि–संघैः कृषाणस्य गृहे चकास्ति ॥८॥

संकेतः – स्नातकैरवाप्तविद्यैः । खलः खलिहानेति भाषायाम् । निष्तुषत्वेन स्नातकानां संस्कृतता, मुष्टिः फसल इति भाषायाम् । तस्य राशिः रास–पदेन भाषायां वाच्या । कृषाणः कृषीवलः । कृषीवलस्य धान्यमपि परार्थमेव भवति ॥८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाल्मीकिरुद्वीक्ष्य सभान्तरंगं चकार शिष्टागमनावकाशम् ।
शास्त्रेषु विद्या पदवाक्यरूपा शिष्टेषु चैषार्थतया चकास्ति ॥९॥
गुरोर्नियोगाद् वटवो विरेमुः स्वाध्यायतो नैव निजप्रवृत्त्या ।
माध्वीकतः किं मधुकृत्समूहः स्वयंप्रवृत्त्या चलति, प्रवाते ॥१०॥

संकेतः – प्रवाते सति स्वयंप्रवृत्त्या चलतीत्यन्वयः ॥१०॥

वयस्यभावादथ चन्द्रकेतुः कुशं लवं चापि हठान्निनाय ।
सभाप्रदेशं, न भवन्ति सिद्धा न तत्क्षणं हन्त सतां समीहाः ॥११॥
तानागतान् वीक्ष्य सभा प्रहर्षसिन्धाविवान्नूडदुदूढबाष्पा ।
अनिश्चयः किन्तु समेषु कुम्भसम्भूत–चुल्लूयितुमुत्प्रवृत्तः ॥१२॥

संकेतः – अन्नूडत् निममज्ज । अनिश्चय इमावेव सीतातनयावेवेति निश्चयस्याभावः। कुम्भसंभूतः समुद्रशोषयिता भगवानगस्त्यः ॥१२॥

ननाम सौमित्रिसुतोऽर्चितेभ्यः संकीर्त्य नाम स्वपितुः, परन्तु ।
तौ पित्रबोधात् बत मातुरेव नाम्ना प्रणामाय नतावभूताम् ॥१३॥

संकेतः – अर्चिताः पूज्याः । स्वपितुः लक्ष्मणस्य, तथासमुदाचारात् ।१३।

वाक् साऽत्र सीता–जन–मानसेषु निःश्वासवीचित्वमवापदुच्चैः ।
अस्वत्वबोधेषु जनेषु किन्तु नेत्राम्बुधारावपुषा व्यगालीत् ॥१४॥

संकेतः – सीता च जनाश्चेति द्वन्द्वः। अस्वत्वबोधेषु नास्ति स्वत्वस्य बोधो येषां कृते कुशलवयोस्तेषु ॥१४॥

ततः कविः कारुणिकः स्वकाव्योपसंहृतिं यद्वदुदीक्ष्य हर्षात् ।
रामं च सीतां च निदर्श्य ताभ्यां वचःप्रसादं प्रददावितीव ॥१५॥
पुत्रौ श्रुतं यन्मम रामकाव्यं यस्तत्र रामः स हि राम एषः ।
या तत्र सीता ननु सैव सीता भवत्सवित्री, न तु काचिदन्या ॥१६॥

संकेतः – रामकाव्यं रामं नायकतयाश्रित्य कृतं काव्यं रामायणम् ॥१६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तौ चक्षुरुन्मीलनपण्डितेन वाल्मीकिना सद्गुरुणा तदित्थम् ।
स्वबिन्दुसिन्धू पितरौ पुरस्तात् संप्रत्यभिज्ञाप्य कृतौ कृतार्थौ ॥१७॥

संकेतः – स एव सद्गुरुः यः शिष्यचक्षुः सम्यगुन्मीलयति । स्वमात्मा स एव बिन्दुरेकदेशः, तदर्थं सिन्धुभूतौ समष्टिभूतौ ॥१७॥

आनन्दसिन्धावनयोरिदानीं कः सेतुबन्धं रचयेत् कलावित् ।
एकस्तटो यत्र स राम एव तटान्तरत्वं च बिभर्त्ति सीता ॥१८॥

संकेतः – इदानीं परमात्मप्रबोधक्षणे च । लंकाभिषेणनक्षणे येन सेतुबन्धो रचितः स राम एव यदा तटतां गतः, यस्या आसत्तये च स रचितः सा सीतैव च तटत्वमासादितवती तदा सेतुबन्धस्य प्रयोजनमेव नावशिष्टम्। सत्यपि प्रयोजने च क्षमतापि रामादतिरिक्ते नावशिष्टा । लब्धे च निस्सीमे परमात्मनि को नु बन्धार्थमुद्यमः । सत्यपि च तादृशानन्दप्रतिपादनाभिलाषे कविनापि वा केन क्षमेण भवितुं शक्येतेति विविधार्थव्यंजनस्थानमिदम् ॥१८॥

ज्ञात्वापि तातं, जननीं निजां तौ विलोकयामासतुरुद्गताश्रू ।
रविं प्रति प्रीतिभृतोऽपि वृक्षाः शिरांसि भूमिं प्रति नामयन्ति ॥१९॥

संकेतः – रविरेवेन्द्रः । भूमिरेव शची । तयोर्दाम्पत्यं वेदविज्ञानवेत्तृषु प्रतीतम् ॥१९॥

सोद्यानभूर्यद्वदुदास माता महाकविस्तत्प्रसवौ परन्तु ।
उद्यानपालप्रतिमस्तदानीं तत्स्वामिने दातुमियेष हर्षात् ॥२०॥

संकेतः – उद्यानपालो हि उद्यानस्वामिने तदीयोद्यानप्रसूतानि फलानि समर्पयत्येव ॥२०॥

रामस्तु नात्मानममंस्त योग्यं गुरौ वसिष्ठे सति पुत्रलब्ध्यै ।
ममत्वतो यद् विनियोग एव राष्ट्राय बालस्य सतां प्रशस्यः ॥२१॥
गुरुर्वसिष्ठोऽपि च पारिजाताविवाश्रमाब्धेरुपलभ्य तौ द्वौ ।
मनोरथान् भारतराष्ट्रमातुः स्वायत्त–संपूर्ण–फलानपश्यत् ॥२२॥

संकेतः – स्वायत्तेति स्वतन्त्रताऽभिव्यक्ता । अनेवंविधेषु बालेषु स्वतन्त्रापि भारतमाता किमिव वा संपूर्णफला भवेदिति चान्तरंगम् ॥२२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न यायजकस्य परन्त्वदृष्टं स्प्रष्टुं कदाचित् क्षमते पुरोधाः ।
रामाय तद् द्वावपि बालकौ तौ वर्णाश्रमाणां गुरवेऽदिशत् सः ॥२३॥

स चापि वाल्मीकिवसिष्ठदृष्टिपरीक्षितौ प्राप्य सुतावहृष्यत् ।
न पिण्डमात्रं नृपसन्ततीनां यद् भारते राष्ट्रपतित्वमेति ॥ २४ ॥

संकेतः – नृपपुत्रो हि नृपस्योत्तराधिकारमर्हतीति सामान्यं शास्त्रम् । तत्र "विनीत एवे"–ति विशेषः । स एवायमत्रोपजीव्यः ॥ २४ ॥

कथं न शिल्पोत्तममेतदत्र प्रशस्तिपात्रत्वमुपाददातु ।
यत्रोपलः सूर्यमणिः, कविः स शिल्पी, वसिष्ठश्च परीक्षकोऽस्ति ॥२५॥

संकेतः – शिल्पोत्तमत्वेनात्र कुशलवौ विवक्षितौ । सूर्यवंशरूपः सूर्यकान्तमणिः उपलः शिल्पायापेक्षितः प्रस्तरः । स आदिकविः वाल्मीकिः ॥ २५ ॥

स राजवंशो मिलितः सुताभ्यां तथा तदानीं निपुणं विरेजे ।
लौहित्य–सिन्धु–द्वितयेन युक्तो विराजते हन्त यथैष देशः ॥ २६ ॥

सीतातटस्थत्वविषाददिग्धा प्रसन्नता राजकुलस्य तस्य ।
निदाघतप्तस्य सरोवरस्य प्रसन्नताया भगिनी बभूव ॥ २७ ॥

तावश्रुणार्घ्यं पटुसीत्कृतैश्च शुभागतं मातृजनेषु लब्ध्वा ।
यन्मंगलं प्रापतुरस्य दास्ये को नाम मांगल्यविधिः क्षमेत ॥ २८ ॥

संकेतः – शुभागतम् स्वागतशब्दम् ॥ २८ ॥

मातामहस्यापि विना स्वपुत्रीं दौहित्रयोर्हन्त तयोः प्रसादः ।
जातोऽनवाप्तप्रतिके स्वशास्त्रे स्वभ्यस्तयोः शास्त्रकृतः प्रसादः ॥ २९॥

संकेतः – न प्राप्ता प्रतिः पुस्तकं यस्य तस्मिन्, सु सुष्ठु अभ्यस्तयोः शिष्ययोरिति यावत्, शास्त्रकृतः तच्छास्त्रकर्तुः प्रसादः प्रतोषः॥ २९ ॥

तस्मिन् क्षणे लक्ष्मणसंभवोपि ज्येष्ठां सुवं प्राप तथा शिरः स्वम् ।
ननाम तत्पादकुशेशयाभ्यामद्याप्यसादृश्यविमाननाभ्याम् ॥ ३० ॥

संकेतः – लक्ष्मणसंभवः चन्द्रकेतुः ज्येष्ठा सूः सीता । सादृश्यमेव विमानना सा नास्ति ययोस्ताभ्याम् । पादयोः कुशेशयत्वं शिष्टोक्तिमात्रम्, नतु साम्य–निबन्धनम् । यद्वा पतिव्रतान्तरसादृश्यमत्र विमाननात्वेन ग्राह्यम् ॥ ३० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीतांघ्रितीर्थे प्रणतस्य तस्य द्वावेव शोभां ननु धातुमीशौ ।
कुमारिकायां निजराष्ट्रभूम्यै नतो विवेको यदि वा महाब्धिः ।। ३१ ।।

संकेतः – कुमारिकायां कन्याकुमारीति प्रसिद्धायां भारतस्थलवेदिपादभूतायां भुवि विवेको विवेकानन्दनामा स्वामी महाब्धिः भारताब्धिः, दिग्त्र-याब्धिरेव वा ।। ३१ ।।

तन्मूर्धजानामरुणे समूहे मातुर्वदातद्युति पादपद्मम् ।
शोणारुणाम्भःपरिवेषरम्यामुवाह लक्ष्मीं त्रिदशापगापाम् ।। ३२ ।।

संकेतः – तन्मूर्धजानां चन्द्रकेतुशिरोरुहाणाम् । मातुः सीतायाः । शोणो नाम नदः । त्रिदशानां देवानामापगा सिन्धुः गंगा धवलजला ।। ३२ ।।

प्रियस्य पुत्रं निजदेवरस्य सा चापि नप्तारमिवाशु मूर्ध्नि ।
शिंशिघ, किन्त्वस्य तपोवनीयान्यपाचिकीर्षन्न रजांसि तस्मात् ।।३३।।

संकेतः – तस्मात् मूर्ध्नः स्वपादयोरवनतिकाले तपोवनरजोधूसरादिति यावत् ।।३३।।

वतीर्य सा स्थण्डिलतस्ततश्च प्रभूतपुष्पेष्टिरजोविमिश्रैः ।
रजोभिरस्यालिकहेमपट्टे तपोवनीयैस्तिलकं चकार ।।३४।।

संकेतः – अलिकं मस्तकमेव हेम्नः पट्टः, तत्र । पुष्पाणाम् इष्टीनां च प्रभूतानां रजोभिः विमिश्रैः रजोभिः । कथितपदत्वमत्र न संभाव्यम्, रजो-द्वन्द्वस्यैवात्र मिश्रताया विवक्षणात् ।।३४।।

तस्मिन् क्षणे स्वानि मितानि मत्वा भाग्यानि पुत्रस्य तथाऽमितानि ।
स्थितोऽपि तूष्णीं बत लक्ष्मणोऽपि सेर्ष्यः सहर्षश्च बभूव वीरः ।।३५।।

संकेतः – मातृभूमिरजस्तिलकं प्रति वीरस्य नितान्तं साभिलाषत्वात्, लक्ष्मणस्य च वीरत्वात्, सीतामातुः सकाशात् तथाविधसंभावनस्य चाप्राप्तत्वात् ।।३५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा मातृभूमे रजसा विधाय भाले विशेषं विससर्ज पुत्रम् ।
पुत्रस्त्वसौ नैव शशाक मोक्तुं तां मातरं तच्च तदंघ्रितीर्थम् ॥३६॥

वात्सल्यशान्त्योरिति मिश्रभावे तस्यां स्थितेऽस्मिन् विदधातु धीरः ।
इयं सितेदं पय, एष सिन्धुरयं घटो वेति परिच्छिदां कः ॥३७॥

संकेतः – माधुर्याय सितापयसोः, परिमाणाय च सिन्धुघटयोरौपम्यम् ॥३७॥

तां मातृनिर्वेददशां तथा च तां वत्सकप्रीतिदशामवेक्ष्य ।
अधीरतां हन्त गतं मुनित्वं, दीर्घं निशश्वास च सद्गृहित्वम् ॥३८॥

संकेतः – मुनित्वापेक्षया गृहित्वमात्मानं प्रगुणं मन्तुमारब्धमिति पर्यायेणोक्तिः ।

को वा ब्रवीति 'क्षणशः प्रयाति संसार एष प्रलयाग्निगर्भम्' ।
स मीलिताक्षो बत 'मातृकुक्षि–कुमारशक्ति'–द्वितये वराकः ॥३९॥

संकेतः – प्रतिक्षणपरिणमिनो हि सर्व एव भावा इति क्षणभंगवादी बौद्धः । मातृकुक्षिर्हि कुमारशक्तिं नित्यं नूतनयति, 'नवो नवो भवति जायमान' इत्यागमोपीदं सत्यापयति ॥३९॥

सा कोसलेन्द्रस्य सुता नवीना स चापि नूत्नो बत लक्ष्मणो हि ।
अयं विशेषो वृणुतेऽत्र मातैवारण्यवासं, न ददाति पुत्रः ॥४०॥

संकेतः – कोसलेन्द्रस्य सुता कौसल्या । सा सीता वधूः, कौसल्याया एव प्रतिमूर्त्तिः । स चन्द्रकेतुश्च नूत्नो लक्ष्मण एव । यथा च साकेते लक्ष्मणो ज्येष्ठां मातरं वनवासमयाचत सा चान्वमोदत तथैवात्रापि स्थितिः । विशेषस्त्वयं यदत्र मातैव पुत्रं स्वतो वने स्थातुं याचते, पुत्रश्च नानुमोदते ॥४०॥

देहेन रामं हृदयेन सीतां तस्मिन् क्षणे सार्धमुपासमानः ।
स लक्ष्मणोपि प्रतिमापरो यः स्थितिं च सत्यं च समं ररक्ष ॥४१॥

संकेतः – हृदयेन चन्द्रकेतुरूपेण । पुत्रो हि पितुर्हृदयमेव ॥४१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा चन्द्रकेतौ स्वसुर्मिलायाः स्वदेवरस्यापि च लक्ष्मणस्य ।
सुमानुषाद्वैतमवेक्ष्य जाता प्रसह्य मातृत्वरसे निमग्ना ॥४२॥

संकेतः – सुमानुषयोर्दम्पत्योः अद्वैतमेकत्वम् । पुत्रे पित्रोराकृतेरैक्यात् ॥४२॥

सा तत्क्षणं बष्कयिणीव सीता निजांचले यां समुवाह धाराम् ।
निपीय तां मृष्टवपुर्मुनित्ववत्सः समुत्पुच्छयितुं प्रवृत्तः ॥४३॥

संकेतः – मुनित्व–वात्सल्ययोर्विरोधाभावादेवम् । बष्कयिणी चिरप्रसूता गौः, सीताया अपि चिरप्रसूतात्वमेव, वत्सयोर्वयस्कत्वात् । अंचलपदेन "आंचरे-' ति हिन्दीपदमूलतया स्तनौ वाच्यौ । मृष्टं सुपुष्टं वपुः यस्य सः । मुनित्वं हि मातृत्वभावेन परिपोषमासादयति । समुत्पुच्छयितुं पुच्छमुत्थाप्य नर्त्तितुं प्रवृत्तः । सा हि वत्सजातिः ॥४३॥

यो मातृभावे महिमाऽस्मदीयः स वै महाकारुणिकः प्रभुर्वः ।
सा ब्रह्मसिद्धिः स शिवत्वलाभस्तत् सार्वभौमं ननु मुक्तिसत्रम् ॥४४॥

संकेतः – मातृभावे महिमा महामातृत्वम्, अस्मदीयः अस्माभिरंगीकृतः, वोऽस्मद्भिन्नानां महाकारुणिकः प्रभुः । सार्वभौमं मुक्तिसत्रं काश्यां प्रसिद्धम् ।४४।

तं मातृभावं शिशुवत् स्थितानां हस्ताम्लकं भुक्तिरथो विमुक्तिः ।
सा पिच्छला वत्सलताभिधाना काचिन्महायानसृतिर्बुधानाम् ॥४५॥

संकेतः – सा महामातृत्वरूपा । महायानसृतिः महायानमार्गः, न तु यथा बौद्धेषु प्रसिद्धा बालवृद्धस्त्रीपुरुषयादृच्छिकप्रव्रज्याप्राणा ॥४५॥

सा विश्वविध्वंसविरामभूमिः सा विश्वशान्त्यै पटु सामरस्यम् ।
ज्ञानक्रियाभक्तिमयी च काचिद् योगत्रिवेणीप्रतिमापि सैव ॥४६॥

सा ब्रह्मकाव्ये मधुगीतिवीणा तत्तत्त्वधन्वन्यमृतांबु सैव ।
तत्रास्ति बोधस्य न साधकत्वं प्रपत्तिमात्रं बत तत्र सर्वम् ॥४७॥

संकेतः – ब्रह्म यदि काव्यं तर्हि महामातृता तत्र मधुमयी गीतिदात्री पद्यतासंपादयित्री वीणास्तीति योजना । एवमेव तद् यत् तत्त्वं तत्पदव्यपदेश्यं तद्रूपिणि धन्वनि मरौ सा महामातृत्वामृतमयजलरूपा । प्रपत्तिमात्रं शरणमात्रम् ऋते ज्ञानान्न मुक्तिरिति यदुच्यते तदपि तत्र न विरुध्यते, तादृशप्रपत्त्या सर्वविधज्ञानसंभवात् ॥४७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तामेव मातृत्वदशां विदेहपुत्र्यां तदानीमुपलक्ष्य सर्वः ।
लोकः स्वरं केवलमेकमूचे "माता तु सीतैव चराचरस्य" ॥४८॥

"धन्यासि पत्यावथ पुत्रगर्भे धातुं स्वराष्ट्रस्य पतित्वमुच्चैः ।
कालप्रबुद्धा स्वयमेव या हि राज्यं समुत्सार्य वने तताप ॥४९॥

रामाधिकौ रामसुतौ, न शंका, गतो वनं राम उदूढजानिः ।
इमौ तु गर्भाद्धि विदेहपुत्र्याऽनयैव सार्धं तपसां वनानि ॥५०॥

किं नाम हेमात्र तुलाविधाने विनाग्निसंस्कारमिमौ विशुद्धौ ।
आस्तथ्यमेतद् यदियं पुरैव वह्नौ विशुद्धास्त्यनयोः सवित्री ॥५१॥

हन्त प्रजाराधनतत्परत्वे रामं प्रभुं कोऽतिशयीत लोके ।
यस्तत्कृते गर्भत एव सत्त्वरूपां प्रजां स्वां विनयत्यदभ्रम् ॥५२॥

सुदक्षिणायां रघुरेव, तद्वच्छकुन्तलायां भरतो हि जज्ञे ।
अस्यामिमौ द्वौ ननु हेतुरत्र द्वयोस्तपांसि प्रसुवः पितुश्च ॥५३॥

सा कूटनीतिर्ननु कोसलेन्द्रपुत्र्याः प्रवादो यदभूत् पुरा सः ।
सा यौवने नैव चकांक्ष भूयः पौत्रेषु संस्कारकृते तपांसि ॥५४॥

सा नैव रामस्य च लक्ष्मणस्य प्रसूतिभेदं रुरुचे ततश्च ।
एकप्रसूति द्वयमत्र सून्वोरिदं स्ववध्वां निपुणा विलेभे" ॥५५॥

इत्येवमादि प्रतिपत्तिमग्नो बभूव लोको हृदये तदानीम् ।
गुणाय सर्वोपि जनः प्रणौति यद्यप्यसौ द्रुह्यति तत्प्रसूत्यै ॥५६॥

संकेतः – पुत्ररूपो गर्भः पुत्रगर्भः कालप्रबुद्धा समये जागरिता ॥४९॥ उदूढा विवाहलब्धा जाया येन स उदूढजानिः, जायाया निङ् ॥५०॥ 'प्रजा स्यात् संततौ जने' इत्यमरः ॥५२॥ सुदक्षिणा दिलीपभार्या । तत्र रघोः संभवे पितृतपःप्राधान्यम्, । शकुन्तला दुष्यन्तपत्नी, तत्र भरतस्य संभवे शकुन्तलातपः– प्राधान्यम् । कुशलवयोः संभवे पुनर्द्वयोरेव, रामस्यापि सीतायाश्चापि । तपोद्वयप्राधान्यादेव पुत्रद्वयसंभवः ॥५३॥ कोसलेन्द्रपुत्री कौसल्या माता । स सीताया लंकाधिवासकालुष्यविषयकः । रामो संस्काराय यौवने तपांसि चक्रे ततो राष्ट्रपतितामवापत् । पौत्रा जन्मत एव संस्कृताः स्युरिति कौसल्याहृदय– भावना ॥५४॥ प्रसूतिभेदो मातृभेदः । एकप्रसूति एकमातृकम् ॥५५॥ प्रतिपत्तिः मतेरुन्मेषः ॥५६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा संविदेतस्य सभाजनस्य द्राग् वैखरीभूय वियद्वितानम् ।
प्रपूर्य तं लक्ष्मणसूनुपक्षं समर्थयामास ममत्वमुग्धम् ॥५७॥

संकेतः – लक्ष्मणसूनुश्चन्द्रकेतुः तस्य पक्षं मातुरपरित्यागरूपम् समर्थयामास वक्ष्यमाणक्रमेण—

"मातः प्रसीद कुरु कैरवसोदरं नः
साकेतकं पदनखेन्दुमयूखहृष्टम् ।
एते वयं मधुकरायितुमत्र येन
सम्यक् क्षमेमहि चिरात् प्रभृति प्रतृष्णाः ॥५८॥

घूकस्वरैर्निबिडितेऽपि कुहूसुहृद्भिः
किं व्योम्नि हंसमधुराऽऽसजते न राका ।
कालक्रमेण परिवर्त्तनमश्नुवाने
चक्रात्मके जगति वत्सलतैव नेमिः ॥५९॥

संकेतः – साकेतः कुत्सितत्वात् साकेतकः । प्रतृष्णाः प्रकृष्टा तृष्णा येषां तें ॥५८॥ घूका उलूकाः । हंसमधुरा हंसैर्मधुरा हंसेभ्यो मधुरा चेति । वत्सलता वत्सलभावः। नेमिः चक्रपरिवेष्टनी, तां विना चक्रस्य परिभ्रमणासंभावात् ॥५९॥

कविरिमामुपकर्ण्य सरस्वतीमतितरां विशदोऽभवदात्मनि ।
अनुशयः कलुषस्य विनिष्क्रयः सुजनताऽजन–तापरुचिश्च यत् ॥६०॥

संकेतः – सुजनता हि अ–जनतापरुचिरेव ॥६०॥

स जनको जनकोपपराङ्मुखो दुहितरं हितरंजित–भूतलाम् ।
जन–मनो नमनोदितपुण्यतामृतमथैक्ष्य बभूव कृतक्रियः ॥६१॥

संकेतः – नमनेन उदितं पुण्यतारूपममृतं यत्र तादृशम् ॥६१॥

स रविवंशगरुश्च सनातन–स्थविरतां विरतामिव तत्क्षणम् ।
न मनुते स्म न, किं च सतीव्रतं तपसि कांचन कांचनतां गतम् ॥६२॥

संकेतः – सनातनस्य तदाख्यस्य धर्मस्य स्थविरतां शिथिलतोपक्षण–भूताम् ॥ ६२ ॥

स नृपतिश्च पतिश्च सतां चितेरपचितां रतिमीक्ष्य शुभग्रहे ।
जनपदेषु पदेषु च नागरेष्वमनुत ज्वलितामसतां चिताम् ॥६३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुशलवप्रसवा तु निशम्य ता जनगिरो निजकीर्तिपरा अपि।
समतया मतया विदुषां दधे श्रुतिमतीति मतीन्दुकलां शुभाम् ॥६४॥

संकेतः – विदुषां मतया अभिमतया समतया समत्वेन श्रुतिमती विदुषी इति हेतोः शुभां मतिमेव इन्दुकलां दधे ॥ ६४॥

तस्मिन् काले पतिपित्रादेः सान्निध्यं
सूरेराद्यस्याश्रमतुल्यामथ भूमिम् ।
दृष्ट्वा, शिष्टं कृत्यमदृष्ट्वा स्वं चान्यत्
स्थूलं देहं स्वस्यै मात्रेऽदित्सत् सा ॥ ६५ ॥

संकेतः – मत्तमयूरं वृत्तम् । स्वस्यै मात्रे पृथिव्यै अदित्सत् दातुमैच्छत् ।६५।

सा सर्वेभ्यो विनयमधुरामञ्जलिं मूर्ध्नि धृत्वा
न्यस्याशीर्भिः करकिसलयं चन्द्रकेतोश्च शीर्षे ।
स्मेरं धृत्वा मुखसरसिजं शान्तभावा पुनश्च
भेजेऽभ्यासात् स्थिरसुखसमां पद्ममुद्रां सुभद्राम् ॥ ६६ ॥

संकेतः – स्थिरसुखमासनमिति लक्षणे बीजभूतं समत्वमप्यनया लब्धम् । सुभद्राम् शोभना भद्रा भद्रासनं यस्यां ताम् । पद्मासनं हि भद्रासनं विना शुद्धिं नासादयतीति योगरहस्यं संप्रदायागतम् ॥ ६६ ॥

अक्ष्णोः प्रान्ताद् दरविदलितात् कैरवात् कैसराभो
नासावंशं स्नपयितुमिव प्रांशुरश्मिप्रतानः ।
जिह्वामूलादुपरि कुहरं किं च पीयूषधारां
धातुं तस्या अचलरसनाकोटिरेतुं प्रवृत्ते ॥ ६७ ॥

संकेतः – केसराणां समूहः कैसरम् । जिह्वामूलादुपरि कुहरमचलरसनाकोटिरिति स्थिरां खेचरीमाह ॥ ६७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दादिभ्यस्तदनु करणाग्राम आसाद्य मोक्षं
तस्या आत्मन्यमृतजलधौ बिन्दुभावेन मग्नः ।
प्राणायामः स्वयमथ तदा प्राणरोधस्वरूपः
प्रादुर्भूतः सहजसुभगो ध्यानदार्ढ्यं दुहानः ।। ६८ ।।

संकेतः – करणग्राम इन्द्रियग्रामः । सिन्धुबिन्दूपमया मायाब्रह्मणोरभेद उद्भिद्यते । प्राणायामस्य स्वयमुद्भूतत्वेन ध्यानस्य प्राणनिरोधजनकत्वमुदीरितम् । अस्ति च तादृशः संप्रदायः 'ईश्वरप्रणिधानाद् वा' इत्यादिभिः प्रतिपादितचरः ।।६८।।

आनन्दं सा यमिह पुरतो भर्तृपुत्रादिदाये-
ष्वन्तं लब्ध्वाऽलभत महती तत्क्षणं लोकभूमौ ।
तस्यैवात्र प्रतिकृतितनुं कंचिदानन्दसिन्धुं
कैवल्याढ्यं प्रशमममहितं स्वात्मभूमावलब्ध ।।६९।।

संकेतः – दायेषु कर्तव्येषु । लोकभूमौ प्रपंचबहुलता, आत्मभूमौ तु तद्विपरीता कैवल्यमयी स्थितिरिति विशेषणैः स्पष्टम् ।।६९।।

इत्थं सैषा जनकतनया स्वात्मदेवस्वरूपं
ज्योतिष्कायं कमपि मुदिता राममासाद्य जाता ।
का भीरस्मिन् विरहजनिता, का च लोकप्रसूता
सत्त्वासत्त्वप्रथितिरबला, का च कालव्यपेक्षा ।।७०।।

संकेतः – कालव्यपेक्षा नित्यप्रवृत्तत्वात् समयसीमापेक्षाया अभावः ।।७०।।

स्थितावस्यामेषा स्थितिमलभतोत्थानरहितां
यतो "युक्तो योगी" व्युपरतसमाधिच्युतिरभूत् ।
अगात् साधारण्यं तदनु तिसृषु व्यक्तिषु परं,
नरो नारी क्लीबं क्व नु दधति भेदं रसलये ।।७१।।

संकेतः – काव्यरसलयेऽपि सहृदयो जनः साधारण्यं लभते । अत्र तु साधारण्यं परमिति भेदः । परत्वं च शाश्वतिकतया ।।७१।।

वसिष्ठो वाल्मीकिर्जनक इतरे चापि मुनय-
स्तदीयां तां दृष्ट्वा स्थितिमधिगतार्थाः कथमपि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनर्भूजैस्तस्या व्यधिषत वृत्तिं किं च कतिचित्
प्रतीक्ष्याहोरात्रान् प्रणिजगदुरार्त्तान् निजजनान् ॥७२॥

अलं शोकावेगैरलमतितरां मोहकलुषै –
रलं स्वाधिक्षेपैरथ च पुनरुत्थानयतनैः ।
इयं कल्याणी तां गतिमुपगता यां स्पृहयते
मुनीन्द्राणामात्मा शतशततपोऽनुष्ठितिपरः ॥७३॥

प्रतिष्ठेयं जाता निमि–रवि–महावंशयशसां
प्रतिष्ठेयं जाता युगयुगकृते भारत–भुवः ।
प्रतिष्ठेयं जाता श्रुतिमहति मार्गे कृतधियां
यदेषा देहेन स्थितिमधित मृत्युंजयभुवः ॥७४॥

संकेतः – श्रुतिमहान् मार्गः वेदप्रमाणकः पन्थाः सनातनाख्यः। देहेन स्थूलेन शरीरेण । मृत्युंजयभूः अमृतत्वभूमिका । स्थूलदेहेनामृतत्वलाभ एव भारतीया सिद्धिः, अन्यत्र देशान्तरापेक्षया भारतस्य न्यूनत्वात् ॥७४॥

संप्रत्यस्याः पशुपतितया पाशमुक्तोऽन्तरात्मा
वन्द्योऽस्माकं भवति जहित स्थूलदेहान्ववायम् ।
धन्यो रामः कुशलवसुता यस्य जाया त्रिलोकी –
मांगल्यात्मा व्रजति वपुषैवान्धकारात् परस्तात् ॥७५॥

इत्येवं ते बहुविधवचःसेतुबन्धैः समेषा –
मस्त्रस्रोतः स्थगयितुमलंभूष्णुतामीप्सवोपि ।
शेकुर्नैव, द्रुतिमुपगतां चेतनामक्षिमार्गा –
न्निर्गच्छन्तीं प्रति तितउतां याति यत् सान्त्वनावाक् ॥७६॥

गांगैस्तोयैरथ नयनजैर्दिग्धदिग्धैः पवित्रं
श्रद्धापुष्पैः शबलशबलं खातमेते विधाय ।
तस्या गात्रं पुनरपि महीमातुरेवांकशय्याऽऽ
सीनं चक्रुर्, न हि मृतवपुर्मन्यते योगमुक्तः ॥७७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीता तस्मिन् स्वर्पिति पुनरप्यस्य विश्वस्य धर्म–
ग्लानि–ग्लान्यै श्रयितुमसकृद् देहबन्धं तमेव ।
इत्येवं सा मुनिजनसमित् पुत्रकान् सान्त्वयन्ती
सास्रं त्यक्त्वा पुनरपि सुमं प्राप तस्या कुटीरम् ॥७८॥

तस्य द्वारे निहितशिरसा केन वा नाश्रु मुक्तं
को वा नासीद्धृदयविपिने दावलग्नोऽत्र धीरः ।
कैर्वा मृत्स्ना शतशतमहातीर्थमृत्स्नेव तस्य
धृत्वा मूर्ध्नि स्वजनुरिदमाः प्रापितं धन्यतां न ॥७९॥

को वा वक्तुं प्रभवतु जगन्मातुरस्या यशांसि
केनावाप्तं मनुजवपुषि क्रान्तिमच्चक्षुरार्षम् ।
तस्याःपुण्यस्मरणसुधया पूरयेत्, पूरितुं चेत्
वाञ्छेत् कश्चित् स्वमतिसरितं विश्वधन्वप्रलुप्ताम् ।८०।

संकेतः – विश्वमेव धन्व मरुस्थलम् तत्र प्रलुप्ताम् नष्टाम् सरितं सरस्वतीमित्यर्थः तस्या एव मरुप्रान्ते प्रलुप्तत्वप्रसिद्धेः ॥८०॥

तस्यास्तस्मिन् प्ररुदितमृगे यद्धि शान्ते कुटीरे
काव्यं किंचित् स्वकरलिखितं राघवेणापि पुण्यम् ।
तस्यैवांशं कमपि कृपया मातुरस्या न्यबध्ना–
च्छिष्यः कश्चित् कविकुलगुरोः कस्यचित् काव्यमार्गे ।८१

संकेतः – कविकुलगुरोः कालिदासस्य, तद्गुरोर्वाल्मीकेः, तच्छिष्यस्य भवभूतेश्चेत्यनुसंधेयम्, न तु कस्यचित् अन्यस्य । काव्यमार्गे काव्यकर्मणि, कालिदासवदेवाभिव्यक्तेरिङ्गोपयोगात्, कालिदाससाहित्ये कृतश्रमत्वाच्चेति संकेतः ॥८१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मातुः काभ्याञ्चन सरसिजाभ्यां कृतिर्मेऽर्पितेयं
यन्माध्वीकं व्रजति लिपितां विश्व–काव्य-प्रबन्धे ।
अर्थत्रैधं दलपरिमलोल्लासिनी केसरश्री–
र्धत्ते यत्र, श्रयति पदतां किंच सा हंसकोक्तिः ॥८२॥

संकेतः – सरसिजद्वन्द्वेनात्र मातुश्चरणकमले अध्यवसिते । माध्वीकं मकरन्दः, तल्लिखितत्वात् विश्वकाव्यप्रबन्धस्य सुन्दरश्रीकत्वं माधुर्यमयत्वं च । अर्थत्रैधं वाच्य–लक्ष्य–व्यंग्य–रूपम्, तत्र केसरा लक्ष्यप्रतीकाः, दलानि वाच्यस्य, परिमलश्च व्यंगस्य । लक्ष्यस्य मध्यवर्त्तित्वात् केसराणामिव तदितरद्वययुक्तताऽत्रोक्ता । चरणपक्षे दलेनांगुलयः, केसरेण रेखाः, परिमलेन च सौरभमध्यवसितानि । हंस एव हंसक इति कमलपक्षे, हंस इव हंसको नूपुर इति च चरणपक्षे । पदता गीतिमयता शब्दता च ॥८२॥

इति सनातनोपाह्व–श्रीमद्रेवाप्रसादद्विवेदिकृतौ "सीताचरित" नाम्नि
सर्गबन्धे समाधिमांगल्यं नाम
दशमः सर्गः ॥१०॥
॥ श्रीः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुद्धिपत्रम्

	अशुद्धम्	शुद्धम्		अशुद्धम्	शुद्धम्
१।२ सं.	विततमूते	विततमूर्त्ते	४।६६	प्रस्रवणाः	प्रवस्रणं
१।३७	०न्तर्वि	०न्तर्वि०	४।६६ सं.	स्वावि०	स्ववि०
१।४५	प्यधाषिताम्	प्यधायिषाताम्	५।४७	भ्रमराली	भ्रमरावली
१।४५ सं.	प्यधाषिताम्	प्यधायिषाताम्	६।८	मिथन	मिथुन
१।५६	तत्स्मृतिः	तत्स्मृतीः	६।४२	भशयाना	भूशयाना
१।५९	दिवौकससाम्	दिवौकसाम्	६।४६	शुद्धिः	शुद्धिः
२।३	परस्पर	परस्परं	६।५२	तोषयांबभव	तोषयांबभूव
२।३४	यपि	यदि	६।६०	मम्भः स्व०	मम्भःस्व०
२।३९	सामह्वयत्	समाह्वयत्	६।७१	गरुत्वे	गुरुत्वे
२।४०	मर्च्छितो	मूर्च्छितो	७।१	वेद	वेद
२।४९	शोधयितं	शोधयितुम्	पृष्ठ-६५	अष्टमः सर्गः	सप्तमः सर्गः
२।५३	म	मे	७।५७	विधि	विधि
पृष्ठ-२१	तृतीयः सर्गः	द्वितीयः सर्गः	९।१७	यथातोव	यथातीव
३।६७	सवदे०	संवदे०	९।१८	०तंर्का	०तर्कां
४।३३	कथययस्व	कथयस्व	१०।२३	यायजकस्य	यायजूकस्य
४।३९	अवला	अबला	१०।६२	म	स
४।४३	प्रतिक्रियाय्	प्रतिक्रियाम्	१०।६२	गरु	गुरु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रजिस्टर्ड संख्या १३०४३।६७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल काँगड़ी

11-6-68

सा ग रि का

त्रैमासिकी

षष्ठवर्षे तृतीयाङ्कः

सागरिका-समितिः, सागर-विश्वविद्यालयः
सागरम् (म० प्र०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा ग रि का

त्रैमासिकी

षष्ठवर्षम्, २०२४ वि० सं०

षष्ठवर्षे तृतीयाङ्कः

सम्पादकः

प्रो० रामजी उपाध्यायः एम० ए०, डी० लिट्०

संस्कृत-विभागाध्यक्षः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

प्रकाशिका
संस्कृत-परिषद्
सागरिका-समितिः
सागर-विश्वविद्यालयः, सागरम् (म. प्र.)
Digitized by Arya Samaj Foundation Chennai and eGangotri

देयम्

प्रत्यङ्कम्	२ रूपकाः
वार्षिकम्	६ रूपकाः
वस्त्रावरणसंहितवार्षिकचतुरङ्काणाम्	१० रूपकाः
आजीवनग्राहकस्य	१०० रूपकाः
अङ्कनिर्गमनम्	आषाढाश्विन–पौष–चैत्रमासेषु (जून-सितम्बर-दिसम्बर-मार्च)

चेकद्वारा सम्प्रदानार्थं देयेषु उपर्युक्तधनेषु अपरं रूप्यकमेकं संयोजनीयम् ।

मु
नरहरी गोविन्द बेडे
सागर-विश्वविद्यालय-मुद्रणा
सागरम् (म.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूचीपत्रम्

१.	अनूपसिंहस्तस्य संस्कृत-संवर्धनञ्च	डा० रामजी उपाध्याय	२११
२.	कालिदास-भारती-६	डा० रेवाप्रसाद द्विवेदी	२३५
३.	उद्दण्डिकवेर्मल्लिकामारुतम्	डा० वा० वि० मिराशी	२५५
४.	काव्यगौरवे कालिदासकाव्यम्	डा० विश्वनाथ भट्टाचार्य	२६७
५.	जयपुरीय-शतक-काव्य-परम्परा	डा० प्रभाकर शास्त्री	२८३
६.	अष्टादशशतकीयं केरलप्रदेशीयं नाटकत्रयम्	श्री विहारीलाल नागार्च	२९५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनूपसिंहस्तस्य संस्कृत-संवर्धनश्च

रामजी उपाध्यायः

राजस्थानप्रदेशस्य पश्चिमोत्तर-दिग्विभागेऽधुना बीकानेर इति प्रख्यातं मंडलं विद्यते। तत्र विक्रमपुरं (बीकानेर) राजधानीं निर्माय 'बीका' इति ख्यातः कश्चिद् राठौरवंशीयो विजेता युवा राजकुमारः स्वराज्यं १५४५ विक्रमसंवत्सरे प्रतिष्ठापितवान्। तस्मिन् राजवंशे रायसिंहः, कर्णसिंहः, अनूपसिंहश्च उच्चकोटिकाः प्रजाप्रतिपालका महाराजाधिराजमहाराजपदवीकाः संस्कृत-साहित्य-संवर्धकाश्च बभूवुः। तेषु अनूपसिंहोऽनुत्तम एव।

अनूपसिंहस्य व्यक्तित्वम्

अनूपसिंहस्य जन्म १६९५ विक्रमसंवत्सरे (१६३८ ई० वर्षे) विक्रमपुरेऽभवत्। स महाराजकर्णसिंहस्य तृतीयपुत्र आसीत्। विद्या-विनयसम्पन्नः स स्वयमेव कविः, ज्योतिर्विद्, आयुर्वेदविशारदश्चेति प्रसिद्धिं गतः। तस्य राज्याभिषेकः १७२६ विक्रमसंवत्सरे (१६६९ ई० वर्षे) समापन्नोऽभवत्। शीघ्रमेव समग्रभारतस्याश्रयप्रणयिनो महाविद्वांसः तस्य सान्निध्यमापुः। अनूपसिंहेन बहुविधज्ञानाशावाः स्वकृतिभिः प्रपञ्चिताः, आश्रिताः सम्पृक्ता वा विद्वांसो बहुविधान् ग्रन्थान् लेखिताश्च। तदा सर्वविधशान्ति-समृद्धि-सम्पन्ने शासनकालेऽपरेऽपि बहवो विद्वांसः संस्कृत-साहित्यनिधिं निर्भरं सम्पादितवन्तः।

अनूपसिंहो मुगलशासकेनावरङ्गजेबेन दक्षिणभारते बीजापुरस्य, औरङ्गाबादस्य च राज्यपालो नियुक्तः। स तु मुगलसम्राजः कृते युद्धेषु बहुषु विजयी बभूव।[1] अवरंगजेबोऽपि तस्योपकारं संबिभ्रदिव तस्मै अडोनी-मण्डलस्य राज्यं पुरस्कृतवान्।

---

१ अदल्लशाहश्च कुतूपशाहः कस्याप्यजेयौ क्षितिपौ महान्तौ।
अनूपसिंहस्तु विजित्य राज्यं दिल्लीश्वरायार्पितवान् यशस्वी॥

होसिंगरामस्यामृतमंजरी १३

 CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रशस्तयः

अनूपसिंहमधिकृत्य समकालिकविद्वद्भिर्बहवः प्रशस्तयो विरचिताः । ताभिः प्रशस्तिभिस्तस्य व्यक्तित्वस्य प्रांशुता स्फुटीक्रियते । तथा हि

भूमा निर्मलिमा निजाधिकरणस्थेमा त्वयीमे गुणाः
वीर-श्रीमदनूपसिंह सुजयात् कीर्तेः स्वदेशस्थितेः
त्वं राजन्य-शिरोमणिः शुभकरश्चिन्तापि किं तावता
को वेत्ति द्युतिचाकचक्यमहिमा सोऽयं विराजयते ।।

अनूपगुणावतार २–१२

तत्तेजो देशकालापरिमितविभवच्छिन्न-तेजस्विकीर्ति-
स्तद्घाटीखड्गकोटित्रुटित-रिपुघटापाटितभ्रान्तबिम्बः ।
देवांशो राजविज्ञापनपर इव तत्सन्निधौ रक्तरक्तो
भानुः सर्वासु दिक्षु भ्रमति द्रुततरं सर्वदा तीव्रभानुः ।।

पेरुशास्त्रिणोऽनूपयशोवर्णनात्

तस्य श्रीमदनूपसिंहनृपतेश्चित्रं प्रतापांशुमान्
अन्तः शीतलतां तनोति विदुषां तापं परं विद्विषाम् ।
नानानवद्यविद्या - विद्योतितस्वान्तः
श्रीमाननूपसिंहः क्षितिपतिरित्थं समादिशत् ।।

विद्यानाथस्य शान्तिसुधाकरात्

श्रीसूर्यवंशावतंस-सदसत्यविवेचन - राजहंस - महाराजश्रीमदनूपसिंहदेवेनाथ मिथ्यातमःस्तोम-निकृन्तन-विकर्तनस्य यस्य प्रभोः प्रसादोदयाय पाण्डित्य-दर्पणं दर्शयितुमुल्लासो जातः स स्तूयते यथार्थगुणनामनिवेदकेन पद्यचतुष्टयेन—

अनूपभूपरूपोऽसौ भाति वै भास्करोऽद्भुतः ।
सदा प्रोद्यत्प्रतापश्रीः सदोच्चस्थः सदोदयः ।।
अनूपसिंहराजस्य प्रतापोऽग्निर्हिमं नु किम् ।
दह्यन्ते दुर्जना येन वेपन्ते चानिशं भृशम् ।।
वैरिवक्त्रस्थितं वारि त्वया सर्वमहारि यत्
अतो हेतोरनूपोऽसि यथार्थो मरुमण्डले ।।

उदयचन्द्रस्य पाण्डित्यदर्पणात्

पुराणागमगीयमानराजगुणरत्नाकरः, क्षत्रकुलकमलदिवाकरः, सकलारि-कानन-प्रसर्पत्प्रतापानल-परिताप्यमानदुष्टजनमानसासह्यदर्शनः, यथाकामकृतभरणः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिशुनजनवचनानधिष्ठितान्तःकरणः सुमेरुरिव विबुधालयः, समस्तजगत्प्रसादशिरःशेखरीभूत-कान्तकीर्तिध्वजः, तर्जितशत्रुव्रजभुजविहिताभयप्रजः, साधुशेमुष्यादृष्टागमपारावारपारैर्निवारितानृतव्रतः, प्रचारैर्विशदीकृतविद्वज्जनविशदचरित्रैर्जडजनसहजामित्रैः पराकूतज्ञैः सत्यप्रतिज्ञैः कृतबहुज्ञैः, विश्वविख्यातसंज्ञैः, संस्तूयमानौदार्यगाम्भीर्यादिगुणग्रामो विद्वज्जनमनोऽभिरामो, विद्वन्मण्डलाखण्डलमहाराजश्रीकर्णसूनुः, श्रीमदनूपसिंहो नाम नरपतिः संगतसप्ताङ्गराज्यं नयेनालंकुर्वन् विराजते।

उदयचन्द्रस्य पाण्डित्यदर्पणात् ।

समस्तविद्वज्जनतोषपोषकरस्वभावो गुणसंग्रही च
दूरीकृतानेकखलप्रचारो विद्यानिधिः सुन्दरसन्निवेशः ।
संस्तूयमानः कविभिः सुधीरो दानैकशीलो नृपकर्णसूनुः
अनर्पसिंहः क्षितिपालमौलिभूषामणिर्दीनदयापरो यः ॥

जनार्दनव्यासस्य कामप्रबोधात्

सशक्ति - शक्तित्रयषड्गुणालंकृत - सप्ताङ्गराज्य - राज्यैश्वर्यजितपुरन्दरेषु, सकलहिन्दुकराजमण्डलमौलिकोटीरेषु, महाराजाधिराजमहाराजश्रीमच्छ्री अनूपसिंहराजराजेश्वरेषु.........

जिनचन्द्रसूरिणः पत्रात्

स्वात्मविषयेऽनूपो निवेदयति—

निर्जलोऽपि स्वको देशो दानवारि-प्रवर्षणैः ।
विदुषां येन विहितः स्वनामसदृशः क्षितौ ॥

अनूपविवेकात्

अनूपसिंहस्य कृतयः

अनूपसिंहो विशेषतः धर्मशास्त्रकार एव सुप्रथितः । तस्य धर्मशास्त्रग्रन्था लेखकस्यानुसन्धान प्रवृत्तिं गभीरानुशीलनं च प्रमाणयन्ति । तद्यथा तस्यानूपविवेकाख्यो ग्रन्थः शालग्रामविषये विदुषां विवादस्य शमनाय निबद्धः ।[1]

अनूपविवेकः

एकस्मिन् दिवसे जातश्चक्रलक्षणहेतुकः ।

१ अप्रकाशितः । बीकानेरस्थानूपसंस्कृतपुस्तकालये रक्षितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषां विवदमानानां ज्ञानाज्ञानसुशालिनाम् ।।
शालग्रामशिलामूर्तिलक्षणानां पृथक् पृथक् ।
ग्रानन्त्यात् सन्दिहानानां बुद्धिवैशद्यहेतवे ।।
तेन राज्ञा मतिमता शालग्राम-परीक्षणे ।
ग्रन्थोऽनूपविवेकाख्यः कौतुकेन विरच्यते ।।

ग्रन्थस्यादौ गणेशविष्णू स्तौति कविः—

देयाद्वो मङ्गलानां ततिमनवरतं यस्य दृक्पात्रमात्र-
प्रादुर्भूतप्रभावाद्रचयति भुवनं विश्वयोनिः समग्रम् ।
क्षोणीभारं निधत्ते शिरसि फणिपतिः शम्भुरत्ति प्रपञ्चं
सोऽयं विष्णुः समस्तामरनिकरशिरोरत्ननीराजितांघ्रिः ।।

ब्रह्म-विष्णु-ब्रह्माण्ड-वराहपुराणादीनि सम्यगनुसन्धाय ग्रनूपो विषयविवेचनं करोति । तथाहि वराहपुराणमनुसृत्य सालेन वृक्षविशेषेण गम्यते ज्ञायते पर्वत विशेषः । स सालग्रामगिरिस्तीर्थविशेषः ।

पञ्चोल्लासात्मके ग्रन्थे ग्रन्त्योल्लासचतुष्टये शालग्राम-पूजनफलम्, मूर्ति-लक्षणम् पूजन-सामग्री, शालग्रामदुर्लक्षणम् शङ्कर-पूजनमित्यादयो विषयाः प्रपञ्चिताः । ग्रनूपविवेकानुसारं मद्यपानविरहिताः शूद्रा ग्रपि शालग्रामपूजाधिकारिणः सन्ति ।

ग्रन्थस्यास्यापरं नाम शालग्राम-विवेक इति ख्यातम । ग्रस्य रचना १७४९ संवत्सरे संजाता ।

प्रतिष्ठा-प्रयोग-चिन्तामणिः

ग्रन्थस्य भूमिकायामनूपो निवेदयति-ग्रथ सर्वप्रतिष्ठाग्रन्थानालोक्यानूपसिंह-नृपतिः लोकोपकाराय प्रतिष्ठा-प्रयोग-चिन्तामणि-ग्रन्थमारभते ।[1]

ग्रन्थेऽस्मिन् प्रथमं वास्तु-मूर्ति-शिल्पादीनां सविस्तरं विवेचन सम्पादितम् । ग्रत्र राज्याभिषेकप्रकरणे शासनाधिकारिणां कर्तव्यानि वर्णितानि । पश्चात् राष्ट्र-प्रकरणे कोश-बल-दुर्गादीनां सञ्चयस्योपायाः प्रतिपादिताः ।

चिन्तामणौ पूर्तप्रतिष्ठायां वैज्ञानिकं विवेचनं च वर्तते । पूर्तं तु—
वापी-कूप-तडागादिदेवतायतनानि च ।

---

१ ग्रप्रकाशितोऽयं ग्रन्थोऽनूपसंस्कृतपुस्तकालये बीकानेरनगरे वर्तते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥ मनुस्मृति ४-२२६
तत्रोद्यानप्रकरणे **वृक्षवपनम्, वृक्षरक्षणम्, वृक्षजातिनिरूपणम्, वृक्षवर्धनोपायः, वृक्षायुर्वेदः** इत्यादयो विषयाः प्रपञ्चिताः । केनोपायेन फलेषु नानास्वादाः सम्भरणीया इति निर्दशितम् ।

पश्चाद्राष्ट्ररक्षोपायाः सन्दर्शिताः । ग्रन्थस्यान्तिमे भागे प्रजाया मनोरञ्जनोपायाः समाकलिताः । ते हि—तप्ताङ्गारभक्षणम् तप्तघृतस्पर्शादयः कौतुकावहाः सन्ति ।

ग्रन्थेऽस्मिन् ८२० पृष्ठानि लिखितानि सन्ति । प्रायः अष्टशतविषयास्तत्र प्रपञ्चिता वर्तन्ते ।

श्राद्धप्रयोगचिन्तामणिः

अनूपसिंहेन विरचितोऽयं श्राद्धप्रयोग-चिन्तामणिर्यथानाम गुणोपाधिर्वर्तते । पुस्तकेऽस्मिन् श्राद्धलक्षणम्, उपवेशन-विधिः, श्राद्धार्हब्राह्मणाः, मातृश्राद्धः इत्यादयो विषयाः स्पष्टीकृताः । पुस्तकमिदमनूपसंस्कृतपुस्तकालयेऽप्रकाशितं वर्तते ।

अनूपरत्नावली

अस्या रत्नावल्या लेखक-परिचय-प्रकरणेऽनूपसिंहेन द्योतितम्—

राठौडाख्यान्वयेऽभून्नृपमुकुटमणिः शूरसिंहः प्रतापी
तत्सूनुः कर्णसिंहो वितरण-विषये कर्ण एवावतीर्णः ।
तस्यात्मजेन स्वकुलगुणभृतानूपसिंहेन बुद्ध्या
बद्धा काले विचित्रा विबुधमुखकरानूपरत्नावलीयम् ॥

पुस्तकेऽस्मिन् काल-निर्णयः, संवत्सरकृत्यम्, संस्काराः व्रतोपवासपर्वदिनानि, दानम्, प्रायश्चित्तमित्यादयो विषया वर्णिताः । विवेचनं तु सूत्र-स्मृति-सिद्धान्तग्रन्थानुसारि प्रामाणिकं प्रयोजितम् । पुस्तकमिदमनूप-संस्कृतपुस्तकालयेऽप्रकाशितं वर्तते ।

जयाभिषेकपद्धतिः

जयाभिषेकपद्धतौ अनूपसिंहेन राज्ञां जयाभिषेकस्य लिङ्गपुराणानुसारि वर्णनं कृतम् । पुस्तकमिदमनूप-संस्कृत-पुस्तकालयेऽप्रकाशितं वर्तते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कौतुकसारोद्धारः

ऐन्द्रजालिकसिद्धीनां प्रतिपत्तयेऽनूपसिंहेन पञ्चदशोल्लासात्मकः कौतुकसारोद्धार इति ग्रन्थो विरचितः ।[1]

ग्रन्थस्यादौ लेखकः प्रमाणयति—

येन श्रीमदनूपसिंहकृतिना कौतूहलोल्लासिना
स्वान्ते सौख्यकरं श्रुतौ रुचिकरं राज्ञां विनोदास्पदम् ।
नानाकौतुक-चित्रितं यदखिलं नागार्जुनीयं मतम्
तद्विज्ञाय वितन्यते कुतुकिना कौतूहलं मोहनम् ॥

अधोलिखितानि सन्ति प्रमुखकौतुकानि पुस्तकेऽस्मिन् निर्दशितानि—

तप्तलौहलेहनम्, तप्ताङ्गारराशिभ्रमणण्, अग्निचवर्णम्, जलोपरिचलनम्, मध्याह्ने तारादर्शनम्, कुञ्जरादिस्वरूपकरणम् जलपूरितपात्रकम्पनम्, पिशाचदर्शनम्, कुम्भजलपानम्, निद्राकरणम् जलस्य तक्रीकरणम्, कृत्रिममुक्तादिकरणम्, मृतसंजीवनी च ।

संस्कृतपत्राणि

महाराजानूपसिंहो जैनाचार्यैः सह संस्कृतभाषायां पत्र-व्यवहारं कृतवान् । तस्य १७४७ विक्रमसंवत्सरे लिखिते द्वे पत्रे प्राप्येते । एतयोर्द्वयोः प्रथमं पत्रमुद्ध्रियते—

स्वस्ति श्रीमहाराजाधिराजमहाराजश्रीमदनूपसिंहप्रभुवर्याणां श्रीमज्जिनदेवभजनावाप्त-सकलजिनेन्द्रज्ञानवैभवेषु, तृणीकृतजगत्सु, सकलजैनाभिवन्दितचरणेषु, श्रीपूज्यजिनचन्द्रसूरेषु वन्दनाततिनिवेदकमदः पत्रम् । विशेषस्तु पूर्वं सर्वदैव भवदीयः कश्चिद्यतिवरोऽस्माकं सार्थे स्थितः । इदनीमत्र भवदीयः कोऽपि नास्ति । भवद्भिरपि तूष्णीं स्थितमस्ति । तत्किमिति । अतः परमेक उपाध्यायः पाञ्चाख्योऽथवा जयतसी एतयोर्मध्ये यः कश्चिदायाति स सत्वरं प्रेषणीयः । चातुर्मास्यमत्रागत्य करोति तथा विधेयम् । अस्मिन्नर्थे विलम्बो न विधेयः । किमधिकम् । मिती पौष शु० ८

एतस्य पत्रस्योत्तरमपि बीकानेरे संरक्षितं वर्तते ।

---

१ अनूप संस्कृतपुस्तकालयेऽप्रकाशितो वर्तते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लेखिता ग्रन्थाः

अनूपसिंहस्य सत्प्रवृत्ति वैदुष्य-भक्ति च समाकर्ण्य भारतस्य विविधभागेभ्यो महाकवयो विद्वांसश्च समागत्य विक्रमपुरमाश्रितवन्तः। तस्य पूर्वजानां सुकृतिभिरभिप्रणीता बहवो विद्वांसः समागताः। फलतः तत् पुरं विद्वन्मण्डलमण्डितमासीदेव। एतैर्विद्वत्समाजैः तेषां नृपतीनां युगे विक्रमपुरं तु सकलभारतस्य प्रतिनिधीभूतमेवासीत्।

विक्रमपुरीयाः पण्डिता न केवलं वाचा शास्त्रार्थविवेचनं कुर्वाणा लोककल्याणं विदधतिस्म अपितु तत्तद्विषयकान् शास्त्रग्रन्थानधीत्य रुचिरां ज्ञानद्युतिं भृशं प्रकाशितवन्तः। एतेषां लेखकानां बह्वः कृतयोऽद्यापि विक्रमपुरस्य बहुषु पुस्तकालयेषु संरक्षितास्तीर्थभूमयः संजाताः। तासां कृतीनां संक्षिप्तविवरणमधः प्रस्तूयते। प्रथमं तावत्काव्यरचनाः संगृह्यन्ते। अनूपसिंहस्यौदार्यगुणमनुस्मरन्तः कवयः स्वकृतीनां नामानि प्रायशोऽनूपोपाधिकानि कृतवन्तः। कतिपयकाव्यानि तस्य महाराजस्य गुणादर्शं प्रतिष्ठापयितुमेव रचितानि।

अनूपसिंहगुणावतारः

अनूपसिंहगुणावतारस्य कर्ता विठ्ठलदीक्षितस्य विषये नाद्यापि किञ्चिद्विश्वसनीयं ज्ञायते। नाम्ना स दक्षिणभारतीयः प्रतिभाति। गुणावतारेऽस्मिन् महाराजस्य जीवनचरितस्य दशावतारा अधोलिखितक्रमेण प्रघट्टिताः—

आशीर्वाद–, सौन्दर्य–, सम्पद्–, विजय–, प्रताप–, दान–, यशस्–, धर्म–, भक्ति–, अभयावतारश्च। एतेषु दशावतारेषु १०२ पद्यानि शार्दूलविक्रीडित-स्रग्धरा-शिखरिणी-वसन्ततिलकादिषु छन्दःसु प्रवर्तितानि। यथानामैतेषु अवतारेषु विषया वर्णिताः सन्ति। पुराणेतिहासेषु विश्रुतानां देवादीनामपि अनूपेन सह तुलना नास्तीति कविर्विविधालङ्कारसंयोजनेन प्रतिपादयति। तथा हि कुबेरस्य तुल्ययोगितायाम्—

पद्मे ते नयने करे च मकरो जानुद्वये कच्छपः
शंखः कण्ठरुचौ मुकुन्दमहिमा चित्तेऽथ नीले कचे।
कुन्दश्रीः रदने स्मिते च रुचिरं खर्वत्वमेतावता
तुल्यो हन्त कथं नरेश धनदः स्यात् किन्नरेशस्त्वया॥

सूर्यौपम्यं विकल्पयति विठ्ठलः प्रतापावतारे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

ये तावत् त्वत्प्रतापं दिनपतिवलयेनोपमिन्वन्ति धीराः
कीरास्ते पूर्वशैलीकुशलमतिभुवो नूत्नवाचंयमास्ते ।
चण्ड त्वन्मण्डलाग्रप्रचुररुचिभृता तेजसा ते हताङ्गा
भित्त्वा मार्तण्डबिम्बं यदपतनभयां वीरभूमिं भजन्ते ॥

अनूपस्य कृष्णभक्तिस्तु

अविकलितजपादि-ध्यानधाराधुरीणं
मधुविदलन-पूजादर्शनं ते महीन्द्र ।
अवतरति न भेदं नापि सन्देहखेदं
अमरसविनिवेदं नाप्यभेदं न चैव ।

श्लेषपरेयं विट्ठलस्योक्तिरनूपमहाराजस्याभयत्वं प्रस्तौति—

अभया भवन्ति शरणं यदागता
यदनूपसिंह भवतीति नाद्भुतम् ।
अभयं तु हन्त सभयं विभाव्यते
न मनाग् विचित्रमिदमानशे मनः ॥

अनूपगुणावतारस्तु वस्तुतः गीतिकाव्यमेव सुप्रतिष्ठितम् ।[1]

अनूपयशोवर्णनम्

पेरुशास्त्रिणः कृतिरियं चतुष्पंचाशत्पद्यात्मिका वर्तते । न किञ्चिदपि सुनिश्चितं वृत्तं कविविषयकं ज्ञातमधुना । कश्चित् पेरुशास्त्री चकोरसन्देशस्य रचयिता प्रायः समकालिक आसीत् ।

गीतकाव्येऽस्मिन् उपजाति-शार्दूलविक्रीडितमालिनी-छन्दसां प्रयोगो वर्तते । कविः चक्रवालपर्वतस्य नारदमुनेश्च वार्ताप्रसङ्गे महाराजानूपस्यानुपमेयत्वं प्रतिपादयति । तथाहि—

अनूपभूपस्य यशःशशी न
दोषाकरो नापि तमोऽभिभूतः ।
न चाङ्कितो नापि च पाक्षिकश्री

---

१ पुस्तकस्य सम्पादनं डा० कुन्हनराजेन कृतम् । अस्य प्रकाशनं बीकानेरतः गंगा संस्कृतसालायामभवत् । प्रकाशिता प्रतिः अनूपसंस्कृतपुस्तकालये बीकानेरनगरे वर्तते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्न चास्तगाम्येव विभाति नित्यम् ॥

अनूपस्याश्रयणीयत्वं प्रशंसन् कविः प्राह —

परविषयनियोज्यज्ञापितापूर्वमूर्त्तिः
फलकरणसमर्थः सर्वदा संश्रितानाम् ।
गुरुविभवविधेयः प्रार्थ्यमानो जनौर्व-
र्जयति सुखमनूप-श्रीमहाराजमौलिः ॥

पुस्तकस्याप्रकाशिता प्रतिः अनूपसंस्कृतपुस्तकालये वर्तते ।

अनूपरत्नाकरः

संग्रहग्रन्थोऽयमनूपरत्नाकरो विद्यानाथसूरिणा विरचितो महाराजानूपस्याज्ञया ।[1] अत्र शालग्राम–सामुद्रिकशास्त्र–प्रतिमाविज्ञान–काव्यशास्त्र–राजधर्मादिविषयाणां पारम्परीणशास्त्रानुसारं विवेचनं वर्तते । अस्याप्रकाशिता प्रतिः अनूपसंस्कृत-पुस्तकालये वर्तते ।

अनूप-विलासः

अनूपविलासस्य लेखको मणिरामो ग्रन्थमिमं महाराजानूपस्य कीर्तिस्फीतये व्यरचयत् । तथाहि—

राज्ञः श्रीमदनूपपुण्यकृतिनः कीर्त्यै मया तन्यते ।
रत्नं संवत्सर-कृत्यनामरुचिरं प्रीत्यै सतां सर्वतः ॥

अत्राष्टरत्नानि—संवत्सराचार-समय-संस्कार-श्राद्ध-शुद्धि-दान - प्रकीर्णकाभिधानि प्रकरणशः सन्ति । एतेषु यथानाम धर्मविधयो वर्णिताः । तद्यथाचाररत्ने—श्मश्रु-कर्मदन्तधावन-केशप्रसाधन-प्राणायामादयः सरहस्यं व्याख्याताः । अस्याप्रकाशिता प्रतिः अनूपसंस्कृतपुस्तकालये वर्तते ।

तीर्थरत्नाकरः

तीर्थरत्नाकरस्य रचयिता अनन्तभट्टो महाराजानूपस्याज्ञया ग्रन्थमिमं रचितवान् । तथाहि—

आज्ञयानूपसिंहस्य समाश्रितकृपानिधेः
अङ्गीकार्यः स विद्वद्भिः क्षाम्यद्भिर्मम कौतुकम् ॥

---

१ अनूपरत्नाकरस्य प्रथमकल्लोलस्य पुष्पिका—इति श्रीमहीमण्डलाखण्डलस्य श्री महाराजाधिराजश्रीमदनूपसिंहदेवस्याज्ञया श्रीविद्यानाथ-विरचितेऽनूपरत्नाकरे प्रथमः कल्लोलः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

महानयमुपक्रमः यत्र ७९३ पृष्ठानि सन्ति। नानापुराणान्यनुशील्य ग्रन्थेऽस्मिन् प्रामाणिकता सम्पादिता अनन्तभट्टेन। तथाहि—

अष्टादशपुराणानि त्रिस्थलीसेतुमेव च।
दृष्ट्वा यथामति मया रचितस्तीर्थसंग्रहः॥

तीर्थरत्नाकरे भारतस्य प्रमुखतीर्थानां माहात्म्यं तत्र किं करणीयमिति च विस्तारशो वर्णितम्। पुस्तकस्याप्रकाशिता प्रतिः अनूपसंस्कृत-पुस्तकालये वर्तते।

व्यवहारनिर्णयः

व्यवहार-निर्णयः शिवानन्दगोस्वामिना विरचितः। ग्रन्थोऽयं विधिशास्त्रस्य सरलसरलतया व्याख्यार्थं प्रणीतः। शिवानन्दगोस्वामी अनूपसिंहस्य गुरुरासीत्। तेन प्रायः चत्वारिंशत् पुस्तकानि व्याकरण - साहित्य - धर्मशास्त्र-ज्योतिषादि-विषयानधिकृत्य सम्पादितानि

शिवानन्दस्य पितामहः श्रीनिवासदीक्षितः दक्षिणभारते पेण्णानदीतटे पाणंपट्ट-ग्रामस्य निवासी बभूव। स उत्तरभारतमागम्य काशीनगर्यां वसतिं चकार। तस्य पुत्रो जगन्निवासः काशीतः बुन्देलखण्डमागत्य राजाश्रयं जग्राह। तत्र देवीसिंहो राजा बभूव। देवीसिंहस्य समाश्रये स सिद्धान्तसिन्धुं विरचितवान्। पश्चादनूपसिंहस्य विद्वदादरं श्रुत्वा स विक्रमपुरमाजगाम। तत्रैव सोऽनूपसिंहस्य गुरुः सञ्जातः। अनूपसिंहः तस्मै गुरवे ग्रामद्वयं ददौ।

व्यवहारनिर्णये मनुस्मृतिवद् व्यवहारनिर्णयस्य प्रकरणानि सुसंहतानि सन्ति। अस्य ग्रन्थस्य रचना १७३५ विक्रमसंवत्सरे बभूवेति प्रतिभाति।

पुस्तकस्याप्रकाशिता प्रतिः अनूप-संस्कृत-पुस्तकालये वर्तते।

दानरत्नाकरः

दानरत्नाकरस्य रचयिता विश्वनाथभट्टस्य पुत्रो मुद्गलभट्टस्य पौत्रश्च होसिंगरामभट्ट आसीत्। महाराजानूपसिंहेनाज्ञापित एव तेन ग्रन्थोऽयं रचितः। तथाहि—'स्वस्ति श्रीमत्सकलभूमण्डलाखण्डलदिङ्मण्डलीमण्डन-सकलसामन्तचूडा-मणि-किरण - रंजित - चरणारविन्द - महाराजानूपसिंहाज्ञया होसिंगोपनामकभट्ट-मुद्गलाङ्गज-भट्टविश्वनाथात्मज-भट्टराम-विरचिते दान रत्नाकरे—इत्यादि।

अत्र दानलक्षणं दानकालं च विविच्य बहुमूल्यवस्तूनां हिरण्य-रत्न-धेनु-रथाश्वादीनां वितरणस्य माहात्म्यं प्रदर्शितम्। सर्वातिशायि तु अन्नदानमेव स्मृतम्। विविधसूत्रस्मृतिपुराणादीनां सारं वैज्ञानिकविधिना निगीर्य व्यवस्था निर्णीता इत्यनेन लेखकस्यानुसन्धानसरणिः प्रतीयते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अप्रकाशितो दानरत्नाकरोऽनूपसंस्कृतपुस्तकालये वर्तते ।

शान्तिसुधाकरः

शान्तिसुधाकरस्य रचनां विद्यानाथसूरिः महाराजानूपसिंहेनाज्ञापित एव १७५४ विक्रमसंवत्सरे कृतवान्[1] १०८८ पृष्ठात्मके ग्रन्थेऽस्मिन् ८६ कल्लोलाः सन्ति । अत्र न केवलं वैयक्तिकशान्तये, अपितु सामाजिकशान्तयेऽपि विधानानि प्रकल्पितानि । बहूनामुपजीव्यग्रन्थानामनुशीलनेनेदृशः प्रामाणिको महाग्रन्थो विरचितः सूरिणा ।

शान्तिसुधाकरोऽप्रकाशित एवानूपसंस्कृतपुस्तकालये सुरक्षितः ।

अनूपमहोदधिः

अनूपमहोदधिः ज्योतिष-विषयस्य करण-ग्रन्थो वीरसिंहगणकेन विरचितः । विद्वानयं महाराष्ट्रदेशतो विक्रमपुरमाजगाम । तथा हि—

दक्षिणेषु मरहट्टदेशके सर्वलोकबहुसौख्यकारके
गौतमीतटविराजिखेटरे नाम्नि भूमिसुरधाम्नि सत्पुरे ॥

इति आर्यसिद्धान्ते कविना स्वजन्मभूमिविषये लिखितम् । वीरसिंहेन 'आर्यसिद्धान्ततुल्यकरणम्' चमत्कार-सिद्धिः, अनूपमहोदधिः, खेटप्लवः, स्त्रीजातकम्, इति पञ्च ग्रन्था लिखिताः । अनूपमहोदधेः रचना १६७३–१६८१ ई० वर्षान्तराले बभूव । अत्र पञ्चतरङ्गाः संज्ञा– सद्व्यक्ति– कालमान– ऋतुनिर्णय– सप्तर्षिनिर्णय-इति ख्याताः सन्ति

अप्रकाशितोऽनूपमहोदधिरनूपसंस्कृतपुस्तकालये संरक्षितः ।

जनुपद्धतिकल्पवल्ली

जनुपद्धतिकल्पवल्लीति यथानाम जातक-ग्रन्थस्य प्रणेता त्र्यम्बकभट्टः आसीत् । त्र्यम्बकः स्वकुलमधोलिखित श्लोके वर्णितवान्—

गोदावरीसौम्यतटे वरिष्ठे नन्दीतटेऽभूदुपमन्युगोत्रः ।
भूयः सगोत्रोऽखिलपुण्यपात्रश्चिन्तामणिर्द्योतितवेदनेत्रः ॥
तस्यात्मजाः पंच बभूवुरेषां श्रीविश्वनाथो गणकाग्रणीर्यः ।
तदात्मजस्त्र्यम्बकनामधेयस्तेनोदिता पद्धतिकल्पवल्ली ॥

ग्रन्थस्यास्य रचना कृष्णातीरे १७४१ विक्रमसंवत्सरेऽनूपसिंहप्रभोराज्ञया समाप्ति-

---

१ ई० १९६८ वर्षे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

मगात् । इति लेखकस्य विज्ञप्तिः । अप्रकाशिता कल्पवल्ली अनूपसंस्कृतपुस्तकालये सुरक्षिता ।

अनूपविलासः

महाराजानूपसिंहस्य राज्याभिषेकसमये १७२६ विक्रम-संवत्सरे गङ्गारामस्य पुत्रेण मधुसूदनपुरोहितेनानूपविलासो विरचितः । तथा हि लेखकस्योक्तिः

स्वस्ति-श्रीमदनूपसिंहनृपतेरेतद्विलासाभिधम् ।
गंगाराम-सुतेन सारगणितग्रन्थः समातन्यते ।।

अनूपविलासस्यापूर्णा अप्रकाशिता एव प्रतिः अनूप-संस्कृत-पुस्तकालये रक्षिता ।

अनूपमेघमाला

अनूपमेघमालेति ग्रन्थः होसिङ्ग-भट्टेन महाराजानूपसिंहस्याज्ञया विरचितोऽखिललोकोपकाराय । तद्यथा लिखितं भूमिकायां भट्टेन-स्वस्ति श्रीमन्महाराजाधिराजकलिकर्णात्मज-क्षितिपतितिलकानूपसिंहाज्ञया होसिङ्गोपनामकभट्ट-विश्वनाथात्मजरामो ब्रह्मादिस्तम्बान्ताखिलदेह्युपकारार्थमनूपमेघमालाख्यं नवीननिबन्धमारभते । पुस्तकस्य चतुष्प्रकरणेषु वृष्टिकामप्रयोगाः, वर्षाकारक-तान्त्रिकप्रयोगाः, अतिवृष्टिशान्तिः, अनावृष्टि-शान्तिः, दुर्भिक्ष-शान्तिः, वर्षायोगाः इत्येते विषया द्रष्टव्याः ।

अनूपमेघमालाद्यावधि न प्रकाशिता सती अनूपसंस्कृतपुस्तकालये वर्तते ।

चिकित्सा-मालतीमाला, अमृतमंजरी, संतानकल्पलता च[1]

प्रागेव सन्दर्भितो होसिंगरामः धर्मशास्त्रज्योतिषादिविषयाणां पण्डित आसीत् । स एव चिकित्सा-मालतीमालादि-पुस्तकानां रचयिता महाराजानूपसिंहस्याज्ञया आयुर्वेदग्रन्थानिमान् कृतवान् । चिकित्सा-मालायां गुच्छेषु त्रिभागाः सन्ति । तत्र शरीरस्थबहुरोगाणां निदानं वर्णितम् । अमृतमञ्जर्यां विविधप्रकाराणां विषाणां स्थावर–जङ्गम-मिश्र–प्रकीर्णादीनां सभेदं सरहस्यं च व्याख्यानं कृतं वर्तते तेषामुपचारा मन्त्राश्च तत्रैव प्रकल्पिताः । पुस्तकं पंचमंजरीषु विभक्तम् ।

सन्तानकल्पलतायां सन्तानोत्पत्ति-संरक्षण-निरोधादिविषयाणां विवेचनं सप्तस्कन्धात्मकं कृतम् ।

सन्तानकल्पलता

अपरेयं कल्पलता सप्तप्रकरणात्मिका त्र्यम्बकरायवैद्येन सम्पादिता महाराजानूपसिंहस्याज्ञया । तद्यथा लेखकोक्तिः —

---

१. **इमानि पुस्तकामि अप्रकाशितान्येवानूप पुस्तकालये संरक्षितानि ।**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति श्रीमत्सकलदिग्जैनभूमिपालचूडामणि-सकला-नेकगुणपरिपूर्णा श्रीमन्महाराजानूपसिंह-कारितायां वैद्य-त्र्यम्बकरायकृतायां सन्तानकल्पलतायां...... त्र्यम्बकोऽयं होसिंगकृष्णस्य पुत्र आसीत्। पुस्तकेऽस्मिन् सन्तानबाधकरोगाणां हरणं, बालरक्षा, बालोत्पत्त्युपायाः, गर्भधारणोपायाश्च निर्दशितानि। सन्तानकल्पलताया अप्रकाशिता प्रतिः अनूपपुस्तकालये वर्तते।

रसराज-संस्कारः

हंसराजेन रसराजसंस्कारोऽनूपस्याज्ञया विरचितः। तथाहि—

हंसराजो भिषक्श्रेष्ठोऽनूपसिंहनृपाज्ञया।
तनुते विंशतिरेतान् क्रमाल्लक्षण-संयुतान्॥

तत्र पारदस्य विंशति-संस्कारा निर्दशिता इति स्पष्टमेव।

पुस्तकस्याप्रकाशिता प्रतिः नोखानगरस्य महर्षिसदने सरक्षिता।

कामप्रबोधः

'कामशास्त्रस्य ग्रन्थोऽयं महाराजानूपस्याज्ञया जनार्दनव्यासेन विरचितः[1] इति जनार्दनवचसा प्रमाणितम्—

अनूपसिंहः क्षितिपालमौलिभूषामणिर्दीनदयापरो यः।
तदाज्ञया व्यासजनार्दनाख्यः कामप्रबोधं तनुतेऽविद्वान्॥

कामप्रबोधे १० प्रकाशाः सन्ति। तेषु प्रथमाधिकरणे नागरकवृत्तं महत्त्वपूर्णमेव। चतुर्थप्रकाशे अङ्गराग-प्रसाधन-सुगन्धि-द्रव्य-मुखसुगन्धीनां वर्णनं कृतम्।

पुस्तकस्य दशमे प्रकाशे स्त्रीणां बन्ध्याकरणस्य सन्ततिनिरोधस्य चौषधय उपसंहृताः। तथा हि

त्रैहायनं गुडं याति मासाद्य च पलोन्मितम्
तस्या वन्ध्यत्वमाशु स्यात् नात्र कार्या विचारणा॥

अनूपसंगीतरत्नाकरः, अनूपसंगीतविलासः, अनूपसंगीतांकुशः अनूपरागसागरः; अनूप-संगीतवर्तमानम्, अनूपोद्देशः

एते संगीतग्रन्था महाराजानूपस्याश्रितेन सङ्गीताचार्येण भावभट्टेन विर-

---

१. कामप्रबोधस्याप्रकाशिता प्रतिः बीकानेरस्थानूप - संस्कृत - पुस्तकालये सुरक्षिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

चिता: ।[1] कोऽयं भावभट्ट इति अनूपसङ्गीतविलासे कवेरुक्त्या विज्ञेयम्—

कृष्णात्रगोत्रसम्भूतं कुलमाभीरदेशजम् ।
पुरं धवलमित्याहुः प्रपिता तानभट्टकः ॥
पिता जनार्दनः साक्षाज्जनार्दन इवापरः ।
मातुः स्वप्नभवा नाम भावेत्युक्तं स्वपूर्वजैः ॥
तौर्यत्रिकं तु संगीतं संगीती तज्ज्ञ उच्यते ।
घनश्यामेन चानुष्टुप् चक्रवर्तीति कीर्तितम् ॥
श्रीमत्साहिजहां - भूपतिलकोद्‌भुतभानुना ।
श्रीमत्साहिसुजाभूपदत्तं रायपदं ततः ॥
श्रीभावभट्ट - संगीतीरायानुष्टुप्चक्रवर्ती ।
एवं नामेदं जातं श्रीमदनूपविभो मम ॥

अनूपसिंहस्य गुणग्राहकतां श्रुत्वैव भावभट्टः तं शरणं जग्राह । अनूपस्याग्रहादुपर्युक्त-ग्रन्था विरचिताः । सङ्गीतरत्नाकरे स्वर-राग-प्रबन्ध-वाद्य-ताल-नाटक-रस- नृत्या-दीनां विषयाणां नवाध्यायेषु विवेचनं विद्यते । रागाणां विकासस्य परिचायकोऽयं ग्रन्थो बहुमूल्य एव ।

अनूपसंगीत-विलासस्य १९ अध्यायेषु स्वरराग-नाद-श्रुतीना सभेदं सरहस्यं च विवृतिर्विद्यते । रागाध्याये सप्ततिरागाः सन्दर्शिताः । रागाणां ध्यानं तु समाधिपूर्वकं कर्तव्यमिति भावभट्टस्य सम्मतिः । तथा हि शुद्धषाडवः

तरुमूले स्थिरचित्तः प्रियया सह संहसन् ।
वृतोत्तमाङ्गमुकुटः शुद्धषाडव ईरितः ॥

अनूपरागसागरे तु द्वादशाध्यायेषु रागाणामानन्त्यमेव प्रदर्शितम् । तथा हि यज्ञ-नामधारिणो रागा अग्निष्टोमः, वाजपेयः, अश्वमेधः, राजसूयः, महाव्रतम्, विश्व-जित्, ब्रह्मयज्ञः, प्राजापत्यम्, स्विष्टकृतम्, मनोहरा एव श्रूयन्ते । अपरे च रागाः त्रैलोक्यमोहनः, वीरः, गजच्छाया, रौद्रः, विष्णु-विक्रमः, कामोदः मोक्षद इति संज्ञिताः ।

अनूपसङ्गीतवर्तमाने तु रागवाद्यादिभिः सह रसनृत्यादीनां सम्यङ् निरूपणं कृतम् । नृत्यप्रकरणे शिवप्रिय-मायूर-दण्ड - चरचरीप्रभृतीनां रासकानां सभेदं वर्णनं विद्यते ।

---

१. अनूपसंगीतरत्नाकरस्य, अनूपसंगीतविलासस्य, अनूपसंगीताङ्कुशस्य च प्रकाशनमार्यभूषणप्रेस-पुण्यपत्तनात् संजातम् अनूपसागरः, अनूपसंगीतवर्त-मानम्, अनूपोद्देशश्च बीकानेरस्थानूपसंस्कृतपुस्तकालयेऽप्रकाशितानि सन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावभट्टस्तु महान् लेखक आसीत्। तेन बहवोऽन्ये ग्रन्था अपि विरचिताः। तेषु अधोलिखिताः बीकानेरनगरेऽनूपसंस्कृत-पुस्तकालये विराजन्ते—

गमकमंजरी तस्याष्टीका च, कुतुपाध्यायः, भावमंजरी, नष्टोद्दिष्टप्रबोधः, रागविवेकः, मुरलीप्रकाशश्च। गमकमंजर्यां स्वर-कम्पस्य, कुतुपाध्याये १०६ वाद्यानां, भावमंजर्यां नृत्यस्य, नष्टोद्दिष्ट-प्रबोधे स्वरप्रस्तारस्य तथा मुरलीप्रकाशे मुरलीवाद्यस्य गतीनां जातीनां च विश्लेषणं विद्यते।

पाण्डित्य–दर्पणः

पाण्डित्य-दर्पणस्य प्रणेता उदयचन्द्रो महाराजेनानूपसिंहेन परं प्रभावित आसीत्।[1] स तु अनूपसिंहस्य महान् प्रशंसकोऽभवत। तेन महाराज-विषये लिखितम्

श्रीसूर्यवंशावतंस - सदसत्यविवेचन - राजहंस-महाराज - श्रीमदनूपसिंहदेवेनाज्ञप्ते.........

उदयचन्द्रः श्वेताम्बरखरतरगच्छीयो जैनमुनिरासीत्। तस्य गुरुः भट्टारकः श्रीजिनचन्द्रः सूरी आसीत् उदयचन्द्रेण ग्रन्थोऽयं १७३१ विक्रमसंवत्सरे सम्पादितः।

अपरञ्च हिन्दीभाषायामुदयचन्द्रेणानूपरसालः १७२८ विक्रमसंवत्सरे, बीकानेर-गजल-पुस्तकं च १७६५ विक्रमसंवत्सरे विरचिते।

पाण्डित्यदर्पणे नवप्रकाशाः सन्ति। तेषु प्रकाशेषु क्रमशोऽधोलिखिता विनिर्णीताः सन्ति—

प्रथमप्रकाशे—गुरुभक्तिः, सत्यभक्तिः, विवेकभक्तिः, पण्डितभक्तिः, मूर्खनिन्दा, खलनिन्दा, पण्डितान् प्रति विज्ञप्तिः, विद्वद्वशीकरणोपायः, पुरवर्णनं, राजवर्णनं च।

द्वितीयप्रकाशे—राज्यनिर्णयः, सूर्यप्रभवः, उदयतीति पदस्य विचारः।

तृतीयप्रकाशे—भट्टारकलेखः, असम्बद्ध-पद-निर्णयः, वाक्य-निर्णयः, सद सद्व्यक्तिहेतवे' इति विवेचनम्, गुणदोषपदविवेचनम्, चन्द्रहास इति पदं सूर्यवाचकं चन्द्रवाचकं वा।

चतुर्थप्रकाशे—वासुदेव इति पदस्य कोऽर्थः।

पंचमप्रकाशे—रामनवमी-निर्णयः।

षष्ठप्रकाशे—श्राद्ध-निर्णयः।

---

१ पुस्तकस्याप्रकाशिता प्रतिः अनूपसंस्कृतपुस्तकालये वर्तते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तमप्रकाशे–फिट्-सूत्रनिर्णयः ।
अष्टमप्रकाशे–त्रपुसी, मंगल्या तथा आर्याणीति पदानां निर्णयः ।
नवमप्रकाशे–प्रज्ञामुकुरमण्डनादर्शः ।

जैनोऽपि लेखक उदयचन्द्रो वेदवेदाङ्गादिषु परं प्रावीण्यं गतः प्रतिपक्षिपण्डितानां कृतिषु संशोधनं विधातुं पाण्डित्यदर्पणस्य रचनां चकार । पाण्डित्य-दर्पणे धर्मशास्त्रव्याकरणार्थशास्त्रकाव्यशास्त्रादीनां विषयाणां गम्भीर-विवेचनं सोत्कर्षं सम्पादितमुदयचन्द्रेण ।

पाण्डित्यदर्पण इति ग्रन्थः न केवलं महाराजानूपसिंहस्यापितु प्रतिपक्षिसहायस्य बालचन्द्रस्याप्यादरास्पदं संजातम् ।

महाराजानूपसिंहस्याज्ञया उदयचन्द्रः स्वगुरोर्जिनचन्द्रसूरिणः पादपद्मेषु विनिवेदयितुं विज्ञप्ति-पत्रमेव पाण्डित्यदर्पणं विरचितवान् । ग्रन्थेऽस्मिन् पत्र-शैली क्वचित् प्रस्फुटीभवति ।

अनूपकालिका अपरे ग्रन्थाः

बहवो विद्वांसो विक्रमपुरे राजाश्रयं न स्वीकृतवन्तः । तेऽपि तस्मिन् युगे सारस्वतसाधनार्थं समीचीनां स्थितिमनुभूय साहित्यरचनायां कृतोत्साहा बभूवुः । एतादृशेषु कविषु हरिद्विजः सर्वोपरि राजते ।

हरिद्विजः

अनूपयुगस्य सर्वोच्चः कविरासीद्धरिद्विज इति निःसंशयमेव । स महासत्त्वसम्पन्न आसीत् । न कमपि शरणं प्राप्तुं समर्थो भवति स हरिः य एवं वदति—

व्रजनाथं परित्यज्य योऽन्यं नाथमुपाश्रयेत् ।
पिपासुः स्वर्धुनीं हित्वा याति मूढो मरीचिकाम् ।।

गोपालगीता १६

हरिद्विजो परं देवपरायण आसीत् । तेन प्रायः सर्वेषां लोकप्रियदेवानां स्तुतिः कृता । तस्य काव्यरचना भावप्रवणा गीतात्मिकाः सन्ति । तासु नृसिंहमायाशतकं प्रथममेव ।

हरिद्विजस्य कौटुम्बिकाः सर्वे विद्वांसः औरंगजेबस्योत्कर्षमसहमाना एव ये केचित्तस्मिन्काले हिन्दुत्व-रक्षका आसन्, तेषामेव पक्षग्रहणं कुर्वन्ति स्म । सम्भवत इदमेव कारणं वर्तते यत्ते अनूपसिंहस्य सामीप्यं न स्वीकृतवन्तः, यतः अनूपोऽपि अवरंगजेबस्य सहायक आसीत् । हरिद्विजस्तु अवरगजेबस्य शत्रुं दुर्गादासमेव प्रशंसितवान् । तथा हि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

औरंगोरगभंगभ्रमणविधिपटुर्वैनतेयो विहंगः
शत्रूणां राज्यसम्पच्चलदलदलने दारुणो दिग्गतंगः
क्रूराणां सौरभेयोकुलकवलकृतां कण्ठरुत्कालपाशः
षट्त्रिंशत् क्षत्रियाणामयमवनितले दुर्गवद्दुर्गदासः ॥

दुर्गादासप्रशस्तेः ७

अस्यामेव दुर्गादासप्रशस्तौ हरिद्विजेन स्वकुलस्य वर्णनं कृतम् । तथा हि—

ज्येशाख्यस्तस्य सूनुर्जगति विपुलयन्नुज्ज्वलां स्वां समज्ञा—
मुर्वीमुर्वीशदत्तामपि विपुलतमां नैव योऽङ्गीचकार ।
तत्पुत्रौ द्वावभूतां विमलतरमती वेदवेदाङ्ग-विद्या—
विद्वांसौ ब्रह्मचर्यव्रतचरणपरौ मोहनः सुन्दरश्च ॥
स्वच्छस्वान्तः स्वीयवंशे विशिष्टः
शिष्टैरिष्टः शेवधिः सद्गुणानाम् ।
ज्योतिर्विद्वान् मोहनस्यात्मजन्मा
श्रीमान् गंगारामनामा द्विजेन्द्रः ॥

अयमेव गंगारामो हरिद्विजस्य पितासीत् । हरिद्विजस्य लघुभ्राता हरिदेव आसीत् । गंगारामो यदा मेड़ता नगर्यामवसत् तदा हरिद्विजस्य हरिदेवस्य च जन्माभवत् ।[1] पश्चात् गंगारामः विक्रमपुरमागत्य तत्रैव न्यवसत्, यदा हरिद्विजः पंचविंशतिवर्षीय आसीत् । स्वकौलीनं व्रतं कमपि राजानमभिसम्बोधयता तेन स्पष्टीकृतम्

त्वं लक्ष्मीवान् वयमपि सदा पूर्णविद्याधनाढ्या—
स्त्वां सेवन्ते धनलवपरा वस्तुजिज्ञासवोऽस्मान् ।
त्वं शूरश्चेद् वयमपि तदा वादिविक्षेपदक्षा—
स्त्वं निष्कामो वयमतितरां तिष्ठ राजन् व्रजामः ॥

हरिद्विजः धनिकान् राज्ञो वा प्रति स्वमनोवृत्तिं व्यंजयति स्वकीये धन्व-खलाष्टक - नामके काव्ये —

सत्यानृतं भवति यत्रधनाभिवृद्ध्यै
यत्रामृतं मधुरिमान्वितमुज्झितं स्यात् ।
प्रायो न यत्र कुधियां सदसद्विवेकः
धन्वस्थलेषु खलेषु च को विशेषः ॥

हरिद्विजस्व काव्यवैशिष्ट्यं, स्वभावचारुत्वं च तस्य भ्रातृव्येन शिवराम व्यासेन प्ररोचितम् । तद्यथा—

---

१ मेड़ता तु मीराबाई देव्या जन्मभूमिः सुप्रसिद्धैव ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

तन्नन्दनः सज्जनरंजनः कृती हरिर्बभूवाद्भुतवाग्बृहस्पतिः ।
महामतिः संसदि नन्दयन्मनः सदा नृणां सुन्दर-दुन्दुभिस्वनः ।।
विलोक्य यत्काव्यकलासुकौशलं मुदं दधे कम्प्रशिरा सरस्वती ।
स्वयं कविः स्वीयकवित्वहानितः सदोशना दीनमना मनागभूत् ।।

हरिद्विजो बहूनां साहित्यिकविधानां लेखक आसीत । तथापि प्रथमतः स गीतिकाव्यकार एव । गीतिषु तस्य नृसिंहमायाशतकं गोपालगीता च सर्वोत्तमे।

नृसिंहशतकम

विक्रमपुरस्य भगवतो नृसिंहस्य मन्दिरं वर्तते । तस्य भगवतो भक्ताः सन्ति हरिद्विजस्य कौटुम्बिका अधुनापि । तमेवाधिकृत्य हरिद्विजेन नृसिंहशतकं विरचितम् । पुस्तकेऽस्मिन् सर्वेषु पद्येषु अन्तिमश्चरणो विद्यते—

हा हन्ताहं तव नरहरे मायया वञ्चितोऽस्मि ।

अत्र जन्मनः प्रभृति मरणपर्यन्तं मरणानन्तरं वा दुःखस्य छाया न त्यजति कमपि पुरुषमिति स्पष्टीकृतम् । ननु सुखमनुभूयते किन्तु प्रतिपदं सुखं तु दुःखाभिभूतमेव भवति । तथाहि गृहस्थाश्रमे

लास्यं पश्यन् परमललितं लोलदृग् - लासिकानां
हास्यं कुर्वन् सह सहचरैस्तासु मुंचन् कटाक्षान्
कामं कामज्वरजनितरुग्भेषजासक्त - चित्तः
हा हन्ताहं तव नरहरे मायया वञ्चितोऽस्मि ।।

नात्रैवेतिश्रीः । मरणकालोऽपि समायातः ---

कासश्वासादिभिरनुदिनं घर्घरध्वान्तकण्ठोः
दृष्टचा हीनः श्रवणविकलो यष्टिमादाय गच्छन् ।
कालक्रूर–ज्वर–बहुरुजा क्रान्तगात्रो नितान्तं
हा हन्ताहं तव नरहरे मायया वंचितोऽस्मि ।।

मरणानन्तरं यमलोके पीडाभिभूतिः नानायोनिषु परिभ्रान्तिर्वा कविना सविस्तरं चित्रिता । ननु स्वर्गोऽपि पुण्यकर्मणाधिगम्यते । तत्र तु

देवोद्याने दिवि सुरसरित्तीरवानीरकुंजे
पुण्योद्रेकादुपचितमनोवांछितव्योमयानाः ।।

शतकेऽस्मिन् कवेर्नैजिकी काल्पनिकी आत्मकथा जन्मान्तरव्यापिनी निगद्यते। तद्यथा स्पष्टीकृतं कविना शतकमिदमुपसंहरता —

उक्तानुक्तेष्वविरलतया कोटिकृत्वो जनुःषु
प्रादुर्भूय क्षितिमधिगतः साम्प्रतं विप्रवंशे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्तो विस्मयच्चरणशरणं श्रीनृसिंह त्वदीयं
नो चेत् भ्रात स्तदिह शपथो लोकनाथस्त्वमेव ॥

लोकस्य पापाद्विनिवृत्तिरेव हरिद्विजस्य परमोद्देश्यमस्मिन्काव्ये । तथा हि —

हरिद्विजोदीरितमच्छमेतन्नृसिंहमायाशतकं निशम्य
न पापभावाद् विनिवर्तते यः स्थितोऽस्मि तूष्णीं तमहं प्रणम्य ।

गोपालगीता

हरिद्विजेन १०२ पद्यात्मिका गोपालगीता १७४२ विक्रमसंवत्सरे विरचिता । अत्र ब्रह्मेन्द्रपाण्डवधृतराष्ट्रदुर्योधनादिभि र्गोपालस्य स्तुतिः संगृहीता । एतासु स्तुतिषु पात्राणां व्यक्तित्वस्य छाया प्रतिफलिता । पात्रानुकूलं छन्दोऽपि प्रवर्तितं सर्वत्र । अनुष्टुप्जातिवसन्ततिलका - भुजङ्गप्रयात - द्रुतविलम्बितादीनि छन्दांसि प्रयुक्तानि सन्ति । तथाहि अक्रूरस्योक्तिः —

अहं व्रजाधीश - पदारविन्द - परागपूरे विहिताभिषेकः ।
भवे भवे भाग्यवशाद् भवेयं मनो न कुर्यामपुनर्भवाय ॥

कर्णस्य स्तुतिः

नान्यं शृणोमि न वृणोमि न चिन्तयामि
नान्यं यजामि न भजामि न चाश्रयामि ।
त्वत्पादमकरन्द - कणैकदेश-
लेशेन मामनुगृहाण शिखण्डमौले ॥

शततमे पद्ये स्वयं हरिद्विजः स्तौति—

अपिजनः शरण भवतो निजः
चरण - पंकजमेति हरिद्विजः
त्वमसि भक्तिमतां जगतां गुरु-
र्मदनमोहनमोहमपाकुरु ॥

अन्यतराणि च हरिद्विजस्य अष्टकानि सन्ति —

योगमाया–, रामचन्द्र–, पशुपतिकृपा–, अर्धनारीश्वर–, शिव–, नारायण–, हरिचरणशरण–, नन्दबाल–, नन्दकिशोर–, देवकीनन्दन–, निर्दन्तछदज–, वल्लवीवल्लभ–, रामकृष्ण–, माया-शारदा–, ध्रुव–, नन्दकिशोर–, परब्रह्म–, गङ्गा–, बुध–, शुक्र–, शनैश्चर–, राहु–, केतु–, आदीनि ।

अन्येषां देवादीनां स्तुतिः नवकदशकादिभिः कृता हरिद्विजेन । तथा हि दशकेन गरुडध्वजस्य, भगवतः दशावतारस्यच, तुलसीमणिस्तवे तु विंशतिः पद्यानि अनुष्टुप्छन्दसि सन्ति । नवकेन मालतीलतायाः, नवनिकुञ्ज नागरस्य च स्तुतिः सम्पादिता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरिद्विजो नैसर्गिकविभूतीनां रमणीयतायाः परमोपासक आसीत् । न केवल देवानामपितु मालती-लतायाः स्तवस्तेन कृतः । तथा हि—

सुभगः सुमनस्तोमो गन्धश्च घ्राणतर्पणः कोऽपि ।
उच्चैः सुकुमारत्वं मालति किं किं तव स्तौमि ।।
मकरन्दं विकिरद्भिः परिमलवद्भिः शिलीमुखोद्घुष्टैः
भासि प्रसूनवृन्दैर्मालति किं किं तव स्तौमि ।।

जनार्दनस्तोत्रे हरिद्विजः प्रातः सुषमावर्णनेन जनार्दनस्तुतिं सम्मिश्रयति। तथा हि—

प्रतप्तपुरट - द्युतिर्दिगियमेति पौरन्दरी
अहो स्फुटदलाद् बहिर्भवति भृंगराजोऽम्बुजात् ।
तमः परिविलुप्यते सपदि सर्वतः शार्वरं
जनार्दन नमोऽस्तु ते जनमनन्यमानन्दय ।।

हरिद्विजः काव्य दृष्ट्या ज्योतिषशास्त्रमपि परिचितवान् । मुहूर्तमञ्जूषायां स काव्यशैलीं समाश्रित्यैव मुहूर्तानां वर्णनं कृतवान् ।

हरिद्विजस्य सर्वे ग्रन्था बीकानेरस्थ हरिद्विजपुस्तकालये सुरक्षिताः सन्ति।

हरिदेवः

उपरिचर्चितस्य हरिद्विजस्य लघुभ्रातासीत् हरिदेवः । स्तोत्रकाव्यनिर्मा तेन प्रणीतं सावित्र्यष्टकं चमत्कारपूर्णमेव । अत्र सावित्री सरस्वतीरूपेण वन्दिता । तथाहि—

ब्रह्माणीं कमलासनस्य दयितां ब्रह्माग्नि-संवर्धिनीम्
ब्रह्मैकाक्षररूपिणीं भगवतीं भक्तिप्रियां भावुकाम्
सारासार - विवर्धिनीं समरसां सायुज्य – सिद्धिप्रदां
सावित्रीं सचराचरस्य जननीं वन्दे जगन्मोहिनीम् ।।

हरिदेवस्याजित-विलासस्तु संस्कृत-कवीनां परमोत्कर्षसूचकः । 'स कविः भारतीयसंस्कृतेः संरक्षणाय किं कर्त्तुं समर्थः' इति हरिदेवस्याजितविलासादर्शे प्रतिफलति ।

अजितविलासः

अजितविलासस्तु १७६२ विक्रमसंवत्सरे हरिदेवेन जोधपुरस्य राजकुमार मजितं प्रति प्रेषितं पत्रमेव । अजितकुमारस्य पिता जोधपुरस्य राजा महाराज-जसवन्त-सिंहः औरङ्गजेबस्य दुर्नीत्या पञ्चत्वं गतः । दुर्गादासस्तदा जसवन्तस्य पुत्रमजितकुमारमभिषेक्तुं प्रायतत ।

अजितविलासस्तु गद्य–पद्य–सम्मिश्रितं पत्रंवीररसोच्चित्रं वर्तते । तथाहि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पटहनिस्वन - पूर्ण - दिगन्तरे
महति दिग्विजये विजयोपमः ।
प्रबलवैरिगणान् विकिरन्नरं
वियति वारिधरानिव मारुतः ॥
यवन–वंचक– धूर्त - पटच्चरान्
प्रकृति - दुःखकरानुदरम्भरान् ।
प्रशमयन् प्रकटं विकटैर्भटै
रविरिवोग्रतमांसि करव्रजैः ।
रथकुरंगमतंगजपत्तिभिः
पृतनया घनया निजया युतः ।
मरुमनुष्यमनांसि विनोदयन्
निविडया घटयेव घनाघनः ॥
विविधशास्त्र-विचार-विशारदै-
र्बुधजनैरुपविश्य सहाधिकम् ।
सदसि भूपति–जन्मफलं सदा
ह्यनुभवन्निव भोजमहीपतिः ॥

हरिदेवोऽस्मिन्पत्रे आदर्शनृपतेः चरित्रस्य चित्रणं करोति । तस्य समक्षं भोजमहीपतिर्वर्तते ।

हरिदेवस्यापरं पत्रं २१६ पद्यात्मकं हरिद्विजं प्रति प्रेषितमासीत् । हरिदेव-हरिद्विजयोः पिता गंगाराम आसीत् ।[1] तस्य १७४६ विक्रम संवत्सरे लिखितं पत्रं भ्रातृव्यं हृषीकेष प्रति प्रेषितमासीत् । हरिदेवेन व्याकरणशास्त्रमधिकृत्य सारस्वत-मिताक्षरा-टीका गणगणना च लिखिते ।

हरिदेवस्य पुत्रः शिवराय–व्यासः गणेशाष्टकम् कुसुमस्तबकस्तवं च विरचितवान् । कुसुस्तबके गीतगोविन्दस्य संगीत-लहरी प्रोद्भाविता । तद्यथा—

अयि शिवनन्दन दैत्यनिकन्दन सहृदय-चन्दन सिद्धिपते
गुणगणनामिह कोऽर्हति कर्तुमलं स्वलम्बित–विश्वपते ।

---

१ गंगारामस्य वर्णनं तस्य पौत्रः शिवरामव्यास एवं कृतवान्

गंगारामः सामगः सत्यभावः
स्वच्छस्वान्तः शान्तकान्तस्वभावः
ज्योतिर्विद्या – लब्धलोक – प्रशंसः
क्ष्मादेवोऽभूत् व्यासवंशावतंसः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरद नमोऽस्तु नमोऽस्तु वतेश्वर दीनजनानवते भवते
मसृणमदोदक मोदक–मोदक मोदक मोदक मोदवते ॥

पद्येऽस्मिन् गणेशस्य स्तुतिर्वर्तते ।

हरिदेवस्य कृतयः बीकानेरस्थ-हरिद्विज-पुस्तकालये संरक्षिताः सन्ति ।

जनार्दनगोस्वामी

अनूपसिंहस्य राज्य–काले जनार्दनगोस्वामी शृंगारशतकं वैराग्यशतकं च विरचितवान् ।[1] स्पष्टत एव गोस्वामी भर्तृहरिणा प्रभावितो वर्तते ।

जनार्दनगोस्वामी अनूपसिंहस्य गुरोः शिवानन्दगोस्वामिनो लघुभ्राता-सीत् ।[2]

शृंगारशतकम्

नायिका-नायकयोः सनातनरमणीय-व्यवहारमेव दर्शयन्ति शृंगारकवयः। तदेवास्मिन् शतकेऽपि कृतम् । केचित् चमत्कारपूर्णाः श्लोका अधोलिखिताः—

लोचनस्फुटसरोरुहरम्या गौरता विमलवारिभृता च ।
केशशैवलमनोरमकान्तिर्भाति तन्वि तटिनीव तनुस्ते ॥३३

श्रावं श्रावं गर्जितं वारिदानां स्मारं स्मारं प्रेयसीं कोऽपि पान्थः ।
ग्रामे चक्रे रोदनं वै तथासौ येनाशेषो ग्राम्यलोको रुरोद ॥४५

यद्भुक्तो न पयोनिधौ जलचरैर्दग्धो न चौर्वाग्निना
पीतः कुम्भभुवागतो न जठरे नाशं सहाम्भोधिना ।
गच्छन् व्योम्नि निराश्रयेण पतितो जानेऽहमेवं प्रिये
धात्रा हन्त वियोगि-दुःख - कृतये चन्द्रस्ततो रक्षितः ॥५४

वैराग्यशतकम्

जनार्दनस्य वैराग्यशतकं नैराश्य-जनितं प्रतिभाति । पुनः पुनः कविर्धन-हीनतामाक्रोशति । अथ किं—

ये दुर्जनाः सन्ति हि ते धनाढ्या
ये सज्जनास्ते तु धनेन हीनाः ।

---

१ एतयोर्द्वयोः शतकयोः प्रकाशनं काव्यमालासीरीज ११, १३ भागयोर्वर्तते।
२ शिवानन्दस्य परिचयः २२० पृष्ठे द्रष्टव्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथापि कविः बाल्यं तारुण्यं च शोभाकरे न मन्यते। अतः स भावि कार्यक्रमं निर्धारयति--

बाल्यं गतं सकलमर्भकलीलयैव
तारुण्यमप्यथ गतं विविधैर्विलासैः।
गंगातरंगकलनैरहमेतदुच्चै—
र्वृद्धत्वमेव सकलं सफलं करिष्ये॥

श्रीनिकेतनगोस्वामी

श्री निकेतनगोस्वामी अनूपसिंहस्य गुरोः उपर्युक्तशिवानन्दगोस्वामिनः पुत्र आसीत्। श्रीनिकेतनेन सभेदार्यासप्तशतीति काव्ये सप्तशतीनां सनातन-परम्परामनुसृत्य शृंगाररसात्मक–स्फुट–पद्यानां रचनां कृता।[1] काव्येऽस्मिन्ना-नाच्छन्दःसु १०१० पद्यानि सन्ति। श्रीनिकेतनस्यास्या रचनायाः तस्मिन् प्रदेशे महानादरः समजायत। सूरतविलासे रामकविनार्यासप्तशत्याः प्रशंस्ति कृतवान् —

आर्यासप्तशतीति नाम ललिता सार्धा सहस्रात्मिका
आर्याणां कुतुकाय तेन रसिकानां प्रीतये स्वात्मनः।
तोषायोच्छलदुत्कटाच्छाविगलच्छृङ्गारपुष्पोत्करो
ग्रन्थः कोऽपि सुरद्रुरेष कलितो भूमौ रसोल्लासिना॥

विक्रमपुरस्यानूपकालिकी त्रिंशद्वर्षोद्भवा साहित्यिकाभ्युन्नतिरस्माभिः परामृष्टा। त्रिंशद्वर्षाभ्यन्तरे कस्मिंश्चिन्नगरे संस्कृतसाहित्यस्येदृशी अभिवृद्धिः क्वचिदेव कर्णगोचरीभवति। अस्मिन्नन्तराले काव्यस्य नैकविधानां शास्त्रस्य च विविधशाखानामभूतपूर्व एव प्ररोहः साहित्यक्षेत्रं समलङ्करोति। एषा सर्वङ्कषाभ्युन्नतिरनूपदेवस्योदारसंकल्पं महासत्त्वं संस्कृतसंवर्धनोत्साहं भृशं व्यनक्ति। आधुनिकसंस्कृतसाहित्याभिवृद्धेः स्वल्पमेव ज्ञानमस्माकं विद्यत इति दुर्भाग्यमेव। अर्वाचीनयुगेऽपि भारतस्य सर्वेषु भागेषु महात्मन आश्रित्य अन्यथा वा विद्वांसः

१ अप्रकाशितैव सभेदार्या-सप्तशती बीकानेरनगरस्य फाल्गुनगोस्वामिनः सविधे सुरक्षिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतभाषायां काव्यशास्त्राणि विरचितवन्तः, विरचयन्ति वा। तेषां कृतित्व-मस्माकं समक्षं न समायाति तत्सम्बन्धिशोधाभावात्। यत् किञ्चिद्देववाण्यां लिखितं साहित्यं विद्यते, तत्सर्वं नैकदृष्टिभिर्बहुमूल्यमिति सत्यमवधार्याधुनिक-साहित्यस्य संरक्षणं, प्रकाशनं प्रचारं च भृशं कामयामहे।[1]

१ लेखस्य सामग्रीयं प्रायः सर्वशः विक्रमपुरस्य श्रीदिवाकरशर्मणः कृतिभ्यः परामर्शेभ्यश्च निरूपिता। एतादृशानां विदुषां प्रयत्नः श्लाघ्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालिदास–भारती–६

[कालिदास-साहित्ये देववृक्षाः]

डा० रेवाप्रसाद द्विवेदी

महाकवेः कालिदासस्य साहित्ये देववृक्षा देवा इवैव भूम्ना समादृताः। तदत्र तानेवाश्रित्य कालिदासभारतीमनुशीलयामहे। तत्र—

"पञ्चैते देवतरवो मन्दारः पारिजातकः।
सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥—"

इत्येवममरकोषे देववृक्षाणां पंच नामानि प्रस्तूयन्ते। कालिदास एतानि सर्वाण्यपि नामानि बहुशः प्रयुणक्ति। एतानीह सूचीकटाहन्यायेनैकैकश उपाददमहि। तत्र—

हरिचन्दनम्

वृक्षस्यास्योल्लेखो देववृक्षरूपेण त्रिः पार्थिववृक्षरूपेण चैकवारं कालिदासे लभ्यते। तथाहि—

१- पर्वतराजपुत्र्या भगवत्याः पार्वत्या हरिचन्दनास्पदे स्तनद्वये कपालिना सह पाणिग्रहणाच् चिताभस्मरजः पदं करिष्यतीति ब्रह्मचारिवचसा कविर्ब्रूते—

"अयुक्तरूपं किमतः परं वद त्रिनेत्रवक्षः सुलभं तवापि यत्।
स्तनद्वयेस्मिन् हरिचन्दनास्पदे पदं चिताभस्मरजः करिष्यति ॥कुमा.५।६९॥

२- रघुवंशे महेन्द्रस्य प्रकोष्ठं

३- शाकुन्तले च वक्षःस्थलं हरिचन्दनांकितमेवं वर्ण्यते—

"ततः प्रकोष्ठे हरिचन्दनांकिते प्रमथ्यमानार्णवधीरनादिनीम्।
रघुः शशांकार्धमुखेन पत्रिणा शरासनज्यामलुनाद् विडौजसः ॥ रघु.३।५९॥
अन्तर्गतप्रार्थनमन्तिकस्थं जयन्तमुद्वीक्ष्य कृतस्मितेन।
आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला हरिणा पिनद्धा ॥ शाकु.७।२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतेषु स्थलेषु हरिचन्दनकाष्ठस्य घर्षणेन निष्पन्नाय तत्तदंगानुलेपनोपयिकाय रसाय प्रयुक्तो मन्तव्यः । अत्र च प्रमाणं शाकुन्तलपद्ये प्रयुक्तमामृष्टेति पदम् । आमर्षणमिदं नान्यत् अपितु तदेव यद् विलेपनपदेनोच्यते । विलेपनस्यास्य वर्णः पीतारुणः संभाव्यते, शुक्लत्वे गौरवर्णयोर्महेन्द्र-पार्वत्योः शोभासंपोषेऽनतिप्रयोजनकत्वात्, कल्पान्तरस्य चासंभवात् । अस्ति चात्रैतत् प्रमाणं यत् स्वयं कालिदास एव स्वयंवरप्रस्तावागतं पाण्ड्यनृपं रघुवंशस्य—

"पाण्ड्योयमंसार्पितलम्बहारः क्लृप्तांगरागो हरिचन्दनेन ।
आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ॥"

इत्यनेन पद्यरत्नेन हरिचन्दनेन रचितांगरागं ब्रवीति । अत्र रागपदं वर्णद्रव्यमात्रपरं रक्तपीतारुणान्यतमवर्णविशेषद्रव्यपरं वेति जिज्ञासायां बालातपौपम्यं साहाय्यं वितरति । अत्र पर्वतविशेषोपमानिकायाः पाण्ड्यराजोपमेयिकाया वाक्यार्थीभूतालंकारात्मिकाया उपमाया अन्यथानुपपत्त्या बिम्ब - प्रतिबिम्ब - भूतयोर्हरिचन्दनांगराग-बालातप-पदार्थयोर्यदैकात्म्यमिमाधयिषितं तत्साधकस्य सादृश्याप्यन्यथासंभवाभावाद् बिम्ब-प्रतिबिम्बीभूतपदार्थनिष्ठतयारुणवर्णत्वरूपं साधर्म्यमवशमाक्षिप्यते । अयमत्रापरः प्रश्नो यद् यदिदमरुणत्वं तद्धि हरिचन्दने कीदृग्विधम् । सहजमेव, आहार्यं वा । अत्र समाधानं कालिदासप्रयोगान्नोपलभ्यते । शब्दकल्पद्रुमादिषु पुनरस्योभयविधत्वमपि दृश्यते । वयमत्रैवं चिन्तयामो यदरुणत्वमिदं देववृक्षत्वपक्षे सहजं पार्थिववृक्षत्वपक्षे चोभयविधमपि मन्तुं शक्यते । पार्थिवेषु हि वृक्षेषु रक्तचन्दनं लभ्यत एव, पीतत्वे च केशरादिद्रव्ययोगोपि तद्रसेषु क्रियतेतमाम् ।

तदित्थं हरिचन्दनपदं कालिदासेन चतुर्वारं प्रयुज्यते । तेषु देववृक्षत्वं प्रयोगत्रयमात्रं यावदेव सीमितम् । पाण्ड्यनृपप्रसंगागते पुनरत्र पार्थिवत्वमेव केवलं न देवत्वम् ।

सन्तानः

अमरकोशकृता प्रयुक्तस्य सन्तानपदस्यार्थे कालिदासः संतानकपदं प्रयुंक्ते । तदपि च केवलं वारत्रयमेव । तथाहि—

४- १- भगवतो रामस्य मानुषशरीरपरिग्रहावसरे सन्मंगलोपचाराणामादिरचना संतानक-वृष्ट्यैव संपद्यते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"सन्तानकमयी वृष्टिर्भवने तस्य पेतुषी ।
सन्मंगलोपचाराणां सैवादिरचनाभवत् ।। १०।७७रघु.।।

५- २- भगवत्याः पार्वत्या विवाहमांगल्याय तत्पितुर्नगरमोपधिप्रस्थं सन्तानकाकीर्णमहापथं जायते---

'सन्तानकाकीर्ण' - महापथ तच्चीनांशुकैः कल्पितकेतुमालम् ।
भासोज्ज्वलत्कांचनतोरणानां स्थानान्तरं स्वर्ग इवाबभासे ।।७।३-कुमा०।

६- ३- एतदेवौपधिप्रस्थं तेन गन्धमादननाम्नोद्यानेन गन्धवदस्ति यत्र विद्याधराध्वगाः सन्तानक-तरुच्छायासु मार्गखेदं विनुदन्ति—

'सन्तानक-तरु-च्छाया-सुप्त-विद्याधराध्वगम् ।
यस्य चोपवनं बाह्यं गन्धवद् गन्धमादनम् ।।६।४६-कुमा०।।

एतस्मिन् प्रयोगत्रये विशेषद्वयमेव सन्तानगतं सिद्धयति १-सुगन्धि-पुष्पम २-छाया चेति ।

३ मन्दारः

मन्दारपदं कालिदासेन देववृक्षायैव दशवारं प्रयुज्यते । एतेषु वारमेकमस्य सामान्यतयैव प्रयोगो लभ्यते, अन्यत्र च पुष्पं छाया चेति वैशिष्ट्यप्रतिपादन-परतया । तथाहि---

१- शाकुन्तले मारीचाश्रमे रूढा मन्दारा महेन्द्रजनन्या अदित्यैव स्वहस्तेन परिवर्धिताः सन्ति—

"अदितिपरिवर्धित-मन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः ।"
शाकु० ७।१२-गद्यम् ।।

२- अलकायाः कन्यका मन्दाकिन्यास्तटे रूढानां मन्दाराणां छायया वारितोष्णा भवन्ति —

मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ।।मेघ०२।६।।

३- न केवलं मन्दाकिन्या अपि तु व्योमगंगाया अपि तटे मन्दारा निरूढाः । तेषां निर्भरं पतन्ति पुष्पाणि गंगाया अस्या प्रवाहं वीचिषु शृंगारयन्ति । कविस्तत्र सप्तर्षीन् स्नपयति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आप्लुतास्तीरमन्दार–कुसुमोत्करवीचिषु ।
व्योमगंगाप्रवाहेषु दिङ्नागमदगन्धिषु ।।कुमा० ६।५।।

४- अलकायामभिसारिकाणां नैशो मार्गः सवितुरुदयकाले गत्युत्कम्पादलकपतितैर्मन्दारैरेव सूच्यते—

"गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारैर्नैशो
मार्गः सवितुरुदये सूच्यते कामिनीनाम् ।।"-मेघ०-२।११।।

५- विक्रमोर्वशीये विरहविह्वलः पुरूरवाः संगमनीय-मणिमनादित्सन् वक्ति-
मन्दारपुष्पैरधिवासितायां यस्याः शिखायामयमर्पणीयः ।
सैव प्रिया संप्रति दुर्लभा मे किमेनमस्त्रोपहतं करोमि ।।५।६५-विक्र०।।इति।।

६- स्वयंवरागतं मगधराजमुद्दिश्य सुनन्दा ब्रवीति—
क्रियाप्रबन्धादयमध्वराणामजस्रमाहूत - सहस्रनेत्रः ।
शच्याश्चिरं पाण्डुकपोललम्बान् मन्दारशून्यानलकांश्चकार ।।६।२३-रघु०।इति।।

७- मन्दारस्योपरिवर्णितानि मुक्तानि पुष्पाणि स्तबकरूपाण्यपि भवन्ति। मेघदूते यक्षगेहोपान्ते यक्षपत्न्या यो मन्दारो वर्धितः स हस्त–प्राप्य–स्तबक–नमितो वर्ण्यते— तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
यस्योपान्ते कृतक-तनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ।। मेघ० २।१५।।

८- मन्दारपुष्पाणां माला अपि निर्मीयन्ते। शाकुन्तले हरिचन्दनप्रस्तावे यत् ७।१ पद्यमुद्धृतं, तत्र देवराजस्य वक्षो मन्दारमालया शोभितं व्यज्यते ।

९- विक्रमोर्वशीये तन्नायिकाया उर्वश्या अपि हृदयं मन्दारकुसुमदाम्ना भूषितं वर्ण्यते—

मन्दार–कुसम–दाम्ना गुरुरस्याः सूच्यते हृदयकम्पः ।
मुहुरुच्छ्वसता हृदये परिणाहवतोः पयोधरयोः ।।१।७-विक्र०।।

१०- मन्दारपुष्पाणां रजांस्यरुणवर्णानि भवन्ति। देवराजः शिवस्य पादौ मन्दार-रजोभिररुणयति—

असंपदस्तस्य वृषेण गच्छतः प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना विनिद्रमन्दार रजोऽरुणांगुली ।।
कुमा०-५।८०।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदेवं मन्दारपदं कालिदासो दशवारं प्रायुंक्त । यद्यपि साहित्याकादमीतः प्रकाशिते कुमारसंभवसंस्करणे ३।२१–पद्यानन्तर—

"ततः स्फुरत्केसर-लग्न-भृंगं सौरभ्यसंक्रान्त-दिगन्तरालम् ।
ददौ हरिः सादरमीक्षमाणो मन्दारमालां मकरध्वजाय ॥"इति पाठान्तरपद्यं मन्दारस्य पुष्पाणां मालाया वर्णनं लभ्यते तथापि पद्यस्यास्य मूलत्वाभावादत्र संग्रहो न क्रियते ।

४ पारिजातः

१- **पुष्पम्**– पुरूरवसो विरहिता नारायणोरुसंभवा दिव्यस्त्रीललामभूता उर्वशी पारिजातपुष्पशयनेऽपि सुखं न विन्दति । वेदनामिमामियमेवं पत्रार्पितां करोति—

सामिअ संभाविआ जह अहं तए अमुणिआ
तह अणुरत्तस्स जइ णाम तुज्झ उवरि होमि ।
किं मे लुलिअ–पारिजाअ–सअणिज्जअंमि सुहा
णंदणवादा अवि अच्चुण्हा सरीरए ॥२।१२-विक्र०॥
स्वामिन् संभाविता यथाहं त्वया-ज्ञाता तथानुरक्तस्य
यदि नाम तवोपरि भवामि ।
किं मे लुलितपारिजात–शयनीये सुखाः नन्दनवनवाता
अपि अत्युष्णाः शरीरके ॥

२- भगवान् शंकरः पुलोमतनयालकोचितैः पारिजातकुसुमैर्नवपरिणीतायाः भगवत्याः पार्वत्या अलकान् प्रसाधयति—

तां पुलोमतनयालकोचितैः पारिजातकुसुमैः प्रसाधयन् ।
नन्दने चिरमयुग्मलोचनः सस्पृहं सुरवधूभिरीक्षितः ॥कुमा०-८।२७॥

३- रघुवंशे कुशवधूः कुमुद्वती शचीसखीत्वमासाद्य पारिजातांशभागिनी भवति–

तयोर्दिवस्पतेरासीदेकः सिंहासनार्धभाक् ।
अपरापि सखी शच्याः पारिजातांशभागिनी ॥ १७।७-रघु० ॥

४- **वेदिका, भूषा, अलंकरणं, सातिशयं तेजः, समुद्रसंभव त्वं च** । स्वयंवरार्थमागता नृपाः स्वयंवरसभायां महार्हनेपथ्यमण्डिता मञ्चमधितिष्ठन्ति । ते सर्वे कल्पवृक्षा इव राजन्ते । रघुसूनुरजः पुनः सातिशयेन तेजसा तेषां मध्ये पारिजात इव लक्ष्यते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये ।
रराज धाम्ना रघुसूनुरेव कल्पद्रुमाणामिव पारिजातः ॥ ६।६-रघु० ॥

अत्रासनपदेन मंच एवात्र विवक्षितः—

स तत्र मंचेषु मनोज्ञवेशान् सिंहासनस्थानुपचारवत्सु ।
वैमानिकानां मरुतामपश्यदाकृष्टलीलान् नरलोकपालान् ॥६।१-रघु०॥—एतेन पूर्वपद्येन सिंहासनानां मंचस्थितत्वस्य वर्णितत्वात् । एतेनोपमानपक्षेपि तादृशं वेदिकाकल्पं चत्वरमाक्षिप्यते । भूषालंकरणयोरपि नेपथ्यप्रतिबिम्बतयात्रावश्यक एवाक्षेपः । यच्चात्र सातिशयं तेजः तत्र कारणं दिव्यान्याभरणानि समुद्रसंभवत्वं च एतच्चोभयं कविरनेकधा वर्णयति । तथाहि—

५- क्षीरसागरे भोगिभोगासनासीनं भगवन्तं विष्णुं देवव्यूहः पश्यति । दिव्याभरणभूषितोयं क्षीरसागरे सर्वथा पारिजात इवैव लक्ष्यते--

बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः ।
आविर्भूतमपां मध्ये पारिजातमिवापरम् ॥ १०।११ रघु० ॥

अत्र दिव्याभरणानामुपमानभूते पारिजातेपि सत्त्वमौचित्यलभ्यम् । न हि तद् बिना उपमेयभूते भगवति प्रतिपादितस्य दिव्याभरणत्वविशेषणस्य कथमप्यन्यथा पोषः । समुद्रसंभवत्वं पुनरविशदतरमेव । निम्नोद्धृते पद्ये पुनस्तदतीव स्पष्टम्—

तस्मात् समुद्रादिव मथ्यमानादुद्वृत्तनक्रात् सहसोन्ममज्ज ।
लक्ष्म्येव सार्धं सुरराजवृक्षः कन्यां पुरस्कृत्य भुजंगराजः ॥ १६।७९-रघु०॥

अत्र हि कुमुद्वतीमादाय सरयूप्रवाहादुद्भूतो नागराजः कुमुदः समुद्रसंभूतेन सुरराजवृक्षेणोपमीयते । सुरराजवृक्षपदेनात्र पारिजात एव लक्षितु शक्यते, समुद्रनिष्पन्नेषु रत्नेषु वृक्षस्य सुरराजेनैव गृहीतचरत्वात् । आस्तां तावदेतत्, स्वयं पारिजातशब्द एव व्युत्पत्ताविव प्रवृत्तावपि समुद्रसंभूतत्वमेव निमित्तीकरोति । हेमाद्रिराधाकान्ताभ्यां "पारिणि अब्धौ जात" इति तथैवास्य रघुवंशदर्पण-शब्दकल्पद्रुमयोर्व्याकृतत्वात् । अस्ति च समुद्रसमुद्भूतस्य वृक्षरत्नस्य "पारिजात-"पदव्यपदेश्यता पुराणेषु प्रतीता । यथा चैतत् तदग्रे प्रतिपादयिष्यते ।

एवं हि कालिदाससाहित्ये पारिजातशब्दपूर्वकं पंचवारम्, वारमेकं च सुरराजवृक्षपदेन पारिजातस्य वर्णनं लभ्यते ।

कल्पः

कालिदासः पारिजातं कल्पद्रुमेभ्यः सातिशयं प्रतिपद्यमानोपि वर्णयति सातिशयं कल्पद्रुमानेव । स हि कल्पपदेन वृक्ष–तरु–द्रुम–लता–शब्दान् योजयन्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विंशतिवारं कल्पपादपं वर्णयति । तत्र चास्य विशेषानपि सविशेषमसावुल्लिखति । यथा चैतत् तद् अधोदत्तेन विवरणेन स्पष्टम् । तथाहि—

१- **पुष्पम्** - रघुवंशे मातंगर्षिशापान्मतंगयोनिमापन्नो गन्धर्वपतेः पुत्रः प्रियंवदो लोह --मुखबाणवेधद्वारा तत उद्धृतवन्तं रघुकुमारमजं कल्पद्रुमोत्थैः पुष्पैरवकिरति —

"अथ प्रभावोपनतैः कुमारः कल्पद्रुमोत्थैरवकीर्य पुष्पैः ।
उवाच वाग्मी दशनप्रभाभिः संवर्धितोरस्स्थलतारहारः ॥५।५२रघु.॥

२- **गन्धः**- कल्पद्रुमकुसुमेषु, तथा तीव्रो गन्धो भवति यथा हि मधुकरा उन्माद्यन्ते । विक्रमोर्वशीये कविः कथयति—

"गन्धुम्माइअ-महुअरगीएहिं वज्जतेहिं परहुअतूरेहिं ।
पसरिअ-पवणुव्वेल्लिअ-पल्लव-णिअरु सुललिअ-विविह-पआरेणच्चइ कप्पअरु ॥

(गन्धोन्मादितमधुकरगीतैर्वाद्यमानः परभृततूर्यैः ।
प्रसृतपवनोद्वेल्लितपल्लवनिकरः सुललितविविधप्रकारेण नृत्यति कल्पतरुः ॥)

३- **फलम्**:- सुकृतिनो दशरथस्य कांक्षितं सद्य एव पच्यते, तेनेदं कल्पवृक्ष-फल-धर्मीत्युच्यते—

"अन्विyेष सदृशीं स च स्नुषां प्राप चैनमनुकूलवाग् द्विजः ।
सद्य एव सुकृतां हि पच्यते कल्पवृक्ष-फल-धर्मि कांक्षितम् ॥११।५०रघु.॥

४- **भूषाः**[1]- पारिजातप्रस्तावे २०।४-संदर्भीये रघुवंशस्य ६।६-पद्ये भूषिता राजानः कल्पवृक्षोपमा उच्यन्ते । ततोमीषामपि भूषितत्वमर्थत एवापद्यते । एवमेव तत्रैव

वेदिकाः- राजानो मंचस्थिता उच्यन्ते । ततश्च कल्पवृक्षाणामपि तले वेदिकाचत्वरमुन्नेतुमापद्येत ।[2]

---

१ कल्पवृक्षस्य छायाफलादिमत्त्वं जिनसेनोऽप्यादिपुराण एवं वर्णयति–
'कल्पद्रुमाः समुत्तुङ्गाः सच्छायाः फलशालिनः ।
नानास्रग्वस्त्रभूषाढ्या राजायन्ते स्म संपदा ॥ पर्व-२२।२४५

२ राज्ञामेवंभूतायां स्थितौ कल्पतरूपमत्वं बाणोऽपि स्मरति यत्रासौ तारापीठं वर्णयन् कादम्बर्यां कथयति– 'येन चानेकरत्नांशुकपल्लविते व्यालम्बिमुक्ताफलजालके दिग्राजेनेव कल्पतरावाक्रान्ते सिंहासने नेमुः सर्वदिशः ।' पृ० ९४ कालेसंस्करणम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

द्युतिः- अत एव च कल्पवृक्षाणां सामान्या द्युतिरपि प्रतिपत्तुं शक्यते।

५- **प्ररोहः**- कल्पवृक्षेषु नभःस्थिताभ्यः शाखाभ्यो न्यक् प्ररोहन्तो भाषायां वरोहपदवाच्याः प्ररोहा अपि भवन्ति । विक्रमोर्वशीये भगवन्तं नारदं वर्णयन् कविर्ब्रूते—

"गोरोचनानिकषपिंग-जटाकलापः संलक्ष्यते शशिकलामलवीतसूत्रः।
मुक्तागुणातिशयसंभृतमण्डनश्रीर्हेमप्ररोह इव जंममकल्पवृक्षः ॥५।१९विक्र.॥

अंशुकम्- कल्पवृक्षवर्णने कविना अंशुकमप्यनेकश उपादीयते । तच्च तत्साहित्ये द्विधा विभज्यते । १- शाखांशुकं २- ध्वजांशुकं चेति । उभयविधमपीदं वर्णापेक्षया पुनरपि त्रिधा विभज्यते १- धवलवर्णं, २-सुवर्णवर्णं ३- एतदद्वयान्यवर्णं चेति । यथा चैतत तदधोदत्तेभ्यः कविवचोभ्यः एव स्पष्टम् । तथाहि—

६- रघुवंशे कुश-कुमुद्वती-तनयोऽतिथिः हंसचिह्नं दुकूलं परिधत्ते । हिरण्यादर्शप्रतिफलितः स तदानीं सूर्योदये सुमेरौ प्रतिफलितं कल्पतरुमनुहरति—

"आभुक्ताभरणः स्रग्वी हंसचिह्न-दुकूलवान् ।
आसीदतिशयप्रेक्ष्यः स राज्यश्रीवधूवरः ॥
नेपथ्यदर्शिनश्छाया तस्यादर्शे हिरण्मये ।
विरराजोदिते सूर्ये मेरौ कल्पतरोरिव ॥ २७।२५,२६रघु.॥

७- शाकुन्तले दानवविजयिनो दुष्यन्तस्यावदानं सुरसुन्दरीणां विच्छित्तिशेषैर्वर्णैः कल्पलतांशुकेषु गीतिक्षममर्थबन्धं विचिन्त्य लिखन्ति—

"विच्छित्तिशेषैः सुरसुन्दरीणां वर्णैरमी कल्पलतांशुकेषु ।
विचिन्त्य गीतिक्षममर्थबन्धं दिवौकसस्त्वच्चरितं लिखन्ति ॥ शाकु.७।५॥

अनयोः स्थलयोः पूर्वत्र दुकूलस्य स्कन्धप्रभृतिष्वेवांगेषु परिधीयमानत्वात् कल्पतरावपि तत्रैव संभवः अपरत्र च ध्वजपट्टस्य विखण्डनमनुचितमिति पारिशेष्याच्छाखांशुकत्वमेवावधारयितुं शक्यम् । वर्णः पुनरत्रोभयत्रापि धवल एव संभाव्यते, प्रथमे हंसचिह्नस्य धवल एव वस्त्रे शोभावहत्वात्, अपरत्र च विचित्रवर्णलेखसामग्रया अधवले लेखाधारे निर्गुणत्वात् परभागलाभाय कल्पलतांशुके धवलत्वेमेवौचित्यलभ्यम् । अनयोः स्थलयोरनुवीक्षयेदमप्युन्नेतुं शक्यते यत् कालिदाससमये कल्पवृक्षशाखांशुकेषु हंसादिचिह्नान्यपि वैकल्पिकान्यभूवन्।

८- कुमारसंभवे सप्तर्षिमण्डलं हेमवल्कलं बिभर्त्ति, तेन च तत् कल्पवृक्षसादृश्यमासादयति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"मुक्तायज्ञोपवीतानि बिभ्रतो हेमवल्कलाः ।
रत्नाक्षसूत्राः प्रव्रज्या कल्पवृक्षा इव श्रिताः ।। कुमा.६।६।।

अत्रोपमेयभूतसप्तर्षिगतत्वेन वर्ण्यमानस्य वाससो हेमवर्णत्वादुपमानभूतकल्प-वृक्षगतत्वेन व्यज्यमानेपि वाससि तद्वर्णत्वमेव बलादानीयते ।

९- ओषधिप्रस्थनगरस्य गृहेषु कल्पद्रुमैरेव विलोलविटपांशुकैः सदभिः पताकाश्रीर्निर्मीयते—

"यत्र कल्पद्रुमैरेव विलोलविटपांशुकैः ।
गृह-यन्त्र-पताकाश्रीरपौरादरनिर्मिता ।। कुमा.६।४१।।

नगरमण्डने प्रयुज्यमानानां पताकानां वर्णः शुक्ल-पीताऽतिरिक्तोपि भवतीत्यत्र विटपांशुक-पद-वाच्यानां शाखांशुकानां विविध-वर्णत्वमायाति ।

१० ध्वजांशुकं वर्णयता कालिदासेनोच्यते—

"स पुरं पुरुहूतश्रीः कल्पद्रुमनिभ-ध्वजाम् ।
क्रममाणश्चकार द्यां नागेनैरावतौजसा ।। १७।३२रघु.।।

अतिथिरयोध्यां द्यां करोति कल्पद्रुमध्वज-सदृश-ध्वज-मण्डितायां यत्र पुरुहूतश्रीरसौ ऐरावतौजसा गजेन क्रामति । ध्वजांशुकमत्र श्वेतपीतारुणान्यतमवर्णमेव संभाव्यते । किन्तु—

११ कुमारसंभवस्य निम्नलिखिते पद्ये तस्य श्वेतवर्णत्वमेव नियतम्—

"पश्य कल्पतरुलम्बि शुद्धया ज्योत्स्नया जनितरूपसंशयम् ।
मारुते चलति चण्डिके बलाद् व्यज्यते विपरिवृत्तमंशुकम् ।।८।७१।।

पार्वतीं प्रति भगवता शिवेन क्रियमाणेऽस्मिन् चन्द्रिकावर्णने जनितरूपसंशयत्वेनोल्लिख्यमानेंऽशुके शुद्धातिरिक्तः को नु वर्णः संभाव्येत । लम्बि-पदेनात्रांशुके शाखांशुकत्वमप्युत्प्रेक्षितुं शक्यते यद्यपि पत्रावगुण्ठितानि शाखांशुकानि दूरतस्तथा द्रष्टुं न शक्येरन् यथा ध्वजांशुकानीति ध्वजांशुकत्व एव प्रबलत्वमानीयते । मेघदूतस्य निम्नोद्धृते पद्ये पुनः शाखांशुकत्वं ध्वजांशुकत्वं चेति द्वितयमपि संभाव्यते—

१२ 'हेमाम्भोजप्रसवि सलिलं मानसस्याददानः कुर्वन् कामं क्षणमुखपटप्रीतिमैरावतस्य ।
धुन्वन् कल्पद्रुमकिसलयान्यंशुकानीव वातैर्नानाचेष्टैर्जलद ललितैर्निर्विशेस्तं नगेन्द्रम् ।।१।६२।।

कालिदासः कल्पद्रुमेष्वाभरणानामपि सत्तां प्रतिपादयति । संरम्भं चात्रावलम्बते । तत्राभरणानां द्वैविध्यमुपलभ्यते हारत्वेन हारेतरत्वेन च । तत्र प्रथ-

स—५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

मत्रापि द्वैतमाश्रीयते रत्नहारत्वं मौक्तिकहारत्वं चेति। तत्र रत्नहाराणामस्तित्वं कुमारसंभवस्य २९।८-संदर्भत्वेनागरि उद्धृतेन सप्तर्षिवर्णनपद्येन प्रतिपद्यते यत्र सप्तर्षयो 'रत्नाक्षसूत्रा' इति विशेष्यन्ते। तेन हि तदुपमानभूतेषु कल्पवृक्षेष्वपि तदस्तित्वं बलादुन्नीयते। मौक्तिकहाराणामुल्लेखः सुकविनानेनानेकधा कृतः। तथाहि—कुमारसंभवस्यानुपदमेव चर्चिते ६।६ पद्ये सप्तर्षयो मुक्तायज्ञोपवीता उच्यन्ते। ततस्तत्सादृश्यलाभाय कल्पवृक्षेष्वपि मुक्ताहारवत्वमुत्प्रेक्ष्यते। २७।६-संदर्भत्वेनानुपदोद्धृते रघुवंशस्य अतिथिवर्णनपरे १७।२५-२६-पद्यद्वये स्रग्वीति विशेषणेनोपमेये हारवत्त्वं प्रतिपादयता सादृश्यशिल्पशिरोमणिना सुकविना उपमानेपि तत्सद्भावोभीष्ट एव। हारपदं च निर्विशेषं प्रयुज्यमानं संस्कृतवाङ्मये मौक्तिमात्रपरमेव प्रसिद्धम्। सप्तर्षिवद् देवर्षिर्नारदोपि शशिकलामलं वीतसूत्रं धारयन् मुक्तागुणातिशयसंभृतमण्डनश्रिया कल्पवृक्षेनोपमीयमानः २६।५--संदर्भत्वेन प्रागुपस्थापिते विक्रमोर्वशीयस्य ५।१९-पद्ये मुक्तागुणपदेन मौक्तिकं हारमेव कल्पवृक्षे प्रसाधयति। एवमेव---

१३ कुमारसंभवे चन्द्रः कल्पवृक्षशिखरेषु स्फुरद्भिः पादैः हारयष्टिमिव रिरचियिषन्नुत्प्रेक्ष्यते —

'कल्पवृक्ष-शिखरेषु संप्रति प्रस्फुरद्भिरिव पश्य सुन्दरि?
हारयष्टिरचनामिवांशुभिः कर्त्तुमागतकुतूहलः शशी॥ ८।६८॥

अत्रायं विशेषो यद् मुक्तागुण-हारयष्टि-शब्दाभ्यां हाराणां स भेदो ग्रहीतु सुशको यः कालिदासादिभिः उपहारपदेनोच्यते।[1]

१४ हारेतराभरणास्तित्वं कुमारसंभवस्य तारकासुरं प्रति महेन्द्रचाटुवर्णनपरे—
'तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः।
अनुकूलयतीन्द्रोपि कल्पद्रुमविभूषणैः॥२।३९॥—इत्यस्मिन् पद्ये लभ्यते। अत्र विभूषणानि कल्पद्रुमजनितान्यपि संभवन्ति। वस्तुतः कल्पद्रुमदारिद्र्यमत्र विवक्षितमिति तद्विभूषाभरणानामेवात्र दूतहारितत्त्वमौचितीसुभगम। २७।६-संदर्भत्वेनातिथिवर्णनस्योद्धृते पद्येप्युपमेयगताभरणप्रातिनिध्यायोपमानगततयाप्याभरणान्युत्प्रेक्ष्येरन्नेव। तत्र हारस्य पृथगुपादानादाभरणपदेन हारेतराभरणमात्रमेव गृह्येत।

मधुकार-परभृतयोरपि कल्पवृक्षेषु स्थितिः २३।२-संदर्भत्वेनाप्योद्धृते विक्रमोर्वशीयस्य ४।२-पद्ये दृश्यते।

---

१ उपहारपदस्यार्थाय द्रष्टव्या नः 'कालिदासभारती' सागरिका, वर्षं ५ अङ्क १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्प-पदवाच्योयं वृक्षः "कल्पयति' संपादयति मनोरथान्–"इति यं मनोरथपूरणात्मानं विशेषम् ऐकान्तिकत्वेन क्रोडीकरोति सोपि कालिदासेनासकृदुदीर्यते । तथाहि—

१५ अलकायां सर्वमपि प्रमदाजनरुचितं मण्डनमेकः कल्पवृक्ष एवं निष्पादयति–

'वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं पुष्पोद्भेदं सहकिसलयान् भूषणानां विकल्पान् ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्यामेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥२।१२॥

१६ मारीचाश्रमतपस्विनः सत्कल्पवृक्षेपि वने वायुभक्षणेनैव प्राणवृत्तिं रक्षन्ति–

'प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तीर्थे कांचन-पद्म-रेणु-कपिशे पुण्याभिषेकक्रिया ।
ध्यानं रत्नशिलागृहेषु विबुधस्त्रीसन्निधौ संयमो
यद् वाञ्छन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥ शाकु ७।१२॥

नूनमत्र कल्प-पदेनेच्छापूरकत्वमेवाभिप्रेतम्, तेनैव विस्मय-व्यतिरेकयोः साधयितुं शक्यत्वात ।

१७ श्रीरामो भगवत्यै जनकनन्दिन्यै कल्पवृक्ष आसीद्, यतोहि स तस्याः सर्वानपि दोहदान् अचिरेणैव पूरयति स्म । यदासौ वनदिदृक्षां तद्व्याजेन सीतां तितिक्षुः सन् पूरयति तदा लक्ष्मणेन रथमारोप्य नीयमानासौ श्रीरामं कल्पद्रुमतां विहाय तां प्रत्यसिपत्रवृक्षतां गतं न वेद—

'सा नीयमाना रुचिरान् प्रदेशान् प्रियंकरो मे प्रिय इत्यनन्दत् ।
नाबुद्ध कल्पद्रुमतां विहाय जातं तमात्मन्यसिपत्रवृक्षम् ॥ १४।४८रघु.॥

---

१ कल्पपदनिरुक्तौ ७००-शकीयो जिनसेनस्वामी तत्कृतावादिपुराणे वक्ति—

**"मनोभिरुचितान् भोगान् यस्मात् पुण्यकृतां नृणाम् ।
कल्पयन्ति ततस्तज्ज्ञैर्निरुक्ताः कल्पपादपाः ॥ पर्व-३।३८॥**

महिमाचार्योऽपि व्यक्तिविवेकेऽवाच्यवचनावसरे–"क्षुण्णं यदन्तःकरणेन वृक्षाः फलन्ति कल्पोपपदास्तदेवे–"त्युद्धरति ।

अत्रेदमपि ध्येयं यद् देवीभागवतस्य 'कल्पवाटिका-पदेन पञ्चस्वन्यतमस्य देववृक्षस्य 'कल्प'–इत्येव पूर्णं नाम । ततश्च व्यक्तिविवेककृद्दत्तो दोषोत्रापहस्तितो जायते । द्र० अस्मट्टीकोपेतो व्यक्तिविवेकः, पृ० ४४१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

१८ गन्धमादने पार्वत्या सह क्रियमाणविहारं भगवन्तं पशुपतिं गन्धमादनवनाधिदेवता लोहितार्कमणिपात्रस्थितं कल्पवृक्षप्रसूतं मधु समर्पयति—

'लोहितार्कमणिभाजनार्पितं कल्पवृक्षमधु बिभ्रती स्वयम् ।
त्वामियं स्थितिमतीमुपस्थिता गन्धमादनवनाधिदेवता ।। ८।७५कुमा.।।

१९ अलकायां यक्षाः पानोत्सवान् कल्पवृक्षमधुभिरेव निर्वर्तयन्ति—

'यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ।। मेघ.२।५।।

३६।१५—संदर्भत्वेन पुरोपस्थापिते मेघपद्ये पि कल्पवृक्षजनितस्य मधुनः स्मरणं कविना क्रियत एव । विक्रमोर्वशीयस्य यत् ५।१९—पद्यमिह २६।५—संदर्भत्वेनोपास्थापि तत्रापि नारदः पुरूरवसो मनोरथसंपत्तिं श्रावयितुमेव पुरूरवसः पार्श्वमुपेतः । अत एव स कल्पवृक्षेणैवोपमीयते शिल्पपटिष्ठेन कविना ततस्तत्रापि कल्पवृक्षपदं मनोरथपूरणव्यंजकतयैवागतं दृश्यते । स्वयंवरे राज्ञां १७-सर्गे चातिथेर्यत् कल्पपादपेनौपम्यं दृश्यते तत्रापि व्यंजनेयं न न क्षमा ।

२० ईदृग्विधस्य कल्पवृक्षस्य छायायां कामधेनुर्विश्राम्यति—

'पुरा शक्रमुपस्थाय तवोर्व्वीं प्रति यास्यतः ।
आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि ।। रघु.१।७५।।

२१।५—संदर्भे रघुवंशस्य यत् सुरराजवृक्ष-पद-घटितं पद्यमुद्धृतं यच्च ३।३—संदर्भे तस्यैव काव्यस्य ६।६० तमं हरिचन्दनघटितं पद्यमुद्धृतं तदुभयमादाय त्रयश्चत्वारिंशति कालिदासप्रयोगेषु देववृक्षाणाममीषां यत्र ये विशेषा उल्लिखितास्तत्र तेषामवगमस्तालिकयानया कर्तुं शक्यते—

विशेषाः	देववृक्षनामानि				
	१	२	३	४	५
	हरिचन्दनम्	सन्तानः	मन्दारः	पारिजातः	कल्पः
१-अंगरागौपयिकोरुणो रसः	०००	...	...	...	...
२-सुरभिपुष्पम्[1]	...	०००	०००	०००	०००
३-फलम्	...	...	...	...	....
४-छाया	...	०००	०००	...	०००

---

१ सुरपुष्पाणामुल्लेखः कालिदासेन वृक्ष विशेषनामानुल्लेखेनापि क्रियते, यथा—अपार्थिवपुष्पम्- र० ८।३४, अमरस्रक् र० ८।३६, सुरपुष्पम् र० ८।८१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५-अरुणः परागः	...	...	०००	...	...
६-शाखासु मुक्ताहारः	...	...	...	०००	०००
७-शाखासु स्वर्णाभरणम्	...	...	...	...	०००
८-शाखासु रत्नाभरणम्	...	...	...	...	०००
९-शाखास्वाभरणमात्रम्	...	...	...	०००	०००
१०-प्ररोहः	...	...	...	...	०००
११-शाखांशुकम्	...	...	...	...	०००
१२-ध्वजांशुकम्	...	...	...	....	०००
१३-भ्रमराः	...	....	...	...	०००
१४-कोकिलाः	...	...	...	...	०००
१५-कान्त्यतिशयः	...	...	...	०००	...
१६-कान्तिसामान्यम्	...	...	...	...	०००
१७-इच्छापूरकत्वम्	...	...	...	...	०००
१८-समुद्रप्रभवत्वम्	...	...	...	०००	...
१९-वेदिका	...	...	...	०००	०००

अत्रायं प्रश्न उत्तिष्ठति यद् हरिचन्दन[1] - मन्दार - पारिजात-कल्पवृक्षेषु क्रमेणैकैकवृत्तितया यानि अंगरागारुणपरागसमुद्रप्रभवत्वमनोरथसंपादकत्वानि कविना दर्शितानि तानि तत्तदेकनिष्ठतया तस्य स्वालक्षण्यरूपेण विवक्षितानि सामान्यधर्मरूपेण वा। अयमाशयो यद् ये हि विशेषाः वृक्षविशेषनिष्ठतया प्रतिपाद्य तद्भिन्नवृक्षानिष्ठतया कविना प्रतिपादिताः तेषां सद्भावोपि तत्तद्-वृक्षे कवेर्विवक्षितः, यदिवा केवलः अभाव एव तत्र प्रतिपिपादयिषितः। प्रश्नस्य तात्पर्यमिदं यदमी देववृक्षाः कवेः परस्परं भिन्नतया वा। अत्र २०।४—संदर्भत्वेनोद्धृताद् रघुवंशस्य ६।६—पद्यादिदमवगम्यते यत् सर्वेषामेतेषां भिन्नत्वमेव कवेरभिप्रेतम्। वस्तुतः भिन्नत्वमेव परम्परयाप्यनुमोद्यते। परम्परेयममरकोशस्यैतल्लेखारम्भ उद्धृतेन 'पञ्चैते देवतरवः' इत्यनेन वचनेन स्पष्टतामासादयति। अत्र हि देवतरुषु पंचत्वं सिसाधयिषितं न तु देवतरुनामसु। तथा सति 'उच्यते देववृक्षश्च मन्दारः०' इत्येवमुच्येत। अस्ति च पुराणेष्वप्येतेषां भिन्नत्वमेव प्रपञ्चितम्। अत्र च मत्स्यपुराणं देवीभागवतं च प्रमाणम्।

---

१ **एतेषांमेव वृक्षाणां सामान्यतोऽपि निर्देशः कालिदाससाहित्ये लभ्यते, यथा— नन्दनद्रुमाः कु० २।४१; देवारण्यम् [र०१०।८०] इति पदमपि प्रसंगेऽस्मिन् संग्राह्यम्।**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मत्स्यपुराणे कल्पपादपदानप्रस्तावे मध्ये कल्पवृक्षं निर्माय तत्पार्श्वेषु पारिजाता-दीनां पृथक् निर्माणं प्रतिपाद्यते । तथाहि—

'अर्धक्लृप्तसुवर्णस्य कारयेत् कल्पपादपम् ।
सन्तानं पूर्वतस्तद्वत् तुरीयांशेन कारयेत् ।।
मन्दारं दक्षिणे पार्श्वे श्रिया सार्धं घृतोपरि ।
पश्चिमे पारिजातं तु सावित्र्या सह जीरके ।।
सुरभीसंयुतं तद्वत् तिलेषु हरिचन्दनम् ।
तुरीयांशेन कुर्वीत सौम्येन फलसंयुतम् ।। २७६।३–८।।

देवीभागवते पुनर्मणिद्वीपवर्णनावसरे तत्तत्सालेषु वृक्षाणामेषां वनानि पार्थक्ये-नैव वर्ण्यन्ते । तथाहि—

'कांस्य-सालादुत्तरे तु ताम्रसालः प्रकीर्तितः ।
द्वयोस्तु सालयोर्मध्ये संप्रोक्ता कल्प-वाटिका ।
ताम्रसालादुत्तरत्र सीससालः प्रकीर्तितः ।
सन्तानवाटिका मध्ये सालयोस्तु द्वयोर्नृप ।
सीससालादुत्तरत्राप्यारकूटमयः शुभः ।
हरिचन्दनवृक्षाणां वाटी मध्ये तयोः स्मृता ।
आरकूटमयादग्रे सप्तयोजनदैर्घ्यवान् ।
पंचलोहात्मकः सालो मध्ये मन्दारवाटिका ।
पंचलौहमयादग्रे वर्त्तते रौप्यसालकः ।
पारिजाताटवी मध्ये प्रसूनस्तबकान्विता ।। १२।१०।३५-६२

भागवतेस्मिन् सालेष्वेतेषु ऋतुभेदोपि वर्ण्यते । तत्र कल्पवाटिका वसन्तेन, सन्तानवाटिका ग्रीष्मेण, हरिचन्दनवाटिका वर्षर्तुना, मन्दारवाटिका शरदा, पारिजातवाटिका च हेमन्तेनाधिष्ठिता वर्ण्यन्ते । यद्यपि सर्वेपि ऋतवस्तत्र सहयुध्वानः तथापि स्थाननियमदर्शनात् तेषां तदधिष्ठित-देववृक्ष-भेदकत्वमेव नियतम् । अयमत्रापरो भेदहेतुर्यद् विष्णुपुराण एतेषामुत्पत्तावयौगपद्यमुपपाद्यते। तत्र हि पारिजातोत्पत्तेः प्रागपि संतानकनाम्नो देववृक्षस्यास्तित्वमुपदर्श्यते । पुराणस्यास्य प्रथमे अंशे यो नवमोध्यायस्तत्र समुद्रमन्थनात् श्री–देव्या उत्पत्तौ दुर्वासः-प्रदत्तायाः सन्तानक-स्रजो विमाननैव महेन्द्रकर्तृका मूलम् । इदमत्रापरं भेदकं प्रमाणं यत् समुद्राद् उत्पन्नं वृक्षरत्नं सर्वत्र पारिजातनाम्नैव व्यपदिश्यते । तद् यथा–

महाभारते– 'पारिजातश्च तत्रैव सुरभिश्च महामुने ।
जज्ञाते तौ तदा ब्रह्मन् सर्वकामफलप्रदौ ।।

–आदिपर्व । १८।३६–क्षेपकः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णुपुराणे— 'कृतावर्त्तात् ततस्तस्मात् क्षीरोदाद् वासयञ्जगत् ।
गन्धेन पारिजातोभूद् देवस्त्रीनन्दनस्तरुः ॥ १।९।९५ ॥

पद्मपुराणे— 'मन्थने पारिजातोभूद् देवस्त्रीनन्दनो द्रुमः ।
रूपौदार्यगुणोपेतास्ततश्चाप्सरसां गणः ॥ सृष्टिखण्डे ४।५० ॥,

एवमेव-'ऐरावतस्ततो जज्ञे तथैवोच्चैःश्रवा हयः ।
धन्वन्तरिः पारिजातः सुरभिश्चाप्सरोगणः ॥ ब्रह्मखण्डे १०।१॥

मत्स्यपुराणे— 'कौस्तुभश्च मणिर्दिव्यश्चोत्पन्नोऽमृतसंभवः ।
पारिजातश्च विकच-कुसुम-स्तबकाञ्चितः ॥ २४९।५ ॥

श्रीभागवतेपि— 'ततोभवत् पारिजातः सुरलोकविभूषणम् ।
पूरयत्यर्थिनो योर्थैः शश्वद् भुवि यथा भवान् ॥ ८।८।६ ॥

शुकनासोपदेशे कादम्बरीकविना श्रीबाणेनापि श्रियो विगर्हणे 'इयं हि पारिजातपल्लवेभ्यो रागम्.- इत्यादिना महाश्वेतावृत्तान्ते च 'इयं च सुरासुरैर्मथ्यमानात् क्षीरसागराद् उद्गतिः पारिजातनामा पादपः, तस्य मञ्जरी'-ति च लक्ष्मी-सहभुवो वृक्षरत्नस्योल्लेखः 'पारिजात-'पदेनैव विधीयते । ततश्च—

'एषां गिरेः सकलरत्नफलस्तरुः स
प्राग् दुग्धभूमिसुरभिः खलु पञ्चशाखः ।
मुक्ताफलं फलन-सान्वय-नाम तन्व-
न्नाभाति बिन्दुभिरिविच्छुरितः पयोधेः ॥ नैषधीयच.—११।१० ॥ इति

कवयन्नैषधीयचरितकविः श्रीहर्षोपि नूनं पारिजातमेव लक्षीकरोति । असति भेदे समुद्रसंभूतस्तरुः कदाचित् कल्पादिभिः पदैरप्यभिधीयेत । इदमत्र प्रबलतमं भेदकं यदिदानीं लोकेपीमे वृक्षाः तत्तन्नामभिर्व्यपदिश्यमाना लभ्यन्ते । तत्र शेफाली पारिजातपदेन, श्वेतचन्दन रक्तचन्दनं वा हरिचन्दनपदेन, अर्को मन्दारपदेन, कृतवेदिको ध्वजशाखांशुकवान् कश्चनापि ग्रामवृक्षः कल्पवृक्षपदेनाभिधीयते । अभिप्रायोयं भारतीये मूर्तिशिल्पेपि न न प्रसिद्धः । भरहुत-सांची-प्रभृतिषु शिल्पशिरोमणिभूतेषु स्थानेषु कल्पवृक्षस्यास्योत्कीर्णनं विद्वत्सु नितान्तं प्रथितमेव[1] । अस्माकं निवासग्रामे **नादनेरे**ऽपि[2] प्रस्तरखण्डमेकमजयपालदेवनाम्ना प्लक्षपादपस्याधस्तात् प्रतिष्ठापितं यत्र कल्पतरोरस्य प्रत्यंगं प्रस्फुटमुत्कीर्णनमिदं तद्विदां चेतांसीदानीमपि नितान्तमेवावर्जयति । मुक्तादामभिराभूषितस्यास्य तले

---

१ डॉ० वासुदेवशरणाग्रवालस्य 'हर्षचरितः एक सांस्कृतिक अध्ययन' इति ग्रन्थे दत्तात् १५ पृष्ठस्थादुल्लेखात् तथ्यमिदं प्रमाण्यते ।

२ सीहोरमण्डले भोपालस्य पार्श्व एव विद्यत एष ग्रामो नर्मदातटे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रतिकामौ राजदम्पती कौचिदत्यन्तमेव भूषितवपुषावुत्कीर्णौ, शाखाग्रे च वर्धमानस्वामी। ततश्च लोकवृक्षन्यायेन देववृक्षेष्वपि समाननामभाक्षु भेदोपपत्तिरपेतानौचित्येव । कालिदाससाहित्यादुद्धृतेष्वपि स्थलेषु देववृक्षाणां सांय भेद एव यत्सत्यं पृष्ठभू-भूत इति पुराणपरम्परयानया सुखेनैवोन्नेतुं शक्यते ततश्च रघु.–६।३–पद्यव्याख्यायां—

'(कल्पद्रुमाणामिव पारिजातः) अत्र' कल्पद्रुम-' शब्दः पञ्चान्यतम-विशेषवचनोपि कल्पयन्ति मनोरथानिति व्युत्पत्त्या सुरद्रुमात्रोपलक्षकतया प्रयुक्त इत्यनुसंधेयम् । कल्पा इति द्रुमा कल्पद्रुमा इति विग्रहः ।-'इति 'कृपू सामर्थ्ये, कल्पयति मनोरथं कल्पः स चासौ द्रुमश्च, तेषां मध्ये पारमस्यास्तीति पारो, पारिण्यब्धौ जातः पारिजात इव । पंचानां मध्ये एकस्य कल्पद्रुम-शब्दवाच्यत्वं यद्यपि प्रतीयते तथापि प्रवृत्तिनिमित्तस्य संकल्पार्थ-कल्प-पदार्थस्य पूरणे पंचानामपि साधारण्यात् कल्पद्रुमाणामिति बहुवचनम् तथा माघः 'कल्पद्रुमैः सह विचित्रफलैर्विरेजुः-' ।५।१६। तेषु पारिजात उत्कृष्ट इति पारिजातहरणात् सिद्धम्-' । –इति च यत् क्रमेण मल्लिनाथ-हेमाद्रिभ्यां संजीविनी-दर्पणयोः पंचानामपि देववृक्षाणां कल्पवृक्षपदवाच्यत्वमुपकल्पित तत् स्वमनीषिकयैव । 'कल्पद्रुमाणा-'मिति' कल्पद्रुमै-'रिति च रघुवंश-शिशुपालवध-कविभ्यां कल्पद्रुम-पदे यद् बहुत्वं योजितं तत्रान्यदेव बीजमुत्प्रेक्षामहे । वेदिका-वस्त्राभरण-मुक्तादाम-प्रभृतीनां हरिचन्दन-सन्तानक-मन्दारान् विहाय केवलं कल्पद्रुम-पारिजातयोरेव सद्भावं प्रतिपादयता कालिदासेन उदारनेपथ्यवतां मञ्चे विराजमानानां च राज्ञामुपमानतया कल्पद्रुमनाम्ना व्यपदिष्ट एव देववृक्षः स्मर्तुं शक्यः । उपमेयबहुत्वाच्च तत्र बहुत्वमपि योजयितुं शक्यम् । न हि तेन सन्तानादीनामपि कल्पत्वमुचितं कविमस्तके रोपयितुम् । माघस्थलेपि वनस्पतीनां शाखावसक्तवसनाभरणाभिरामत्व-जनक्लान्तिच्छित्त्वमेव समानो धर्मः, यो हि देववृक्षेषु कल्प-पदवाच्य एव द्रुमे प्रसिद्धः, न मन्दारादिषु । तेन हि सत्यपि बहुत्वे कल्पद्रुमपदस्य देववृक्षसामान्यपरत्वमत्र कालिदाससाहित्ये विमान्यमेव, उपमेयबाहुल्यं हि तत्र बहुत्वस्य मूलम् । एवं हि पञ्चानामपि देवतरूणां परस्परभिन्नत्वमेवात्र कालिदाससंमतं सिद्ध्यति ।

जैन-पुराणेषु कल्पवृक्षाणां दश प्रकारा मन्यन्ते । जिनसेनस्वामिकृते आदिपुराणे तेषां वर्णनमेवं क्रियते—

मद्य–भूर्य–विभूषा–स्रग्–ज्योति–दीप–गृहांगकाः ।
भोजनामत्र-वस्त्रांगा दशधा कल्पशाखिनः ।। पर्व-३ श्लो० ३६

अत्र 'अंग'–शब्दः वामनप्रयुक्त-'काव्यांग'-शब्दघटकीभूतांगशब्द इवैव जनकत्वपरः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र च जैनमते कल्पवृक्षाणामिमानि दश नामानि भवन्ति-१-मद्यजनकः २-तूर्यजनकः ३-विभूषाजनकः ४-हारजनकः ५-ज्योतिर्जनकः ६-दीपजनकः ७-भोजनजनकः ८-गृहजनकः ९-भाजनजनकः १०-वस्त्रजनकश्च ।

एतत्संकेतोऽपि कालिदाससाहित्ये तत्र तत्र लब्धुं शक्यते यत्र कालिदासेन मानवाय वनस्पतिसेवा वर्ण्यते । तत्रापि शाकुन्तलस्य शकुन्तलापतिगृहगमनावसरे

क्षौमं केनचिदिन्दुपाण्डु तरुणा मांगल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः । ४।४

इत्येवमुच्यमानायां तस्यामेतत्संकेतो नितान्तमेव स्फुटः । यद्यपि लोकोत्तराभिरेवंविधघटनाभिरनुत्तमा राज्यश्रीः सूच्यते सूचिता चैतत्पद्यसमनन्तरीये प्रियंवदायाः 'अनयाऽभ्युपपत्त्या सूचिता ते भर्तुर्गेहेऽनुभवितव्या राजलक्ष्मीरिति वचनेन । जातककथासु च घटना इमा भृशं विप्रकीर्णाः । कालिदासेनापि "प्रभावस्तम्भितच्छायम्" इत्यादिभिः (रघु० १२।२१) वचनैरेता न नोल्लिख्यन्ते । अथापि घटनाभिराभिर्वनस्पतीनां कल्पत्वं न निषेध्यते ।[1] वस्तुतो 'नास्ति मूलमनौषधम्'—इत्युक्त्या यत्किञ्चिन्मनोरथपूरकत्वं सर्वेष्वेव वनस्पतिषु संभाव्यत एव ।

यदिदं कालिदाससाहित्ये कल्पादिदेववृक्षविवरणमस्माभिरनुशीलितम्, अत्र पुराणसाहित्यस्योपजीव्यत्वं सुखेनैवोपगन्तुं शक्यते । देववृक्षाणां परस्परमैक्यानैक्यविमर्शावसर इदं दृष्टमेव, मेघदूते अलकायाः कुमारसंभवे च सप्तर्षीणां यद् वर्णनं तत्रापीदमाक्षिप्यते । तथाहि मेघदूते यक्षकन्यका यत्र वर्ण्यन्ते तत्र मन्दाकिन्यास्तटेषु मन्दारवृक्षाणामस्तित्वं स्मर्यते—"मन्दाराणामनुतटरुहां छायया वारितोष्णा"—इति । मत्स्यपुराणेपि हिमवत्खण्डे यत्र कैलासान्मन्दाकिन्या उद्गमो वर्ण्यते तत्रोच्यते—

कैलासपादसंभूतं रम्यं शीतजलं शुभम् ।
मन्दारपुष्परजसा पूरितं देवसन्निभम् ।
तस्मात् प्रवहते दिव्या नदी मन्दाकिनी शुभा ॥
मत्स्यपु० अध्या० १२०।३-४

---

१ वाल्मीकिरामायणस्य किष्किन्धाकाण्डीये ४३ सर्गे ४५-५० श्लोकेषु कल्पद्रुमादिनामानुल्लेखपूर्वकं वृक्षाणामेकैकाभिलाषपूरकत्वमिदं जैनसाहित्योपवर्णिततथाविधवर्णनस्य मूलमिव प्रतिभाति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुमारसंभवे सप्तर्षीणां वर्णने यद्--

आप्लुतास्तीरमन्दारकुसुमोत्करवीचिषु ।
व्योमगंगाप्रवाहेषु दिङ्नागमदगन्धिषु ।। ६।५

अत्र व्योमगंगाप्रवाहस्यापि मन्दारकुसुमोत्करवीचित्वमीक्ष्यते तत्रापि नूनं मत्स्यपुरोणमन्दाकिनीवर्णनमेव मूलम् । अलकायां वर्ण्यमानानां कल्पवृक्षाणां मूलं मत्स्यपुराणस्य कैलासवर्णनमेव[1] प्रतीयते यत्र "नानारत्नमयैः शृंगैः कल्पद्रुमसमन्वितैः मध्ये हिमवतः पृष्ठे कैलासी नाम पर्वत"—इत्येवं कल्पवृक्षा वर्ण्यंते ।

कल्पवृक्षस्य साम्प्रतमेकमाध्यात्मिकमपि रूपं तान्त्रिकीषु साधनासु प्रचलितं दृश्यते । देवीभागवते मणिद्वीपस्य यद् रूपं कल्प्यते तत्र कांस्य-ताम्र-सीस-रौप्य-निर्मितानां प्राचीराणां मध्ये कल्पवृक्षादिवाटिका अपि वर्ण्यते । यथा चैतत् तत् पूर्वं भेदाभेदविचारप्रस्तावे प्रस्तुतैरुद्धरणैः स्पष्टमेव । ततः परं सुवर्ण-पुष्पराग-पद्मराग-गोमेद-हीरक-वैदूर्येन्द्रनील-मुक्ता-मरकत-प्रवाल-नवरत्न-माला वर्ण्यन्ते । अन्तिमे च नवरत्नसाले चिन्तामणिगृहं कल्प्यते । तत्र स सहस्रस्तम्भसंयुक्ताः शृंगार-मुक्ति-ज्ञानैकान्तनामानश्चत्वारो मण्डपाः कल्पयन्ते । चिन्तामणिगृह एव पराशक्तिरूपैर्दशभिः सोपानैः ब्रह्मविष्णुरुद्रेश्वररूपैर्मञ्चखुरैः सदाशिवरूपेण च फलकेन विराजमान एकस्मिन् दिव्य-दिव्ये मञ्चरत्ने श्रीभुवनेशेन भगवता महादेवेन सह तदर्द्धांगभूता भगवती भुवनेश्वरी जगदम्बा विराजमाना वर्ण्यते । लिंगपुराणस्यानाहतनादरूपाजपाजपदानवद् रत्नमयमहाकल्पपादपदानमपि रत्नकल्पपादपयोराध्यात्मिकं सामंजस्यमुपस्थापयति यत्र—

"अथान्यत् संप्रवक्ष्यामि कल्पपादमुत्तमम् ।
शतनिष्केण कृत्वैवं सर्वशाखासमन्वितम् ।
शाखानां विविधं कृत्वा मुक्तादामाद्यलम्बनम् ।
दिव्यैर्मरकतैश्चैव चांकुराग्रं प्रविन्यसेत् ।।
प्रवालं कारयेद् विद्वान् प्रवालेन द्रुमस्य तु ।
फलानि पद्मरागैश्च परितोस्य सुशोभयेत् ।।
मूलं च नीलरत्नेन वज्रेण स्कन्धमुत्तमम ।
वैदूर्येण द्रुमाग्रं च पुष्परागेण मस्तकम् ।।
गोमेदकेन वै कन्दं सूर्यकान्तेन सुव्रत ।
चन्द्रकान्तेम वा वेदिं द्रुमस्य स्फटिकेन वा ।।
निवेद्येमं द्रुमं शम्भोर्योगिनां वाथवा नृप ।
भस्माङ्गिभ्योऽथवा राजा सार्वभौमो भविष्यति ।।"

इत्येवं रत्नकल्पितस्य कल्पपादपस्य दानं योगीश्वराय शम्भवे योग्यन्तराय वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगाभ्यासाभावेपि योगिवेषधारिणे वाव्यवस्थाप्यते। रत्न-कल्पपादपयोरिदमाध्यात्मिकं संयोजनं[1] भावनोपनिषदि रूपकभाषया नितान्तं स्फुटमुपजायते यत्र श्रीचक्रध्यानावसर उच्यते—

"देहो नवरत्नद्वीपः ।६।

त्वगादिसप्तधातुरोमसंयुक्तः ।७।

संकल्पाः कल्पतरवः, तेजः कल्पकोद्यानम् ।८।

रसनया भाव्यमाना मधुराम्लतिक्तकटुकषायलवणरसाः षड् ऋतवः ।९।

यदेव च[2] तन्त्रराजे—

"रत्नद्वीपो भवेद् देहो नवत्वं धातुरोमभिः ।
संकल्पाः कल्पतरवः स्वाधारा ऋतवः स्मृताः ॥"

इत्येवं कारिकया संगृह्यते।

कालिदास एवंविधं रूपकं कामधेनु-नन्दिनी-वसिष्ठ-देवदार्वादिघटिते रघुवंशद्वितीयसर्गस्य गोचारणाख्याने निपुणमुपनिबध्नाति[3] किन्तु कल्पवृक्षोल्लेखावसरे स प्रायेणापेतसंरंभ एव लक्ष्यते। यद्यपि "आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि"–इति पूर्वोद्धृते रघुवंशस्य प्रथमसर्गीये स्थले "प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वन" इति तादृश एव शाकुन्तलस्य सप्तमांकीये स्थले कल्प-पादपविषय एवंविधा भावनोपनिषत्कल्पा कल्पना स्वप्रसराय प्रकाममवसरमधिकरोति।

एवं देववृक्षानधिकृत्य प्रसृता विविधपक्षमयी या भारतीया परम्परा कालिदाससाहित्यं तां सर्वाङ्गीणतयेव स्पृशति, तस्याः प्रायेण सर्वानपि प्रमुखान् मार्गान् प्रशस्तयति।

---

१ तान्त्रिक–टेक्स्ट्स ११–भागः।

२ भावनोपनिषदि भास्कररायकृता टीका।

३ एतदर्थमस्माकं 'नन्दिनी-विद्ये'–ति नाम्ना रायपुरसंस्कृतमहाविद्यालयशोधपत्रिकाया मेधायाः १९६५–वर्षीयेऽके प्रकाशितो लेखो द्रष्टव्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्दण्डिकवेर्मल्लिकामारुतम्

(डॉ० वा० वि० मिराशी)

मल्लिकामारुतमित्येतत् प्रकरणं उद्दंडिरथवा दंडि-नाम्ना कविना विरचितं कलिकातानगरे स्वर्गीयजीवानन्द विद्यासागरेण मुद्रयित्वा ख्रिस्ताब्दे १८७८ तमे प्रकाशितम् । तदधुनात्यन्तं दुष्प्रापम् । किन्तु तत् संस्कृतनाट्यवाङ्मयाभ्यासकानां कृतेऽतीव महत्त्वपूर्णम् । अतस्तस्याल्पः परिचय इह प्रस्तूयते ।

अस्य प्रकरणस्य प्रस्तावनायां सूत्रधारः कवेरभिजनादिकं एवं निर्दिशति—दक्षिणापथे कामाक्षीकटाक्षताण्डवितकविशिखण्ड-मण्डलेषु तुण्डीरेषु लाटपुरनामाग्रहारः । तत्र आपस्तम्बशाखाध्यायिनो वाधूलकुलोत्पन्नस्य उपाध्याय-गोकुलनाथपौत्रस्य श्रीकृष्णसूनोः भट्टरंगनाथस्य प्रियनन्दन इरुगुपनाथापरपर्यायो दण्डिकविर्नामा सोऽधिगतसकलविद्यो दिदृक्षुर्दिगन्तराणि आन्ध्रकर्णाटकलिङ्गचोलकेरलाननवतीर्णः मज्जन् महानदीषु, पश्यन् देवतास्थानानि, ताम्रचोडनगरं (अधुना 'कालिकत' इत्याख्यया प्रसिद्धनगरं) आढौकत । तत्र च राजसभां गत्वा राजानमेवमस्तौत्—

प्रत्यर्थिभूमिपालप्रतापघर्मोत्थपुष्कलावर्त ।
विश्वम्भराकुटुम्बिन् विक्रमविश्वैकवीर विजयस्व ॥

अयं विक्रमनृपतिः झामोरिनवंश्यो मानविक्रम इति मन्यते । तस्य समयः प्रायः ख्रैस्तपञ्चदशशताब्द्या मध्यकालो मन्यते ।

कविस्तुत्या सन्तुष्टो नृपतिस्तमादिशत्

श्रीमन्नुद्दण्डविद्वन् निशमय वचनं मामकं कामदोग्ध्री
वाणी नाणीयन्ती ते ननु वरकविताभूषिता वाग्विलासे ।
तस्मादह्नाय सम्यक् प्रकरणमतुलं मल्लिकामारुताख्यं
किञ्चिद्व्यंजद्रसार्द्रं विरचय विधिना सत्कवे सत्क्रियां मे ।

एवमादिष्टः स कविस्तत्प्रकरणं राजसभायां प्रयोजितवान् ।

सन्त्यस्य प्रकरणस्य दशांकाः । प्रस्तावनायां सूत्रधारो नटीं संगीतकं

---

1 K. K. Raja : The contribution of Keral to Sanskrit Literature p. 70

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवर्तयितुमादिशति तया तथा कृते स वदति । अधुना मम देशाद्देशान्तरगमनप्रयासो महते सन्तोषाय सम्पन्नः ।

वस्तुनि चिराभिलषिते कथमपि दैवात्प्रसक्तसंघटने ।
प्राक् प्राप्तान्यपि बहुशो दुःखानि परं सुखानि जायन्ते ।।

सूत्रधारोक्तिमेव पुनरुच्चार्य प्रथमाङ्कारंभे कुसुमपुरोपकण्ठे आश्रमनिवासिनी महायोगेश्वरी मन्दाकिनी आत्मनः सारसिकानाम्न्या शिष्यया सह प्रविशति । सा पुरा हिमालये योगाभ्याससमये विद्याधरमन्त्रिणो विश्वावसोः सतीर्थ्यासीत् । तदनन्तरं सा कुसुमपुरमागता तत्र जातायां विश्वावसोः मल्लिकानाम्न्यां कन्यायामतीव स्निह्यति । कुन्तलेश्वरामात्यसूनुजा चतुर्दशविद्यापारदृश्वना मारुतनाम्ना कुमारेण सह तस्या विवाहो भवेदित्यभिलषति । तस्मिन्नेव दिने तदाश्रमे तयोरितरेतरदर्शने गाढकठोरस्मरविकारोऽजनीति हृष्यति तस्याश्चेतः। सा तयोः पाणिपीडनार्थं सर्वथैव प्रयतितुं निश्चिनोति । किन्तु पश्यति तस्मिन्नेकमन्तरायम् । आरट्टेश्वरस्य अमात्यः शम्बरको नाम तां कुसुमपुरराजमुखेन प्रार्थयते । किन्तु सोऽत्यन्तं तिरस्कार्यः । तदन्तरायदूरीकरणेऽपि प्रयत्नो विधेयः ।

तदनन्तरं कामयमानावस्थे मारुतः प्रविशति मल्लिकादर्शनोत्पन्नां स्वमदनबाधां वर्णयति च । मदनमुद्दिश्य स ब्रूते—

बाणाग्निमस्तकरुणो विकिरन् यमाङ्गे
प्रायो न वेत्सि विषमास्त्रवर स्वपीडाम् ।
सन्ताप एष भवता किमु नान्वभावि
चण्डीपतेरलिकलोचनगोचरेण ।।

तदनन्तरं तस्य परमसुहृत् कलकण्ठः प्रविशति वर्णयति च स्वीयामवस्थां अमात्यविष्णुरातस्य कन्यकाया रमयन्तिकाया दर्शनेन । तयोः संभाषमाणयोः कालिन्दी नाम मल्लिकासखी प्रविश्य मल्लिकाया मदनबाधां वर्णयति तत्प्रेषितां दिव्यपुष्पमालां मारुतायोपहरति । तन्मुखात्ताभ्यां ज्ञायते मल्लिकाजन्मवृत्तान्तः । सा किल जन्मनोऽनन्तरं तत्पित्रोद्याने मल्लिकामूले आसादिता । अत एव मल्लिकेति कृतनामधेया । तदनन्तरं मारुतोऽपि आत्मनः सहजं मौक्तिकं हारं तद्धस्तेन मल्लिकायै प्रत्युपायनत्वेन प्रेषयति । तदनन्तर सिंहलद्वीपागतैर्नाविकैः कुन्तलेश्वराय प्राभृतीकृतं तेन च प्रेषितं चित्रफलकमादाय कुसुमपुरमागतो भ्रमरको नाम सेवकस्तं चित्रफलकं मारुतायार्पयति ।

द्वितीयाङ्के कालिन्द्या सह सम्भाषमाणा मल्लिका मारुतप्रेषितेन मुक्ताहारेणात्मनो मदन-बाधा स्थगितेति वर्णयति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तानालीकरदत्तशीतल विधीनारभ्य तद्दर्शनात्
या मन्ये वडवानलानिव वपुर्दाहेन मोहाकुला ।
सा जाता नु तदङ्गसंगसुभगे हारेऽधिरुढस्तने
सर्वाङ्गे स्थगितेव साम्प्रतमहो सौधाकरैर्मण्डलैः ॥

कालिन्दी मल्लिकां कथयति यत्त्वद्दर्शनेन मारुतोऽपि त्वत्सदृशी मदन-पीडामनुभवति ।

तस्यापि वाष्पकलमक्षि वपुर्विवर्णं
म्लानं मुखं परिसरे प्रियमित्रमेव ।
किञ्च ह्रिया तव गुणानभिशृण्वतश्च
प्रत्यक्षरं पुलकशालि कपोलमूलम् ॥

तस्मिन्नवसरे भगवतीमन्दाकिनीद्वारा प्रेषितं चित्रफलकमादाय काचिद्दास्या-गच्छत्यर्पयति च तं मल्लिकायै । तं दृष्ट्वा मल्लिका तत्र चित्रितं मारुतं वर्णयति ।

तद्वक्त्रं श्रवणान्तचुम्बिनयनं सा बन्धुरा कन्धरा
तावाजानुविलम्बिनौ मरकतस्तम्भाभिरामौ भुजौ ।
तद्वक्षो विपुलं स एष सहजो हारोऽप्यमुष्मिन्नहो
तावूरू करिराजहस्तरुचिरौ ते एव ताम्रे पदे ॥

तदैव मारुतानुचरो भ्रमरकः तत्प्रेषितं सीमन्त-मणिं मल्लिकायै अर्पयति । तं दृष्ट्वा कालिन्दी भणति—

तदिदं हाटकसूत्रस्यूतं सखि पाटलं रत्नम् ।
प्रेषितमनुरागधरं मन इव स्मरेषुणा विद्धम् ॥

तृतीयाङ्के मन्दाकिनी सारसिकयोः संभाषणाज्ज्ञायते यत् राजादेश-मनुसृत्य मल्लिकापिता विश्वावसुगौरीमंदिरं गत्वा तां मल्लिकावरज्ञानार्थं प्रार्थयामास—

मातर्नमोऽस्तु तुभ्यं प्रसीद कल्याणि देवि शर्वाणि ।
ब्रूया वरं वरेण्यं वत्सायास्त्वत्प्रसाद लब्धायाः ॥

तदा समीपस्थतमालवृक्षषण्डशृंगस्थितः तत्पत्रच्छन्नः शम्बरको गौरीवाच-मिवोवाच । 'वत्स विश्वावसो, ज्ञायतां शम्बरको मल्लिकाया वर इति'।

मन्दाकिनी शम्बरकस्यैतत्कपटं जानाति, किन्तु वञ्चनस्य वञ्चनमेव प्रतिक्रियां मनुते, वदति च—

कुमन्त्रिणं कूटविधानचुञ्चुकूटैः सुगूढैरतिसन्दधामि ।
यत्कण्टकानां चरणक्षतानां निष्कासनं कण्टकतो लघीयः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदनन्तरं भ्रमरेण सह मारुतः, पुष्पावचयार्थं कालिन्द्या सह मल्लिका च प्रविशतः। मल्लिकां दृष्ट्वा विवृद्धया मदनबाधया मारुतो मोहं गच्छति किन्तु मल्लिका तं स्पर्शेन प्रबोधयति। प्रबुध्यमानो मारुतः सरोमाञ्चो वदति-

स्पर्श एष हृदयङ्गमः सुधावर्षवद्वपुषि को विभाव्यते।
चन्द्रचन्द्रमणिहार मालतीगन्धसारघनसारशीतलः॥

तदैव द्वाभ्यां मत्तहस्तिभ्यां कृतो जनसंप्लवः नेपथ्ये श्रूयते।

एतौ द्वाववितर्कितावतिमदौ विद्राविताधोरणौ
धावं धावमितस्ततः पथि जनान्व्यापादयन्तौ रुषा।
वेतण्डौ पृथुदन्तदण्डविकटावुच्छृङ्खलावेनयो-
रेकः सोमसरः परस्त्विह वसन्तोद्यानमाढौकते॥

किन्तु निर्भयो मारुतस्तमाक्रम्य वशमानयति। सोमसरोगतं तत्र स्नानं कुर्वतीं रमयन्तिकामास्कन्दमानमपरं मत्तहस्तिनं मारुतसुहृत्कलकण्ठस्तन्मस्तके सिंहवन्निपत्य नियमयति।

चतुर्थाङ्के द्वयोर्हस्तिपकयोः संभाषणाद् ज्ञायते यत्तौ मत्तदस्तिनौ शम्बरकप्रेरणयैव तत्प्रदेशमास्कन्दितवन्तौ। शम्बरकशिष्यः कलपिङ्गः पथिकवेषं धारयित्वा मारुतं 'कलकण्ठो मत्तहस्तिना व्यापादितः' इति मृषोदन्तं कथयति। तच्छ्रुत्वा मारुतो भृगुपतनेन स्वजीवितं त्यक्तुं निश्चिनुते। तदनन्तरं स कुटिलः कलपिङ्गः मल्लिकां मारुतनिधनवार्तां श्रावयति। ततः सा मोहमुपगच्छति। किन्तु अचिरादुपस्थितेन कलकण्ठेन मारुतस्तेन च मल्लिकाश्वास्यते। तदैव विश्वावसुना गौरीवचनान्मल्लिका शम्बरकाय दत्तेति वार्ता श्रूयते तैः। ततः मारुतो मल्लिकाप्राप्तौ सन्दिहानो वदति-

प्रणतजनपारिजातवल्लीं भवानीं प्रसादयामि
गत्वा गौरिगृहानेको मोक्ष्ये वा निष्फलानसून्॥

पञ्चमाङ्कस्य विष्कम्भे कश्चन विप्रवेषधारी राक्षसः प्रविशति वर्णयति च राक्षसजन्म

निर्वर्त्यन्ते नृमांसैर्निगरणविधयः पीयते रक्तसीधुः
स्वेच्छासम्भोगसौख्यं भवति हठहृतै रन्यदानैरुदारैः।
वैतानीनां क्रियाणां विमथनमधिकं जायते दृष्टिवृद्धयै।
केन स्वच्छन्दहृद्यं न भवति तदिदं राक्षसं जन्म तुष्टयै॥

स वदति—'आदिष्टोऽस्मि प्रियसखेन विकटग्रीवेण। सन्ति मे त्रीणि विशिष्टानि वस्तूनि। एकं सकलमूर्छाहरं रत्नम्, अपरं चित्रमयं कन्यारत्नं, अन्यद्दिव्याम्बरञ्चेति। पतितानि प्रमादेन लङ्कापुरगमनसम्भ्रमाकुलेन मया मन्निवास

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव वटमूले। कथितञ्च लङ्कापुरवास्तव्यैर्दैवज्ञैर्यदेतद्वस्तुत्रयनाशादर्वागल्पीय एव ममायुरिति'। 'तानित्रीण्यपि वस्तूनि अत्रैव वर्तन्ते' इति विकटग्रीवाय कथयितुं गच्छति स राक्षसः।

तदनन्तरं मल्लिकाप्राप्तौ निराशो मारुतो निशीथे गौरीदेवालये अर्हंपूविकया प्रणामार्थमागतानां सुराणां संघं पश्यति वर्णयति च तेषु कांश्चित् तथाहि प्रथमं तावन्महिषाधिरूढो यमः—

प्रादुर्भावदुरितहतात्मनां जनानां
प्रायश्चित्त्युपकृतये प्रयुक्तदण्डः।
देवस्य प्रियतनयः सरोजबन्धोः
केन स्यात्पितृपतिरेष नो नमस्यः॥

ततोऽन्येषां तत्र समुपस्थितानां वरुणवायुकुवेरादीनां वर्णनानन्तरं मारुतस्तत्रागतं भगवन्तं शिवं वर्णयति—

देवोऽप्येष पुरान्तको नयनयोरध्वानमाढौकते
दूरादेव सरैर्विमुक्तसरणिर्दुग्धेन्दुकुन्दच्छविः।
उच्चैरुल्लसदौपवाह्यवृषभस्कन्धानुवृत्तिस्खल-
च्चूडावलिगतसिद्धसिन्धुलहरीझाङ्कारकोलाहलम्॥

सम्पति हि

नाथे समेयुषि समीपमुपोढहर्षं
उत्थाय देव्यपि कुचस्खलितोत्तरीया।
प्रायः ससम्भ्रमतया करदत्तहस्ता
प्रत्युद्गमिष्यति शनैः कतिचित्पदानि॥

देवीप्रणामानन्तरं विनष्टाः सर्वे सुरादयः। पुनरपि अवशिष्टं भीषणं तिमिरम्। ततो देवीपुरतो गत्वा मारुतः स्वखड्गं कण्ठे न्यस्य तां वदति—

पश्याम्बिके प्रणतकामितकल्पवल्लि
सा मल्लिका प्रियतमा यदि दुर्लभा स्यात्।
अस्तु स्वहस्तकरवालविद्धनकण्ठं
वक्त्रं ममाद्य पदयोस्तव रक्तपद्मम्॥

तस्मिन्नेव क्षणे स आकाशे मल्लिकाया राक्षसहस्तात्स्वरक्षणार्थमार्तमालापं शृणोति। यावत्स ऊर्ध्वं पश्यति तावद्राक्षसहस्तान्निःसृष्टामधः पतन्तीं मल्लिकामवलोकयति। प्रसारितकरश्च तां गृह्णाति। ततः स तं दुष्टराक्षसं यावत्स्वखड्गेन निहन्ति तावत्तच्छरीरात्कश्चन दिव्यपुरुष उत्पतति प्रणमति च मारुतम्। अत्रान्तरे मल्लिकाया अन्वेषणार्थमितस्ततः परिभ्रमन्तः वीरपुरुषा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्दाकिनी विश्वावसुप्रभृतिसम्बन्धिनश्च तत्रायान्ति मारुतं च सम्भावयन्ति।

मन्दाकिनीविरचितेन प्रबन्धेन षष्ठाङ्के मल्लिकाया माधवस्य च विश्वावसुभवनसन्निधे लतामण्डपे भवति गान्धर्वविवाहः। मन्दाकिनी तत्रागत्य तौ स्वाशीर्भिरभिनन्दति। उभावपि चोपदिशति। मल्लिकां हस्ते गृहीत्वा सा वदति मारुतम्।

एकापत्यं हि सेयं जनयितुरसवो बान्धवानां तदस्याम्
मा स्यात्कालान्तरे ते स्वयमयमुदितः स्नेहबन्धो द्रसीयान्॥
मल्लिकामपि सैवमुपदिशति—
शुश्रूषामनुरुन्धती गुरुजने वाक्ये ननान्दुः स्थिता
दाक्षिण्यैकपरायणा परिजने स्निग्धा सपत्नीष्वपि।
सन्नद्धातिथिसत्कृतौ गृहभरे नैस्तन्यूनमाबिभ्रती
वत्से किम्बहुना भजस्व कुशलं भर्तुः प्रिये जाग्रती॥

अयमुपदेशो ननु कालिदासस्य 'शुश्रूषस्व गुरूनि'ति श्लोकमनुकरोति किन्त्वत्र सोऽत्यन्तमनुचितः 'स्निग्धा सपत्नीष्वपि' इत्यस्मिन्नांशे। यतस्तदा न मारुतस्यान्याः पत्न्य आसन्।

तदनन्तरं मारुतः स्वहतराक्षसोत्थं माकन्दनामानं दिव्यपुरुषं ध्यानेन सन्निधापयति। स च माकन्दो मल्लिकावेषं धारयित्वा शम्बरकवञ्चनाय विवाहस्थलमुपयाति। कलकण्ठश्च कौषायवस्त्राणि परिधाय मन्दाकिनीवेशं धारयति। सर्वे ते विवाहस्थलं गच्छन्ति।

सप्तमाङ्कारम्भे प्रवेशकद्वयेन जानीमो यत् मल्लिकावेशधारिणा तेन दिव्यपुरुषेण सह निर्वृत्तः शम्बरकस्य शिष्यः कलापिङ्गोऽपि रमयन्तिकावेशधारिणा भ्रमरकेण सह विवाहविधिमनुष्ठितवान्। तावपि शयनगृहं प्रस्थितौ।

तदनन्तरं रमयन्तिका कालिन्दी - पुरतः - कलकण्ठ विषयं स्वानुरागस्वप्नसंभोगं च वर्णयति तत्प्राप्तौ निराशीभूय वाक्यं विसृजति। तस्मिन्नेव क्षणे कलकण्ठः मन्दाकिनीवेशार्थं धारितानि कौषायवस्त्राण्यपि अवक्षिप्य तस्या हस्तमवलम्बते तां वदति च—

चरणकमलदासस्त्वेष संकल्पसङ्गे
सुमुखि यमाभिधत्से त्वं वलात्कारधूर्तम्।
प्रसभविधृततर्षः पीडयत्यात्मनैव
द्विरद इव सरोजं पाणिमापाटलं ते॥

तस्मिन्नेव क्षणे नेपथ्ये शम्बरकस्यार्तः स्वरः श्रूयते। 'स हतोऽस्मि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्दभागः। हन्त मुधाकामुकेन मया मल्लिकेति कश्चन भूत एव परिणीतः। तदनन्तरं नेपथ्ये जनोक्तिः श्रूयते।

व्रीडात्केलिगृहं कथञ्चन वधूर्याताद्य या सा पतिं
खट्वाशृङ्खलया निबध्य पदयोः कृष्ट्वा नभस्युत्थिता।
कष्टं कष्टममुं तमालविटपे बद्ध्वा तिरोऽभूत्क्षणात
जामाता यमधोमुखो बत रुदन् वेतालमालम्बते॥

रमयन्तिकावेषधरो भ्रमरकोऽपि शम्बरकशिष्यकलापिङ्गस्य मुखं मष्यालिप्तं कृत्वा तं शय्यागृहान्निष्कासयति।

अष्टमाङ्कारम्भे मन्दाकिनी-भाषणाज्ज्ञायते यत् मल्लिकाया मूर्छाहरः सीमन्तमणिः राक्षसाहरणप्रसङ्गे भ्रष्ट आसीत् स केनचित् राक्षसेनापवाहितः। किन्तु द्रविडेषु काञ्चीपुर-सविधेन धावन् स राक्षसो भगवत्याः कामाक्षीदेव्याः किंकरेण निहत आच्छिन्नश्च स मणिः। तन्मणिप्राप्त्यर्थं मन्दाकिनी मल्लिकां स्वयोगप्रभावेण काञ्चीपुरं नेतुं निश्चिनोति।

तदनन्तरं मारुतः प्रवेशयति मल्लिकागमनं चातीवोत्कण्ठयोत्पश्यन् इतस्तत. परिक्रामति। इन्दुमुद्दिश्य स वदति—

अभिलषसि यदीन्दो वक्त्रलक्ष्मीं मृगाक्ष्याः
पुनरपि सकृदब्धौ मज्ज संक्षालयाङ्गम्।
सुविमलमथ बिम्बं पारिजातस्य गन्धैः
सुरभय वद नौ चेत्त्वं क्व तस्या मुखं क्व॥

पश्चादागच्छन्तीं मल्लिकां स वर्णयति—

इयमभिसरत्यारादङ्गैरनङ्गहतैः प्रिया
चकितचकितां विन्यस्यन्तीं दृशं शशलाञ्छने।
अलधु विपुलश्रोणीभारालसालसचंक्रम-
श्रमसमुदितस्वेदच्छेदाभिराममुखाम्बुजा॥

ततः स पर्यन्तभाजो लतायाः पल्लवैस्तल्पं कल्पयित्वा तां तत्र नीत्वा तदधरपानं कर्तुं यावत् प्रक्रमते तावत् सा मूर्च्छां प्राप्नोति। ततश्च परतोवृत्तं वर्णयति मारुतः—

तां पेतुषीं लुलितविह्वलगात्रमङ्गे
हा हा किमेतदिति यावदहं बिभर्मि।
तावद्विमोहकरणं मम नैव जाने
भूतेन केनचिदपह्रियते स्म बाला॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्वार्तया सर्वे दुःखिता भवन्ति गच्छन्ति च भगवत्यै मन्दाकिन्यै तन्निवेदयितुम्।

नवमाङ्के मल्लिकादर्शनेन शोकाविष्टौ मारुतकलकण्ठौ इतस्तत आहिण्डतः। मारुत आत्मनो विकलामवस्थां वर्णयति—

किमपि करणद्वाराण्यन्धं तमः पिदधाति मे
भ्रमति हृदयं मोहाविष्टं विषीदति जीवितम्।
अहह सहसा सर्वाङ्गीणः प्रसर्पति कश्चन
प्रलयशिखिना तुल्यस्तापः सखे करवाणि किम्॥

अस्मिन् श्लोके भवभूतेः 'हा हा देवि स्फुटति हृदयम्' इत्यादिश्लोकस्यानुकृतिः स्पष्टैव। मारुत उपवनस्थान् मृगपक्षिणो लतादींश्च स्वप्रियोदन्तं पृच्छन् परिक्रामति—

करिपते कथय क्व मम प्रिया
यदि दृशोत्सव मार्गमुपागता।
गिरितटीषु झरीषु वनीषु वा
कुररिकेव बतार्तविलापिनी॥

मल्लिकां स्वर्गतां संभाव्य स आदिशति—

विपुलजघने मन्दं याहि क्षणं त्रिदशालये
त्रिदशसरितः कूले यावन्मयाप्यनु धाव्यते।
पदनलिनयोः केलीयानप्रकारमधीयतां
विमललहरीलोला वेधोरथा द्विजजातयः॥

नवमालिका रमयन्तिका कालिन्दी च तत्रागत्य शोकालापं कुर्वन्ति। मारुतो मूर्छां गच्छति कृतेष्वपि विविधप्रयत्नेषु न संज्ञां लभते। ततः कलकण्ठो भृगुपतनेन स्वजीवितत्यागे उद्युक्तो भवति। तस्मिन्नेव क्षणे शिखामणिना भूषिता मल्लिका प्रविश्य सर्वानानन्दमग्नान् करोति। मन्दाकिनी सर्वैः सह विश्वावसुप्रभृतीनामाश्वासनाय कुसुमपुरं प्रयाति।

दशमाङ्कारम्भे वैतालिक-घोषणाद्वयेन जानीमो यद्विविधकूटकर्मकर्ता कतिपयक्षणारोपितजामातृशब्दस्तमालविटपावलम्बी शम्बरको प्रतिनिकृत्तमन्दाकिनीशब्देन वृक्षाग्रात् त्रोटितबन्धनो द्राक मगधेभ्यः पलायितः। तच्छिष्यः कलापिङ्गोऽपि भ्रमरेण चरणेन भृशं ताडितः।

ततः सर्वान् पटमण्डपे संमील्य मन्दाकिनी मल्लिकामारुतयोः पूर्वजन्मकथां श्रावयति। अस्ति दक्षिणस्यां दिशि अगस्त्यमुनेराश्रमोपेतो मलयगिरिः। तस्मिन एकदा मातरिश्वातीवरमणीयं वपुर्दधौ। तं दृष्टवा मन्मथशरैः पीड्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानैका नागकन्या गर्भं दधौ। सद्य एवैकं बालकं सुषुवे सा। यत एक एव समयो देवतागर्भाणां धारणप्रसवयोः। सा नागकन्या पितुर्बिभ्यती लतापल्लवेषु तं बालकं निधाय तत्पालनार्थं वनदेवताः पार्श्वं च स्वधाम जगाम। समिदाहरणायागतैर्मुनिदारकैः स बाल उद्धृत्य नीतोऽगस्त्यमुनये समर्पितश्च। क्रमेण स बालो वर्द्धमानः

क्रमलोलमुग्धकरपल्लवः क्षितौ
अलिकान्तचञ्चदलिकान्तकुन्तलः।
मृदुजानुसञ्चलनमञ्जुलक्वण-
न्मणिकिङ्किणीगणमरिङ्गदङ्गणे॥

ततश्च क्रमात्—

मुहुरिभकलभानां कर्णमामोटयन्तं मृगपतिपृथुकानां पाटयन्तं सटान्तम्।
अविनय बत मा मा सत्त्वहिंसां कुरूच्चैरिति मुनिजन एनं स्नेहगर्भं व्यरौत्सीत्॥

यौवनं प्राप्तः स वायुपुत्र एकदा स्वप्ने कामपि कामनीयकनिधिं कन्यां समालोकत। प्रबुद्धः स मनसिजविशिखानां शरव्यभूतः सवयोभ्यां सखिभ्यां पृष्टः तामेवं वर्णयामास—

चूडापदे स्फुरति कोऽपि मणिर्यदञ्चुः
सौदामिनी भवति कैशिकनीरदस्य।
हारावली च कुचयोरिभकुम्भभासो-
र्लावण्यसिन्धुचलफेनततिद्युतिर्या॥

ततो दिने दिने परिक्षीयमाणशरीरः स एकदा आकाशे हंसान् ददर्श।

तत्रैककेन बिसकाण्डधिया खगेन
चञ्च्वा विदश्य कथमप्यपनीयमानः।
वेगाच्च्युतोऽस्य तलिमे निपपात कोऽपि
हारः शरद्विशदचन्द्रमरीचिगौरः॥

ततस्तं हारं स्वप्नदृष्टकन्यकयैव धारितं प्रत्यभिजानन् तत्कन्यान्वेषणाय स वायुपुत्रः सह सखिभ्यामम्बरपथेन कौबेरीं दिशं प्रातिष्ठत। नन्दनवने प्राप्ते तद्देवता तस्य मनोभवमोहनं रूपं दृष्ट्वा तदीयकण्ठेऽम्लानां मधुच्युतं मालां बबन्ध। ततः स गौरीगुरुं गगनचुम्बितटं प्रपेदे। तत्राम्बिकायाश्चरणं प्रणम्य स मण्डपैकदेशे स्फाटिकीं वितर्दिमध्यासीनां कामपि सिद्धयोगां संन्यासिनीं ददर्श। सा तमकथयत्। अस्त्यत्र विद्याधरामात्यस्य विश्वावसोर्लावण्यमयी कन्या यस्या हंसोपहृतममुं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

हारं भवानुरसा संभावयति। साधुना पर्यन्तभाजि लताभवने देवीं भवानीं कन्दुकक्रीडितेनाराधयति । तया सह तत्र गतः स तां स्वप्ने दृष्टपूर्वेयमिति प्रत्यभिज्ञाय द्विगुणितमन्मथः स्वसखायायावादीत्—

झलंझलितकङ्कणं चलिततुङ्गपीनस्तनं
चलत्कुटिलकुन्तलं चपलनीलनेत्रोत्पलम् ।
श्रमाम्बुलुलिताननं श्रवणपातितोत्तंसकं
निहन्ति मम मानसं न हि न हि ध्रुवं कन्दुकम् ॥

सा बालाऽपि तं वायुपुत्रं दृष्ट्वा मदन-शरशरव्यतामयात् । तस्य गात्रे च मन्मथविलासजुषः कटाक्षानमुचत् । ततस्तस्यान्यतरेण सख्या हारोऽयमत्रभवत्याः हंसमुखात्पतितो गृहीतोऽस्माभिः, ऊरीक्रियतां भूयोऽपीत्युक्ते तस्याः सखी प्रत्यवदत्—हारावलीयं विराजतु महाभागस्यैव दोरन्तरे, दीयतां पुनरियं दिव्यपरिमला मालेति ।

तदनन्तरं विरहानलेन दह्यमानः स चित्रफलके

तं शैलं तां सरितं तद् वल्लीसद्म तां चकोराक्षीम् ।
कन्दुकखेलन-खिन्नामालिखत्कण्ठे च तां मालाम् ॥

दुःसहविरहानलदह्यमानः सखिभ्यां कल्पिते मृणालतल्पे पतिताङ्गस्तामेव विद्याधरकन्यामनुस्मरन् असंजातनिद्रः कथमपि क्षपार्द्धमनयत् । तदनन्तरं समीपवर्ति क्रीडापर्वतशिखरे कस्याऽपि करुणालापमश्रृणोत्—

देवि प्रसृतभुवने भगवति भक्तानुकम्पिनि भवानि ।
अन्यस्मिन् जन्मनि मे भर्ता भूयात्स मारुतकुमारः ॥

ततश्च क्रीडापर्वतमारुह्य स ददर्श तां लता-वलयवेष्टितकण्ठनालाम् । तां च लतावलयं छित्त्वाऽमुचत् । तत्सम्भ्रमे तस्य कराच्चुतश्चित्रफलकोऽधस्तात्तरुमूले काकतालन्यायेनागतस्य सुलभमन्युनाम्नो महर्षेः शिरसि न्यपतत् । तत आबद्धभ्रुकुटीकरालवदन स मुनि आः दुरात्मन् कन्याकामुक पत मानुषीं योनिमियमपि कुलटा मानुषीभावमुपेत्य जन्मान्तरेऽपि प्रथम एव त्वत्सङ्गमे मूर्च्छात्वति शापमसृजत् । तच्छापद-रधाभ्यां ताभ्यां तत्क्षण एव विलिल्ये । तस्य सुहृदोरेकतरः तत्केलिपर्वतस्यभृगौ निपत्य सुहृद्गतां गतिमयासीत् । अन्यस्तु तं सुलभमन्युं मुनिं निर्भर्त्सयामास । तेन प्रकुपितः स मुनिः यतः सुहृत्स्नेहेन राक्षस इव व्याहरसि तेन राक्षस एव भव । अयमेव ते सुहृत् शत्रुर्भवतु' इति तं शशाप ।

ततः हाहेति सम्भ्रान्तायां तस्यां वर्णिन्यां गौर्या मधुरा गीर्गगनेऽजृम्भत ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'पुत्रीयतोरपत्ये स्यातां मद्भक्तयोरिमौ भूमौ ।
तावितरेतरदत्तौ मालहारौ च सहजौ स्ताम् ॥'

अनयोर्भविता वर्द्धमानरागः रमणीयः समागमः सा पुनर्मुनिशापप्रयुक्ता प्रथमसङ्गमे मूर्च्छा मूर्च्छाहरस्यास्य चूडामणेः स्पर्शमात्रेण शाम्यत्विति ।

तस्मिन्नेवावसरे विमानेन तत्रागतो विश्वावसुर्माकन्दसहितः तौ सम्भावयामास । तदैव कुसुमपुरमहाराजस्यैतत् पत्रं मारुतेन प्राप्तम् ।

विश्वानन्दमृगाङ्क वत्स भवता व्यूढाभवन्मालिका
यत् तं शम्बरकं निबध्य विटपे तत् केन न स्मर्यते ।
यच्चोवाह स विष्णुराततनयां मन्दाकिनीवेषवान्
मित्रं ते कलकण्ठ ऊर्जितमतिस्तच्चानुमोदामहे ॥

अन्ते भरतवाक्येनैतत्प्रकरणं समाप्तिमायाति—

भद्रं भजन्तु विश्वे भक्तिर्विष्णौ नृणां शिवे वास्तु
धर्मे रमन्तु भूपाः श्रीमन्तः सन्तु विद्वांसः ॥

उद्धृतेभ्य उपरितनेभ्यः श्लोकेभ्य इदं सुस्पष्टमेव स्यात् यदस्य उद्दंडिकवेः संस्कृतभाषायां वृत्तप्रयोगे चासामान्यं प्रभुत्वमभवत् । किन्तु तस्य संविधानके न मौलिकत्वं दृग्गोचरीभवति । तेन काचित्कल्पनाः कालिदासाद्गृहीताः । क्वचित्तास्वनौचित्यमपि दृश्यते यथोपरि प्रदर्शितमस्माभिः । नायकनायिकयोः पूर्वजन्मवर्णनेऽनुहरत्यसौ भट्टबाणस्य । किन्तु ततोऽभ्यधिकं तस्य भवभूतेर्मालतीमाधवानुकरणं दरीदृश्यते । मालतीमाधववदस्मिन्नपि प्रकरणे वर्तते प्रेमियुगलम् । तेन च स्वेप्सितसाधने प्रयुक्ता उपाया बहुशो मालतीमाधवे प्रयुक्तैरुपायैः समाना एव । तत्प्रेमियुगलस्य साहाय्यं कुर्वती योगेश्वरी मन्दाकिनी मालतीमाधव-वर्तिकामन्दक्याः प्रतिकृतिः । अस्मिन्प्रकरणे बहवो घटनाः- -यथा मालाया अर्पणम्, चित्रफलकप्रेषणम्, हिंस्र-पशोरास्कन्दनम्, नायकोपनायकाभ्यां स्वप्रेयस्योर्जीवितसंकटादुन्मोचनं, नायकेन नायिकाप्राप्त्यर्थं चण्डिकायतने श्मशाने वा गमनं तत्र च काकतालीयन्यायेन तत्कृतं नायिकासंरक्षणम्, विवाह-प्रसंगे नायकसखेन स्त्रीवेषं गृहीत्वा प्रतिनायकस्य वञ्चनम्, नायिकायाः सहसादर्शनेन नायकसहितानां सर्वेषां शोकः, दूरस्थलाद्योगप्रभावेण नायिकायाः प्रत्यागमनमिति बहवः प्रसंगा मालतीमाधवे तथास्मिन् मल्लिकामारुते समानाः । ततश्चोद्दंडिकवेर्भवभूतेरनुकारित्वं सुस्पष्टं भवति ।

भवभूतिना रामचरितविषयके द्वे नाटके—महावीरचरितं, उत्तररामचरितं चेत्येते विरचिते । तयोरनुकरणं बहुभिः कविभिः कृतम् । तस्य तृतीयं रूपकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकरणसंज्ञं मालतीमाधवम् । तस्य संविधानकं सामाजिकम् । सन्ति नाम संस्कृत-साहित्ये बहूनि प्रकरणानि । किन्तु तेषां संविधानकं प्रायो मौलिकं दृश्यते। परमस्मिन् मल्लिकामारुतप्रकरणे भवभूतिरचित-मालतीमाधवस्य प्रभावः सुस्पष्टं दृश्यते । अतोऽस्य वैशिष्ट्यं संस्कृतवाङ्मयेतिहासेऽसामान्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यगौरवे कालिदास-काव्यम्

विश्वनाथभट्टाचार्यः

काव्यं हि नाम मानवसभ्यतायाः फलमिव वृक्षस्य परमं सार्थक्यमावहति। पत्रसंभारैश्छन्नदिगन्तरालोऽपि वृक्षो यदि नामरूपसौरभ्यमधुरैः फलैर्वञ्चितः स्यान्न तर्ह्यसौ सर्वात्मना मनुजैः सादरं समाद्रियते। छायादानमात्रेण तापक्लिष्टानां पथिकानां कामं तापापनोदनं कृतवतोऽप्यस्य बन्ध्यत्वेन निराक्रियते पूर्णः परितोषोऽन्तःकरणस्य। एवमेव मानवसभ्यतापि दर्शनविज्ञान-धानुर्वेद्यादिभिर्लब्धप्रचुरोत्कर्षा कृतदिग्विजयापि काव्यलक्ष्मी प्रसादवञ्चिता न शक्ता तत्त्वतो रञ्जयितुं हृदयम्। समग्रस्य विश्वस्येतिहास एव तथ्यमेतत्प्रमाणीकुरुते। न कापि प्राचीना वार्वाचीना वा सभ्यता जगत्यस्मिन् कृतपदा संलक्ष्यते यस्याः काव्योत्कर्षो न स्यात्। ईजिप्टग्रीस–रोम–चीनादिदेशेषु सभ्यताया य उत्कर्षो दृष्टपूर्वस्तत्र कविप्रतिभावैशारद्यमेव मुख्यो हेतुः। तदेव तत्तत्सभ्यताया हृतेष्वपि तदाधारभूतेषु साम्राज्येषु, अद्यत्वेऽपि संस्मरणीयता साधकम्। न खलु भारतीया महापराक्रमस्य दिग्विजयिनोऽलिकसुन्दरस्य न वा देवकुलविध्वंसिनो महमूदस्य, न च पुनः शाठ्यपण्डितानां निर्घृणानामांगलशासकानां स्मरन्ति परं न कोऽपि ग्रीककलाविधिं परमवैष्णवं हेलिओदोरमहाशयम्, महम्मदीयं कलाविधिं मुघलकालिकान् कवीन्, शेक्सपीरमिल्टन-शेली-प्रभृतींश्च कविधुरन्धरान् विस्मर्तुमीशः।

अद्य कोऽयं हेतुः कवीनां कालजयित्वस्येति निपुणं विचारणीयः प्रश्नः। कवीनामाश्रयदातारो विस्मर्यन्ते न पुनः कविपुंगवा इति तु सर्वजनविदितमेव वाल्मीकिव्यासाश्वघोषकालिदासादि-कविपरम्परा-वाहिनि भारतवर्षे। विस्मयावहमपि तथ्यमेतद् यद् यानवलम्ब्य कवीनां काव्यं स्फुरितं तेऽपि रामकृष्णयुधिष्ठिरादयः काव्यप्रसादादेव मनुजानां हृदये निहितदृढपदा राजन्ते। वाल्मीकिं विना रामचन्द्रोऽपि ध्रुवं विस्मरणीयतामगमिष्यदित्यनायासं वक्तुं शक्यते। अतः किं खलु कवेर्महत्त्वबीजमिति प्रश्नो विमृश्यते।

युक्तमेवोक्तं विचारवद्भिः 'दुर्लभं मानुषं जन्मे' ति। प्राणिषु चेतनो मनुष्यः प्रशस्यः, चेतनेषु ज्ञानी श्रेयान्, ज्ञानिषु कविः श्रेष्ठः। कवीनां श्रेष्ठत्वमेव तेभ्यो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽमरत्वमर्पयति। वृक्षसाम्यं सभ्यतायाः कल्पयद्भिरस्माभिरत्रापि वक्तुं शक्यते सभ्यतावृक्षस्य पत्रपल्लवसंभारस्थानीयाश्चेतना मनुष्याः, प्रसरदामोदः पुष्पोत्करो ज्ञानिनः, वर्णगन्धस्वादमयानि फलानि कवय इति। एवं चास्मदभिमतेन कवेः श्रेष्ठत्वविषये दर्शनसमुपासकैर्विद्वद्भिरसूया न प्रवर्तनीया। को नाम मूर्खो मननेन मानवजीवनस्य सार्थक्यमार्गं प्रदर्शयतो दार्शनिकान् न बहु मन्येत? परमेतावदेवात्र विभावनीयम्—दर्शनं हि नाम तत्त्वानुसंधित्सया सदसतोः स्वरूपं निरूप्य हानोपादानबुद्धिं द्रढयति मनुजानाम्। अतश्च दर्शनस्य परममुद्देश्यं पार्थिव-जीवनस्य सन्मार्गप्रदर्शनमेव। तच्च प्रदर्शनं वस्तुगत्या मानवजीवनविधिं नानुसरति। युक्तिप्रपञ्चैः साधकानामपरोक्षानुभूत्या च समुद्भासितं दर्शनमस्मादेव कारणात् न सर्वजनाभिगम्यम्। दृश्यते हि वेदान्तदर्शनेऽधिकारिणो विशिष्टं महत्त्वम्।

तथाहि तत्त्वतो हानोपादानबुद्धिर्भिन्नैव वस्तुतो हानोपादानबुद्धेः। दृश्यन्ते च तत्त्वतो हानोपादानबुद्धिप्रमापका अपि मनुष्या व्यवहारदशायां नितान्तं विपरीतकारिणः। यथाहि सर्वमेव वस्तुजातं 'आत्मनस्तु कामाय' प्रियं भवति मनुष्यस्य, तथैव तत्त्वज्ञानमपि यावत्स्वात्मगतं न भवति तावन्न तत्फलाय प्रकल्पते। स्वानुभव एव सर्वोत्तमं प्रमाणमित्यत्र कः सन्देहः। अनुभव द्वारीकृत्य यत्किमपि मनुष्यैः प्राप्यते तदेव तस्य स्थायिने कल्याणाय।

कविरेतदेवाभिप्रैति। त्रिगुणगुम्फितां मानवप्रकृतिं स्वाभाविकैर्वैचित्र्य-सहस्रैः समुद्भास्य यज्जीवनालेख्यमसौ प्रस्तौति तद्धि सर्वतः पूर्णम्। नासौ यद् ग्राह्यं केवलं तदेव प्रदर्शयति प्रत्युत सत्त्वेन सार्धं रजस्तमसी च गुणौ तद्विकारांश्च स्वप्रतिभाया विषयीकरोति। दर्शनं केवलं सदेव प्रमाणयति काव्यं पुनः सदसती सामग्र्येण। अनेन न भ्रमितव्यं कवेः सदसद्विवेक एव नास्तीति। तस्योद्देश्यमेव भिन्नम्। जानात्येवासौ किं सत्किमसदिति, परमेतेन काव्यपाठकानां सामाजिकानां किं सिध्यते? न हि अन्यदीयज्ञानेन भवति ज्ञानि-व्यपदेशो मनुष्याणाम्। कृत्स्नानां मानवानां गुरुरसौ तेषामेव विवेकोद्बोधार्थं यतमानो यथास्थितं मानवजीवनं प्रदर्शयति, तच्च साधारणीकरणविधिना हृदयङ्गमं सद्गुरूपदेशं विनैव सामाजिकानां हानोपादानबुद्धिमुद्बोधयति।

किं कविमात्र एवास्य महत्त्वस्याधिकारी? नैवं वक्तुं युज्यते। परमेतन्मूलकमेव कवीनां तारतम्यमिति ब्रूमः। गुणदृष्टया कविः सत्त्वप्रधानरजो-गुणवान्। सत्त्वप्राधान्येनैव रागद्वेषवियुक्तस्यास्य वर्ण्यविषयो देशकाल-बन्धनमतिक्रामति, कविश्च क्रान्तदर्शीति व्यपदिश्यते। वाल्मीकिना सममेव अनुसर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णीयचरितो रामभद्रः, हेयचरितो रावणश्चामरत्वं प्रापितौ । ततश्च सर्वेषां सर्वदा विवेकोद्बोधः यो हि एवं कर्तुमर्हः स एव कविर्नेतरः । अथवा स एव महाकविरित्युच्यताम् । सिध्यत्येवं दर्शनं यच्चिकीर्षति, कविस्तदेव मार्गान्तरेण सुष्ठुतरं संपादयतीति ।

इतोऽप्यधिकं विद्यते कवेर्महत्त्वसाधकं कारणान्तरम् । आनन्दमेवाभिलक्ष्य भूमौ मानवजीवनं प्रवर्तितम् । यथाहोपनिषद्—'आनन्दाद्धयेव खल्विमानि भूतानि जायन्ते, आनन्दं प्रयन्त्यभिसंविशन्ति च' त्यादि । तमेवानन्दं प्राप्तुकामा आमनोर्मनुष्याः प्रयतन्ते । इन्द्रियद्वारेण विषयभोगमुखेन यदनुभूयते तदेवानन्द मत्वा सांसारिकैर्जनैर्निश्चिन्तैः स्थीयते । परं विषयेन्द्रिय - संयोगपरतन्त्रं यदनुभूयते न तदानन्दपदवाच्यं किन्तु सुखमेव तत् । सुखं हि अनुकूलवेदनीयं क्षणिकं स्वभावत एव द्वन्द्वचरं च । सुखं यदि प्रार्थ्यते तर्हि दुःखमप्रार्थितमपि लप्स्यते । अस्मादेव भगवदुपदेशः 'द्वन्द्वातीतो भवार्जुन' इति । सुखदुःखयो-द्वन्द्वादूर्ध्वं विराजते स आनन्दः—

'यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ॥

एष हि आनन्दो. दार्शनिकदृष्ट्या आनन्दस्वरूपादभिन्नः, न्यक्कृतेन्द्रियपार-तन्त्र्योऽतश्च पूर्णतया आत्मरतिरूपः ।

इममेवानन्दं कविर्लक्ष्यीकरोति । रस एव तस्य दैवतम् । रसस्य यदभि-व्यञ्जनं विलक्षणं सत्तदेव मनुष्यान् रजस्तमसोः परस्ताद् विराजमानमानन्दं स्वादयति । विगलितवेद्यान्तरो मनुष्यो रसास्वादक्षणेषु निरुपाधिक आनन्दे रमते । काव्यगतं जगत् परमार्थतोऽसद्रूपमपि कविप्रतिभाप्रसादेन स्फुरद्रूपमात्मपरभावना-विभुक्तं साधारण्येन प्रतीयते । मनुष्योऽपि रसोन्मुखः सपदि सर्वपरिच्छेद-शून्यं परमानन्दं सत्त्वोद्रेकवशात् सर्वगते स्वात्मन्यनुभवति । जीवात्मनो रसास्वाद-काले येयं बन्धविमुक्तिः काव्येन सम्पाद्यते तत एव काव्यस्य लोकोत्तरत्वं कवेश्च महत्त्वं महोपकारित्वं च सिध्यतः ।

(२)

यो हि स्वप्रतिभाप्रभावेण परिवर्तमानं खण्डितं मर्त्यजीवनमवलम्ब्य तदेव नित्यत्वेन, अखण्डत्वेन च संयोज्य आत्मानन्दं वितरति स एव महाकविः । असंशयमीदृशानां महाकवीनां संख्या न भूयसी । यथार्थमाह आनन्दवर्धनाचार्य-पादः—'अस्मिन्नतिविचित्रकवि-परम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा वा महाकवयः ।' स्थितेऽप्याद्ये काव्यदेवतावतारे वाल्मीकौ महाकविपु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

कालिदासस्य प्रथमगणनीयत्वं ध्वनिप्रस्थान-प्रवर्तकस्य विचारसौक्ष्म्यं प्रमाणयति। नात्र वाल्मीकिं प्रति काचनाश्रद्धा। आद्यः खल्वसौ कविः काव्यविधेरुत्सभूतः। वाल्मीक्युपज्ञो हि संस्कृत-काव्यविधिः। यदि नाम स आर्षः कविर्नाभविष्यत् तर्हि कालिदासोऽपि कालिदासो नाभविष्यत्।

तथापि साम्प्रतमेव कालिदासस्य पृथग्गणनमिति ब्रूमः। लौकिकोऽयं सांसारिकः कविरार्षकाव्यपरम्परां लौकिकभूमौ प्रतिष्ठापयामास। पूर्वभाव्यपि बौद्धकविरश्वघोषः कविप्रतिभायां कालिदासातिशायी नासीदिति तु सर्वैः सहृदयैः स्वीकृतम्। केवलया कविप्रतिभया लब्धविपुलयशाः कालिदासो निःसंशयं तपःप्रभावपूतचरित्राद् वाल्मीकेरधिकां ख्यातिमर्हतीत्यपि न विस्मर्तव्यम्। यदुक्तम्-'जाते जगति वाल्मीकौ कविरित्यभिधाभवदि'ति न तत्र कस्यापि विप्रतिपत्तिः परं महाकाव्यरचयितृषु कालिदास एव प्राथम्यमर्हति। रामायणं न केवलमादिकाव्यं धर्मग्रन्थोऽपि, परं कालिदासकृतयो न धर्मग्रन्थाः, न तासां पठनेन स्वर्गप्राप्त्यादिफलश्रुतिः कल्पिता, केवलं रसास्वादमहिमैव तासां समादरबीजम्। नात्र मन्तव्यं रामायणे रसाभिव्यक्तिर्न भवतीति, परं तत्र ततोऽप्यधिकं पुण्यार्जनहेतुत्वं विद्यते। अतो रामायणस्योत्कर्षातिशयं स्वीकृत्यापि कालिदासकृतीनामनितरसाधारणत्वे नैव विवदनीयम्।

कवेर्महत्त्वबीजत्वेन यदस्माभिः पूर्वमुपन्यस्तं तत्सर्वं कालिदासे दृश्यत इत्यसौ कविरवश्यमेव महानिति विशेषणमर्हतीति नः पक्षः। कालिदासकाव्येषु ऋतुसंहारमेघदूत-कुमारसंभव-रघुवंशाख्येषु सर्वत्र मानवजीवनं क्वचित्स्वत एव क्वचिच्च पौराणिकचरितान्याश्रित्य तथा विलसति यथा रसनिष्यन्देन पाठकानां हृदयमाप्लावयति। रसास्वादक्षणे च देशकालकृतबन्धनं विस्मृत्य काष्ठागतमात्मसमवेतं परमानन्दमनुभवति मनुष्यः जीवात्मनो मुक्तिरियमेव कवेर्लोकोत्तरं कर्म।

वयमत्र क्रमशः कालिदासप्रतिभाया महत्त्वबीजानि विमृशामः। आदौ तावत् कवेः सा प्रतिभा नयनगोचरीभवति या खलु नवनवोन्मेषशालिनी प्रज्ञा मता। स्पर्शमणिरिवेयं प्रतिभा यत्किञ्चन स्पृशति तदेव, महद् वा तुच्छं वा, नित्योज्ज्वलया कनकद्युत्या भासुरयति। वर्ण्यवस्तुजातं भासयन्त्यपीयं द्युतिर्वस्तुतो विषयनिरपेक्षा। सर्वं हि वस्तुजातं जगत्यस्मिन् क्षणिकं परं द्युतिरियं चिरन्तनी। न सन्ति ऋतवः कालिदासकालिकाः, न च यक्षः स्वाधिकारात् प्रमत्तः, न च हरपार्वत्यौ, न वा रघुवंशधुरन्धराः— परमेतेभ्यः सा द्युतिः समर्पिता कविराजेन यया चिरभास्वरास्ते सर्वे अमरत्वं प्रापिताः।

कालिदासप्रतिभाया यदेतदितरकविविलक्षणत्वं तन्मूलत्वेन विशेषस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामान्यतापादनं वयमुत्पश्यामः । विशिष्टानामितरव्यावर्तकं वैशिष्ट्यं वर्णयन्नप्यसौ कविस्तत्र तत्रानेकसमवेतं सामान्यं तथा कौशलेन व्यंजयति यथा प्रातिस्विकोऽप्यनुभवः सर्वगतत्वेन भासते । अतश्च विच्छेदकातरस्य यक्षस्य विलापो विरहिमात्रस्याक्रन्दे, अनन्यभाजं पतिमाप्तुं पार्वत्यास्तपः सत्फलप्रेप्सुमात्रस्य ऐकान्तिकप्रयासे, रघोरौदार्यं सज्जनमात्रस्य दानबुद्धौ विपरिणम्य निध्यायतो मन्ये अनामकस्य सहृदयस्य सुभाषितं प्रवृत्तम्—

पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासा ।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ॥

सर्वविषयग्राहिणी सर्वेषां च विषयाणां रूपान्तरसाधिका कवेरियं वाणी साधारणीकरणात्मना व्यंजनाव्यापारेण स्फुरद्रसा सर्वत्र काव्येषु सिद्धरूपा विराजते । यदुक्तमाद्येनालङ्कारिकेण दण्डिना—

लिप्ता मधुद्रवेणासन् यस्य निर्विषया गिरः ।
तेनेदं वर्त्म वैदर्भं कालिदासेन शोधितम् ॥

इत्येतस्य मूलं कालिदासकाव्यानां पूर्वोक्तं वैशिष्ट्यमेव मन्महे । ईदृशमेव मर्त्यजीवनं सौन्दर्यानुसन्धिन्या दृष्ट्या कालिदासः पश्यति, दर्शयति च । अथच मर्त्यं जीवनं दिव्येनानुभावेन महनीयं संपादयति । दिव्यं हि नाम जीवनं स्वतश्चारुत्वं न धत्ते, मर्त्यस्यापूर्णतापूर्ताविव सज्जीवनस्य सार्थक्यं संभवति ।

श्रृंगारी कविः कालिदासः स्वकीयया रागवृत्त्या तदेव जगत् सृजति यन्मर्त्यमपि रसप्रसादेन अमृतम्, यत्र जीवा मर्त्या अपि दिव्यत्वमाकांक्षमाणाः, यत्र चारुताया कुत्रचिदपि लेशतो हानिर्नास्ति । पूर्णतया लौकिकमिदं जगल्लोकोत्तरेणानन्देन सर्वतः पूर्णम् । चक्षुः श्रोत्रघ्राणत्वग्रसनैः पञ्चभिरेव ज्ञानेन्द्रियैर्जगतोऽस्य रसास्वादसारं रूपं प्रतिपादयन् कालिदासः सौन्दर्योपासकानां कवीनां मूर्धन्यं भजते । कविप्रतिभयोन्मीलितेऽस्मिन् जगति यत् किंचन विद्यते स्थावरं वा जाङ्गमं वा तस्य सर्वस्य स्रष्टा कालिदास एव । अस्मिन् काव्यसंसारे सांसारिकमपि वस्तुजातं रसमयं सद् दृष्टपूर्वमपि नवरूपोद्भासितं महनीयतरं च दृश्यते । विधात्रा सृष्टा अप्येते विषयाः कवेः प्रतिभया संस्कृता वस्तुतो लोकोत्तराः । कालिदासविषयेऽपि कथयितुं शक्यते —

स पिता पितरस्तासां केवलं जन्महेतव इति ।

यदेतत् कविः पुराणमपि, दृष्टपूर्वमपि, गतानुगतिकमपि वस्तुजातं नूतनत्वेन, अपूर्वत्वेन, आश्चर्यकरत्वेन च संभाव्य प्रदर्शयति तदेव वैलक्षण्यं निदर्शयितुकामस्य मन्ये ध्वनिगुरोरानन्दवर्धनस्य सिद्धान्तोऽयम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

अपारे काव्यसंसारे कविरेव प्रजापतिः ।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥
शृंगारी चेत् कविः काव्ये जातं रसमयं जगत् ।
स एव वीतरागाश्चेन्नीरसं सर्वमेव तत् ॥

कविप्रजापतिः कालिदासः स्वकाव्येषु यज्जगदुन्मीलयति तत्सर्वतो रसमाधुर्येण परिप्लुतम् ।

(३)

महाकवेः कालिदासस्य सौन्दर्यानुरागिणी दृष्टिः किं पश्यतीत्यस्य किञ्चिद् विमर्शनं प्रासङ्गिकं प्रतीयते । न केवलं किमसौ पश्यति, परं किं दर्शयति—इत्यस्यापि विचारणावश्यकी । केवलेन दर्शनेन न कवीनामात्मसिद्धिः, वर्णनानुगतं दर्शनं हि खलु कवेरात्मलाभाय कल्पते । यथार्थमुक्तमाचार्येण भट्टतोतेन—

दर्शनाद् वर्णनाच्चाथ रूढा लोके कविश्रुतिः ॥
तथाहि दर्शने स्वच्छे नित्येऽप्यादिकवेर्मुनेः ।
नोदिता कविता लोके यावज्जाता न वर्णना ॥

दर्शनानुगतं वर्णनमत एव काव्ये विशेषतो निरूपणीयं भवति ।

वयमत्र रघुवंशाख्यं महाकाव्यमाश्रित्य कालिदासस्य दर्शनवर्णनयोः वैशिष्ट्यं संक्षेपेण प्रदर्शयितुमिच्छामः । रघुवशं हि महाकाव्यं कवेरन्तिमा कृतिरिति विद्वत्संप्रदायः । यदुक्तं कैश्चिदसंपूर्णमेतत्काव्यं प्रतिभातीति न तदस्माकं मनोरमम् । राज्ञो दिलीपादारभ्य अग्निवर्णनामानं राजानं यावद् रघुवंशस्य वर्णनपरं काव्यमिदमेकोनविंशतिसर्गात्मकानाम् । महाकाव्यस्यास्यारम्भावसाने विचिच्य काव्यस्यास्य परिपूर्णतायां संशयो न भवत्येव, कवेर्लक्ष्यमपि स्पष्टं प्रतीयते ।

आदिकवे ऋणमुररीकृत्य कालिदासो रघुवंशवर्णने सज्जोऽभवदिति स्वयं कविराह— 'तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः' इति । के च ते गुणाः प्रवृत्तिनिमित्तीभूता इति कविः कुलकेन प्राह—

'सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्
यथापराधदण्डानां यथाकालप्रबोधिनाम्
त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्
रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।।' (I, 5-9)

एतस्मात् स्पष्टमेतत्प्रतिभाति यदसौ कविरनुकरणीयचरितानां सर्वसद्गुणसंपन्नानामादर्श-क्षत्रियाणां स्वधर्मनिरतानां सुशासकानां काञ्चिन्मालिकां संग्रथ्य स्वकालिकजनेभ्य उपाजहार। ये केचन गुणाः सुशासके राज्ञि अपेक्ष्यन्ते सर्व एव ते रघुवंशप्रदीपेषु राजसु विराजन्ते स्म। परं किमग्निवर्णोऽप्येभिर्गुणैर्भूषित आसीत्? सर्वथैव नेति कविना प्रदर्शितम्। यैर्गुणगणैः रघुवंशनृपतयः स्तुत्यचरिताः संजातास्त एव यदि कस्मिंश्चिन्न दृश्येरन् तर्हि कथमसौ तद्वंशगौरवख्यापके काव्ये स्थानं लभेत? अग्निवर्णो हि विधिविपाकात् पद्मरागाणामाकरे काचमणिरिव सूर्यवंशे जनुर्लेभे। अतः साम्प्रतमेव तद्राजवर्णन एव काव्यसमाप्तिः। क्व दिलीपो वंशप्रवर्तको राजा क्व चाग्निवर्णो वंशलोपकारी! दिलीपो हि–

'प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः ।।"

अन्तिमः पुनर्वंशकलङ्को राजा सचिवेष्वधिकारं संन्निवेश्य 'स्त्रीविधेयनवयौवनोऽभवत्', तथाच 'न व्यपैक्षत समुत्सुकाः प्रजाः' दर्शनं च तेन राजापसदेन 'गवाक्षविवरावलम्बिना केवलेन चरणेन कल्पितम्'। राजवंशस्याभ्युदयास्तमयौ एवमेव भवत इति कवेरन्यतमं प्रतिपिपादयिषितमित्यतोऽपि अग्निवर्णशृङ्गारो नाम सर्ग एव योग्यतया काव्यस्यास्यान्तिमः सर्गः।

सर्वस्यैव राजवंशस्य दृश्येतेऽभ्युदयकालः क्षयकालश्च। कालगतिज्ञः कालिदासो रघुवंशस्यापि तौ कालौ दर्शयति। रामचन्द्रो हि वंशोदधेरस्य मथनादुत्पन्नो राजचन्द्रः। तमेव प्राप्तुं मन्ये, अजं विहाय सर्वेऽन्ये पूर्वभाविनो राजानः पुत्रार्थं तपस्तेपिरे। दिलीपो नन्दिनीसेवया, रघुर्ब्राह्मणशीर्वादेन, दशरथश्च यज्ञप्रसादेन पुत्रान् लेभिरे। वंशानुक्रमेण संचितं तत्तपः प्रजापालनपुण्येन परिबृंहितं सत् पुत्ररूपेण रामचन्द्रं मर्यादापुरुषोत्तमं जनयामास। कविर्यावत्सु राजसु स्वकाव्यप्रवृत्तिहेतुभूतान् गुणान् पश्यति तांस्तान् राज्ञो वितत्य वर्णयति। एवं च दिलीपवर्णने द्वौ सर्गौ, रघुवर्णने सर्गत्रयम्, अजार्थं सार्धत्रिसर्गाः, दशरथवर्णने सर्गद्वयम्, रामचन्द्रगुणवर्णने सर्गपञ्चकम्, कुशातिथ्योः प्रत्येकमेकः सर्गः, एकविंशती राज्ञां वर्णने वंशानुक्रमाख्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

एकः सर्गः, अग्निवर्णार्थं चैकः सर्गः काव्येऽस्मिन् दृश्यन्ते । रामं यावद्-वंशस्यास्य शुक्लः पक्षः स च तस्य कीर्तिच्छटोज्ज्वलितदिगन्तः पूर्णश्चन्द्रः, तदनु कुशातिथी कृष्णपक्षस्य प्रतिपद्द्वितीयाचन्द्रस्थानीयौ क्षीयमाणप्रभापटलौ, इतरे पुनः क्रमक्षीयमाणप्रभाः, दर्शस्थानीयश्चान्तिमोऽग्निवर्णः । परं कालवि-त्कविरग्निवर्णस्य निन्दितं मरणमेव चरमं न मनुते, किन्तु तत्पुत्रस्य गर्भ-स्थस्य सूचनया पतितस्यापि पुनरुद्धारसंभावनां प्रदर्शयति । यतो हि कवि-रसौ जानाति–

'कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा ।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण' इति ।

ऋतुसंहारमेघदूतयोः कविः प्राधान्येन अचेतनां प्रकृतिं वर्णयति, परं कुमारसंभवरघुवंशयोश्चेतनां प्रकृतिम् । प्रकृतिर्हि पाञ्चभौतिकी चेतनाचेतनयोः समानरूपा । चैतन्यप्रसादादेव मनुष्या अचेतनविलक्षणा महत्त्वं दधते । आत्मनस्तु कामाय सर्वः प्रियो भवतीति न्यायस्य सार्वत्रिकत्वाच्चेतनाश्चेत-नेभ्य एव स्पृहयन्ति । अस्मादेव कारणात् लतापुष्पपल्लवादीनां सौन्दर्यं स्वीकृत्यापि मनुष्यगतं सौन्दर्यमधिकं कांक्षति । वन्यप्रकृतिरपि अत एवा-रोपितमनुष्यरूपा विशेषत आवर्जयति मानवहृदयम् । कमलं सुन्दरम्, मृग-शिशुरपि सुन्दरः, परं प्रियामुखं सुन्दरतमम् । चेतनानामात्मसदृशानां वर्णन-मित्यतोऽपि हेतो रघुवंशं कवेः सर्वजनप्रियं महाकाव्यम् ।

नैवं पुनर्मन्तव्यं यदेतस्मिन् प्रकृतिवर्णनस्य स्थानं नास्तीति । प्राधा-न्येन व्यपदेश इति नयेनास्माभिरेवमुक्तम् । वस्तुतस्तु मेघदूतेऽपि प्रकृतिरा-रोपितमनुष्यभावा एव हृदयं नन्दयति, परं रघुवंशे कुमारसंभवे च कवि-र्मानवजीवनमेव सुखदुःखमयं प्रस्तौति, प्रकृतिसौन्दर्यमत्र भूमिकारूपं धत्ते । वसिष्ठाश्रमः, गजरूपः प्रियंवदगन्धर्वः, अजप्रबोधने प्रभातकालः, दशरथस्य मृगया, रामस्य दण्डकाप्रत्यागमनम्, रामपरित्यक्ता अयोध्यानगरी – इत्येते विषयाः प्रकृतिसौन्दर्यवर्णने कालिदासस्याप्रतिमां प्रतिभामुद्घोषयन्ति । सर्वत्रैवै-तानि वर्णनानि मूलकथापरिपोषकाणि रसोद्बोधपरतन्त्राणि, अकाण्डे प्रथन-दोषरहितानि – इत्यतो महाकवेरौचित्यबोधोत्कर्षं स्फुटं प्रमाणयन्ति । रघुवंशप्रमाणकं हि आद्यं-महाकाव्यलक्षणमित्यस्मदभिप्रायः । यदुक्तमाचार्येण दण्डिना—

इतिहासकथोद्भूतमितरद्वा सदाश्रयम् ।
चतुर्वर्गफलोपेतं चतुरोदात्तनायकम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः ।
उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि ॥
अलंकृतमसंक्षिप्तं रसभावनिरन्तरम् ।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः ॥
(काव्यादर्शे १, १५–१८)

इत्यादि–तत्सर्वं रघुवंशमादर्शीकृत्य कल्पितमित्यनायासं प्रतीयते ।

यथाचेतनप्रकृतिवर्णने तथैव चेतनानां भावप्रतिपादने कालिदासस्य शक्तिः सूक्ष्मेक्षिका च विस्मयकरी । सद्गुणाकरभूतानां रघुकुलोत्तंसानां राज्ञां वर्णने कवेरियं शक्तिस्तत्र तत्र विजृम्भते । प्रजायै गृहमेधिनां रघूणामन्यतमस्य दिलीपस्य पितॄणां स्वधालोपशंकिनो यद्रूपं कविः प्रस्तौति तद्धि चिराय सत्पुत्रत्वस्य महोपमानं संजातम् । गुरोराज्ञया सपत्नीको राजा नन्दिनीसेवायामात्मानं निश्छलं योजयति । गोसेवाया ईदृशं मधुरमुदात्तं च वर्णनं काव्यान्तरेष्वत्र वान्यत्र वा दुर्लभमेव ।

'ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला
बिभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम्'

इत्येवंरूपा प्रीता कामदुघा नन्दिनी

'पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ॥'

गोभक्तिर्हि भारतीयानामार्याणां प्रथमो धर्मः । तत्पालने नियुक्तोऽसौ राजा गोभक्तेः सार्वजनीनं कल्याणकरत्वं प्रदर्शयति । निकुम्भमित्रेण कुम्भोदरेण राज्ञो या परीक्षा कृता सापि महोदात्तत्वमस्य राजचक्रवर्तिनो व्यंजयति । यो हि संवादः सिंहदिलीपयोर्भवति सोऽपि नितरामुदात्तः । सिंहोक्तयः सर्वाः सयुक्तिकाः । न कोऽपि सामान्यो राजा गवार्थं तादृशे व्यतिकरे विचारमूढ इव 'एकातपत्रं जगतः प्रभुत्वं' हातुमुद्युज्जीत, सिंहोपदेशं च—

'—तद्रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम्
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥—'

सपदि स्वीकुर्वीत । परं न दिलीपः सामान्यो भूपालः । क्षत्रियस्य यथार्थं स्वरूपं शिवानुचराय निवेद्य तमात्मदेहनिष्क्रयेण नन्दिनीमोचनमसौ प्रार्थयते, वक्ति च – 'किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु ।

प्रसङ्गेऽस्मिन् दिलीपस्य मनोगतांन् भावान्निपुणं प्रतिपादितवान् कविः । सिंहेनाक्रान्तां नन्दिनीं रक्षयितुमसमर्थोऽसौ राजा 'स्वतेजोभिरदह्यतान्तर्भोगीव मन्त्रौषधिरुद्धवीर्यः' । परस्ताच्च यदा शिवप्रसादादेवं संजातमिति ज्ञातं तदैव 'प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ।' एष एव सदभिमानो वीर्यवतां स्वरूपलक्षणम् ।

एवं हि प्रतिराजवर्णनं तत्तद्राज्ञो महत्त्वनिदानं निपुणं सरसं च वर्णितवान् कविः । रघुकौत्ससंवादे तयोः संभाषणम्, ब्राह्मणस्य निर्वेदः, रघोरौदार्यपूर्णः संकल्प इत्येतत्सर्वमेव कवेर्लोकावेक्षणशक्तेरुद्भूतां निपुणतामुच्चैः प्रमाणयति । न केवलमुत्साहप्रकृतिका एव रसा यावद्रतिशोकक्रोधप्रकृतिका अपि रसाः कविना निपुणं तत्तद्विभावानुभावव्यभिचारिसंवलनेन यथास्थानं प्रतिपादिताः । सीतापरित्यागकाले शोको हि काष्ठां स्पृशति । तथापरित्यक्तां सीतां दृष्ट्वा महामुनेः कारुण्यमूर्तेर्वाल्मीकेरुक्तिरहो स्नेहविषादगम्भीरा–

उत्खातलोकत्रयकण्टकेऽपि सत्यप्रतिज्ञेऽप्यविकत्थनेऽपि ।
त्वां प्रत्यकस्मात् कलुषप्रवृत्तेरस्त्येव मन्युर्भरताग्रजे मे ।।

अत्रास्माभिरेवं प्रकारेण केवलं स्थालीपुलाकन्यायेन कतिचिदुदाहरणान्युल्लिखितानि । न केवलं रघुवंशे मेघदूतकुमारसंभवयोरपि कवेरीदृशं लोकोत्तरवर्णनानिपुणं कविकर्म प्रतिपदं बलादाकर्षति चेतः सहृदयानाम् । ऋतुसंहारेऽपि कवेरादिभूतायां कृतौ कविदृष्टेस्तद्विलक्षणत्वं विद्यत एव परं तत्र तस्याः स परिपाको न दृश्यते यः खल्वितरकाव्यत्रये प्राधान्येन स्फुरति।

(४)

सार्वभौमोऽपि कविः स्वदेशस्यैतिह्येन समाकृष्टहृदयो भवत्येव । पूर्वमुक्तमस्माभिः काव्यं सभ्यतायाः सार्थक्यं प्रमाणयतीति । संस्कृतिसमृद्धा हि सभ्यता काव्यप्रवृत्तिं त्वरयति । सभ्यतापयसः सारभूतं नवनीतमेव संस्कृतिः । यत्किञ्चिन्महदुदात्तं च मानवानां भावनायां व्यवहारे च दृश्यते तदेव कालपर्ययेण भूखण्डविशेषेषु रूढमूलं सत् तत्क्षेत्रनिवासिनां चारित्रिकं वैशिष्ट्यं द्योतयति । संस्कृतिरेव मानवसमाजस्य जीवनाचारविध्योस्तद् वैशिष्ट्यम् ।

कवेरन्यतमं महत् कर्म संस्कृतेरुदात्तरूपस्य तथा प्रतिपादनं यथा तन्मानवमात्रस्य हृदये दृढमूलं सम्पद्येत । भारतीयः कविर्देशस्यास्य संस्कृतिं काव्यमार्गेण स्वदेशवासिभ्य उपाहरिष्यतीति स्वाभाविकमेव । कालिदासेनैतत् कर्म सुष्ठुतमं संपादितम् । सकलज्ञानमूलाधारेषु वेदेषु रामायणमहाभारतयोश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवनविधेर्यन्महत्तमं रूपं वरीवर्ति तदेव भारतीयजीवनविधेर्विशिष्टं स्वरूपम् । वर्णाश्रमविभक्तं मोक्षपरमं जीवनमेव स्वकीयेन महामहिम्ना वाल्मीकिवेदव्यासयोर्ग्रन्थरत्नयोर्दीप्यते । कालिदासः स्वपूर्वभाविनामार्षकल्पनामण्डितमानवजीवनानां कवीनां श्रेष्ठः शिष्योऽस्त एवास्य काव्येषु तदेव जीवनं विलसति यद्भारतभूमेश्चिरन्तनम् ।

एष एव कवेर्महिमा यदसौ भारतीयजीवनं स्वकालिकमपि वर्णवैचित्र्येण तथा समुद्भासयति यथा तत्कालान्तरेऽपि सर्वजनाकर्षकं विराजते । महत्त्वस्य यत्सार्वकालिकं सार्वभौमिकं च तत्त्वं तेनानुप्राणिता एव मानवाः कालिदासकाव्येषु वर्ण्यत्वं गताः । यया रीत्या मर्त्यमिदं जीवनं श्लाघ्यं दिव्यानुभावभास्वरं च संजायते सा रीतिरत्र प्रदर्शिता । कविवर्णिताः सर्व एव मनुष्याः स्वस्वकर्तव्यपालनेन, धर्मार्थकामानां यथास्वं विभज्य सेवनेन, मोक्षप्राप्तिसत्प्रयासेन च ऐहलौकिकं पारलौकिकं चाभ्युदयं भजन्तो दृश्यन्ते । ऐहलौकिकं जीवनमनुपेक्ष्यापि मनुष्यः कथं दिव्यानुभावसंस्पर्शेन तत्सार्थकं कर्तुं प्रभवतीत्येतस्य धर्मशास्त्रसंगत एव मार्गः कविना रसपेशलया रीत्या समुन्मीलितः । कालविशेषस्य सर्वमेव महत्तमं वस्तुजातं कालिदासस्य काव्येषु चिरकालिकं सौन्दर्यमण्डितं च स्वरूपं धत्ते – इत्येतदेव कवेः कालिदासस्य तत्काव्यानां च कालविजयित्वे हेतुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेघदूतसमुन्मेषः

डा० भास्कराचार्यः त्रिपाठी

कमनीयकाव्यकाननकेसरी कविताविलासः कालिदासः सहृदयानां हृदयव्यूहमान्दोलयन् भूयसा पूज्यमानः साहित्यजगति विजयते । यानि यानि कविवरेण्येन काव्यानि निरमायिषत, प्रतिनिधिभूतानि सम्पृक्तवागर्थसंवलितानि तानि सम्प्रत्यपि कविभिरुपजीव्यन्ते चर्व्यन्ते च यशोमरीचिकया समं चतुरसूरिचक्रवालैः । अथ को हेतुः यत्संस्कृते पुरातनकालिदासः आङ्ग्ले पुराणः शेक्सपियरः, प्राचीनहिन्द्यां प्राग्भवः तुलसी, अर्वाचीनहिन्द्याञ्च प्रथमः प्रसादकविरेव श्रेष्ठप्रतिनिधयो भवन्ति ? मन्ये, भाषायाः जीवनस्य च प्रथमयौवनोद्भेदसम्मदं नान्यः कश्चिदुन्मादः पराजयते । अतएव अग्रगण्या गीतिः ऋतुसंहारः, आदिमं दूतखण्डकाव्यं मेघदूतम्, आदिममहाकाव्ये कुमारसम्भवरघुवंशौ आदिप्रौढनाटकानि च शाकुन्तलपुरस्सराणि सर्वाणि कालिदासमेव कविकुलगुरुपदवीमारोपयन्ति ।

यथा ऋतुषु मन्दं माकन्दमाधुरीधुरीणो वसन्तः प्रविशति तथैव कविपुङ्गवस्यापि चेतसि विरहविजृम्भामयी कापि सुकुमारमेघदूतरूपा कल्पनाकलिका समुन्मिमेष । सुविदितमेव विदुषां यद् ऋग्वेदे पणीन् प्रति सरमा सन्देशवाहिनी प्रहिता । वाल्मीकिरामायणे सीतां प्रति हनुमान्, महाभारते दमयन्तीं प्रति राजहंसः, श्रीमद्भागवते च कृष्णपार्श्वे रुक्मिणीप्रणयदूतो द्विजराट् विसृष्टः । तेषामेव सरणिः कविशिरोमणिना मेघदूतेऽनुसृता स्यात् । कतिपये पूर्वप्रभावाः विशेषतः सीताहनुमद्वृत्तान्तेभ्यः अधोलिखिताः स्युः ।

भासस्याभिषेकनाटके हनुमानशोकवनिकायां प्रथमसम्बोधने प्राह – 'जयत्वविधवा' । मेघदूतेऽपि प्रथमसन्देशवाक्यं 'भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहमित्यस्ति । पुनश्च 'इत्याख्याते पवनतनये मैथिलीवोन्मुखी सा' यक्षी समपेक्षिताऽऽस्ते । कालिदासेन यक्षो जनकतनयास्नानपुण्योदकेष्वेव वसतिं कुर्वाणो वर्णितः । व्योममार्गोत्पाती मेघो हनुमत्तुल्यामेव सृतिमुरीकरोति । वाल्मीकिरामायणे पवनात्मजो विश्रान्त्यै मैनाकपर्वतमशिश्रियत् किष्किन्धा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

काण्डवर्त्तिनि वार्षुके वातावरणे च – 'समुद्वहन्तः सलिलातिभारं बलाकिनो वारिधरानदन्तः, महत्सुश्रृङ्गेषु महीधराणां विश्रम्य विश्रम्य पुनः प्रयान्ति ।' तथैव मेघदूतेऽपि 'खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्ता'ऽस्ति मेघः । वाल्मीकिर्वक्ति 'नभो मेघैः संवृतं गिरिसन्निभैः ।' कालिदासेनापि च 'अद्रेः श्रृङ्गं हरति पवनः किं स्विदित्युन्मुखीभिः' सिद्धाङ्गनाभिः शंक्यमानो वारिदः प्रादर्शि । परम्परायां लङ्काप्रवेशकाले लघुरूपमापद्यते प्राभञ्जनिः । तथैव मेघोऽपीतः प्राबोधि–'गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः' इति । सीतायाश्चूडामणेरभिज्ञानमिव यक्षोऽप्याशंसते- 'साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि, प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः ।'

सादृश्यैरेभिर्विद्वांसो हनुमद्वृत्तान्तमेव मेघदूतोपजीव्यमाम्नासिषुः । किन्तु विदाङ्कुर्वन्तु कुड्मलितलोचना मनीषिणः—क्व पटुकरणवन्तो हनुमदादयो दूताः क्व च धूमज्योतिः सलिलमरुतां सन्निपातो मेघः ? कीदृशी भावना-सीमा सुकोमलोन्मादिनो विरहरागस्य । अतः मन्ये सन्देशवाहिता वारिदस्य हनुमत्तुल्याऽभूत् किन्तु कालिदासकल्पनांकुरणं वाल्मीकेः प्रसङ्गान्तरादेव स्यात् । तदितः प्रस्तूयते । उदन्वन्तमुत्तीर्य रुरोद विरही रामचन्द्रः

'शोकश्च किल कालेन गच्छता ह्यपगच्छति,
मम चापश्यतः कान्तामहन्यहनि वर्द्धते ।
न मे दुखं प्रिया दूरे न मे दुखं हृतेति वा,
एतदेवानुशोचामि वयोऽस्या ह्यतिवर्त्तते ।
वाहि वात यतः कान्ता तं स्पृष्ट्वा मामपि स्पृश,
त्वयि मे गात्रसंस्पर्शश्चन्द्रे दृष्टिसमागमः ।
कदा नु खलु मां साध्वी सीता सुरसुतोपमा,
सोत्कण्ठा कण्ठमालम्ब्य मोक्ष्यत्यानन्दजं पयः ॥

भावश्चायमनूदितो यथा प्रसङ्गं कवीश्वरेण—

आलिंग्यन्ते गुणवति मया ते तुषाराद्रिवाताः,
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥'

यथा रामो वातं प्रार्थयते तथैव यक्षः पयोदं ववन्दे । मेघस्तु कामरूपः । स्वेच्छा-रूपधारी कामोद्दीपयितेति बुध्यतामधःपंक्तिध्वनिः—

'सन्तप्तानां त्वमसि शरणं, तत्पयोद ! प्रियायाः,
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य ।'

कामोद्दीपके दूतकर्मारोपः तुल्यमेव सन्देशकाव्यकर्तृभ्यां कालिदासघटकर्पराभ्यां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतः, तथाहि—

'मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः,
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ।'

इति मेघदूते यक्षेण, घटकर्परकाव्ये च 'निचितं खमुपेत्य नीरदैः, प्रियहीनाहृदयावनीरदैः ।१।', प्रोषितप्रमदयेदमुच्यते सन्देशवाक्यम्—'निर्गतोऽसि शठ ! मासि माधवे, नोपयासि शयितेऽपि माधवे ।२१।'

कालिदासस्यैव रीतिमनुसृत्य पश्चात् पञ्चाशत्प्रायसंख्याकानि दूतखण्ड-काव्यानि रचितानि, येषामधिकांश - समुद्गमो जैनवंगरामकथासम्प्रदायेभ्यो बभूव । नेमिचन्द्रपान्थपवनादिदूतपरम्परायाम् आधुनिककविः मालवमयूरपत्रिका-सम्पादयिता जूतादूतमपि व्यररचत् । एषा स्नेहमेदुरा विरहसन्दिष्टिः संस्कृत-हिन्दीकृष्णकाव्येऽपि उद्धवसन्देश - रूपेण, भ्रमरगीतमाध्यमेन, यशोदातः पान्थ-सन्देशरूपेण च निबद्धा । यथा भोलानाथकविकृते पान्थदूते गोपिका काचित्—'कृष्णं तज्जलनीलपेशलतनुं स्मृत्वापतन्मूर्च्छिता ।३।' तथैव रत्नाकरस्यापि हिन्दी-कवेः कृष्णो राधाधम्मिल्लविधुरितं सुगन्धि कह्लारमाघ्राय मूर्छाच्छन्नो भवति ।

वस्तुतोऽथ प्रकृतिप्रेमप्रतिभाविशेषादयो हि कालिदासस्य कविचक्रचक्रवर्त्ति-गुणाः ये समग्रनैपुण्यसंवलनया मेघदूतं मूर्ध्नि साहित्यस्य व्यदधुः प्रकृतेः तल-प्रशंसकोऽयं कवीश्वरः । न नागरी कृत्रिमता यथार्थसृष्टिसारस्यमाप्नोति इति मन्वानोऽयमभिज्ञानशकुन्तले प्राह—'दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ।' मध्येऽरण्यानि स्वैरं जरीजृम्भमाणा मृदुलतान्ता लतान्ताः यां सौन्दर्यभरभरितां विभां बिभ्रति, न तामिमाः नलप्रणालिकासिक्ताः चञ्चत्कर्त्तरीकर्त्तननियमिता नागरवाटिकाव्रततयः स्प्रष्टुमपि शक्ताः । क्व कृत्रिमधूपागुरुगन्धीनि शुष्ककुट्टिमानि क्व चाधिमेघदूतं वर्षाहितुको दग्धारण्येषु सन्तप्तार्द्रभूमेः सद्यःसीरोत्कषणसम्भवो नासिकाप्यायी सुगन्धः—

दग्धारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः,
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ।'

सर्वातिशायिप्रतिभया कालिदास एव जानाति म्लायत्कान्ति समुदयदनङ्गानां दयनीयदयितानां वैरहीम् । 'उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां, मद्-गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा' इति विरहिणीनां गुप्तमनोविज्ञानं कथं सुष्ठु प्रकटितमस्ति । शकुनसमये सर्वैः कविभिः नेत्रबाह्वोः वर्ण्यते स्फुरणं, किन्तु धन्यः सूक्ष्मदर्शी कालिदासः यस्य कामक्षीबाया यक्षपत्न्याः शकुनायिता मसृणा श्रोणी पुस्फोर ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

'सम्भोगान्ते मम समुचितो हस्तसंवाहनानां,
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ।

कृतार्थाः संस्कृतरसज्ञा ये 'मेघे माघे गतं वय' इति कथयन्तो मस्तिष्क-बुभुक्षायै माघकाव्यं हृत्पिपासायै च मेघदूतमनुशीलयन्ति । विश्वस्मिन्नपि निखिलेऽमेरिकाँऽऽग्लजर्मनलैटिनचीनतिब्बतसिंहलानां साहित्यमाधुरीमधुव्रता विद्वांसोऽनूद्य मेघदूतमास्वादयन्ति । एतामेव महाकवि - कालिदासकृतिं मोनफ्रेचमहोदयो विश्वस्य सर्वश्रेष्ठां कृतिमाह ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयपुरीय-शतक-काव्य-परम्परा

प्रभाकर शास्त्री

'कति सन्ति शतककाव्यानि जयपुरीयैः विद्वद्भिः संलिखितानि'-'कदा चास्याः शतकपरम्परायाः प्रारम्भ'-इति प्रश्नद्वये समुपस्थिते क्रमेणोत्तरमुपस्थापयिष्यते। जयपुरनगरस्य संस्थापनात् पूर्वमपि लिखितानि द्वित्राणि शतककाव्यानि। यद्यपि तेषां काव्यानां श्लोकसंख्या शतोत्तरास्ति, तथापि तेषां शतककाव्येष्वेव परिगणनं विधीयते विद्वद्भिः। एवं काव्यानामेकविंशतिः प्राप्यते, यस्या महत्त्वपूर्णं योगदानं स्वीक्रियते जयपुरस्य संस्कृतसाहित्येतिहासे। तेषां परिगणनं तावत् क्रियते–

संख्या	शतकनाम	रचयिता
१	भावविलासः	रुद्रन्यायवाचस्पतिः
२	राजरीतिनिरूपणम्	दलपतिरायः
३	सौन्दर्यलहरी	भट्टः शिवानन्दोगोस्वामी
४	शृंगारशतकम्	भट्टो जनार्दनो गोस्वामी
५	वैराग्यशतकम्	"
६	सुन्दरीस्तवराजः	कविकलानिधिः श्रीकृष्णभट्टः
७	अभिलाषशतकम्	केवलरामो ज्योतिषरायः
८	माधवसिंहार्याशतकम्	श्रीश्यामसुन्दरो लट्टूपाख्यः
९	श्रीकृष्णलीलामृतम्	कविभोलानाथः
१०	संस्कृत श्लोकशतकसंग्रहः	श्रीनारायणो भट्टः पर्वणीकरः
११	काव्यविभूषणं शतकम्	"
१२	वसन्तशतकम्	सदाशिवः शास्त्री
१३	गोपालशतकम्	"
१४	रामसौभाग्यशतकम्	दाधीचो गोपीनाथः
१५	आर्यालंकारशतकम्	श्रीकृष्णरामो भट्टः (राजवैद्यः)
१६	सारशतकम्	"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

१७	पलाण्डुराजशतकम्	श्रीकृष्णरामो भट्टः
१८	लोचनोल्लासः	श्रीहरिवल्लभो भट्टः (कविमल्लः)
१९	गौर्यालंकाराः	,,
२०	कान्तावक्षोजशतोक्तयः	,,
२१	अन्योक्तिशतकम्	श्रीहरिशास्त्री दाधीचः

भावविलास काव्यम्

महाराजस्य माधवसिंहस्य (प्रथम) मानसिंहानुजस्य परतः महाराजो भावसिंहो राजधानीमम्बापुरीं शशास । श्रीमतः सेवायां सभासद्रूपेणासीत् 'रुद्रन्यायवाचस्पतिनामा वंगदेशीयो विद्वान् । महाकवेरस्य पितुर्नाम 'विद्याविलास' इति विश्रुतम् । भावविलासस्य समाप्तौ पद्यमिदं सूचयति किमपि परिचयादिकम्—

"विद्याविलासपुत्रस्य न्यायवाचस्पतेरियम् ।
काव्यालापविदग्धानां मुदं निर्मातु निर्मितिः ।।" १३६

भाव-विलासात्मकं काव्यमिदं मुक्तककाव्यकोटौ गण्यते विद्वद्भिः । काव्येऽस्मिन् महाराजस्य भावसिंहस्य प्रशंसा १३६ श्लोकैः वर्णिता महाकवेः काव्यशास्त्रीयां विद्वत्तां प्रकटीकरोति । हिन्द्यां सुप्रसिद्धस्य महाकवेः सूरदासस्य नन्ददासस्य वा "भ्रमरगीतस्य" छाया अमुष्मादेव काव्याद् गृहीता स्यादित्येवं प्रतिभाति । अन्योक्तिचलंकारस्य प्राचुर्यं दर्शनीयमिति मत्वा पद्यमेकमुदाह्रियते—

"पीतमत्र मधु यापिता क्षपा भृंग ! सर्वमचिरेण विस्मृतम् ।
हीयमानसुषमां हिमागमे पद्मिनीं यदिह नावलोकसे ।।" ४२

न केवलं भ्रमरमुद्दिश्यैव कथयति कविः, परं हंसं, मेघं, सामान्यपुरुषान् प्रति निगदितं कविना । कविः स्वयं स्वीकरोति काव्यस्यास्य 'अन्योक्तिमयत्वम्' । यथोक्तं तेन तत्रैव—

"अन्यान्यदेश-विनिवेशविदग्ध-बुद्धिः श्री**भावसिंह**-नरसिंहनियोगयोगात् ।
संपादितो विविधभावविकासभाजां प्रीत्यै भृशं भवतु **भावविलास** एषः ।।" १३४

यद्यपि वर्तन्तेऽस्मिन् शताधिकानि पद्यानि, परं काव्यमिदं शतकश्रेण्यामेव परिगण्यते विपश्चिद्भिः । प्रकाशितं चेदं काव्यमालाया द्वितीये गुच्छके निर्णयसागरयन्त्रालय—बम्बईतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजरीतिनिरुपणम्

राज्ञो भावसिंहस्य पौत्रस्य मिर्जाराजेतिविरुदस्य राज्ञो रामसिंहस्य (प्रथम) सभायामासन् बहवो विद्वांसः[1] । कृतेरस्याः प्रणेता श्रीदलपतरायनामा कोऽपि विद्वान्, यस्य च परिचयादिकं न ज्ञातमद्यावधि । कृतिरियं केवलं प्रकटीकरोति यदयं महाभागः मुगलशासकैः सार्द्धमुवास । ततश्च केनापि कारणेन राज्ञो रामसिंहस्य सभामलंचकार ।

राजस्थान-प्राच्य-विद्याप्रतिष्ठानस्य प्रधानकार्यालये जोधपुरनगरे विद्यमानस्य श्रीमतः लक्ष्मीनारायणगोस्वामिनः सविधे मया दृष्टः 'गुटकाख्यः' प्राचीन-हस्तलेखानां संग्रहात्मको ग्रन्थविशेषः । श्रीदलपतिरायेण रचिता कृतिद्वयी प्राप्यते तत्र–(१) चकत्ता पातशाही की परम्परा (२) राजरीतिनिरूपणञ्च । कविना भूमिकायां लिखितं यन्मया ये द्वे रचने प्रस्तुते, तयोः सामग्री "अदावस्सहलतीन" "मिफ्ताहुज्जबाबिन"–इतिनामकाभ्यां यवनग्रन्थाभ्यामुद्धृता–तस्याश्च परिवर्तनादिकं विधाय संस्कृतमाश्रित्य रचितमिदं राजरीतिनिरूपणाख्यं शतकमिति[2] । केचन श्लोकाः प्रस्तूयन्तेऽत्र–

गोपीवल्लभ – पादाब्जद्वन्द्वमाधाय चेतसि ।
वच्मि राजविधिं म्लेच्छपरिभाषानुकल्पितम् ।। १
क्वचिद्रूढेः क्वचित् कोशात् क्वचित् स्वानुभवात् पुनः ।
नामलक्षण – संस्थेयमधिकाराधिकारिणम् ।। २

यथा–'वजीर' 'प्रधान' 'दीवान' इत्यस्य—

"आयद्वाराधिकाराः स्युर्यदायत्ताः महीभुजः ।
अमात्यं मन्त्रिणं विद्धि प्रधानं सचिवं हि तत् ।।" ४

---

१ अवलोकनीयम् विषयमिममवलम्ब्य मया हिन्द्यां लिखितो लेखः पिलानीतः प्रकाशितायां "मरु भारती" त्रैमासिकशोधपत्रिकायां (१३।१ अप्रैल १९६५) प्रकाशितः ।

२ "श्रीदलपतिराय और उनकी रचनायें" शीर्षकेण लिखितो लेखः (हिन्द्यां) "समन्तभद्राश्रम" वीर सेवा मन्दिरस्य द्वैमासिके मुखपत्रे "अनेकान्त" इत्याख्ये अगस्त १९६४ अंके प्रकाशितो बभूव । सोऽपि २१ दरियागंज दिल्ली ६ संकेते लब्धुं शक्यत-इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

'नाजिर'—

"योऽवरोधस्य कृत्यानि गुप्त्यादीनि विचेष्टते ।
महत्तरं विजानीयात् तं प्रतीतं जितेन्द्रियम् ।।" ११

'काजी'—

"आचारव्यवहारेषु प्रायश्चित्तेषु योजनात् ।
प्रवर्त्तयेन्मान्यतमो धर्माध्यक्षः प्रकीर्तितः ।।" २५

'अलहृखिदमत' इत्यस्य परिभाषादिकं विविच्य शालाभेदा निरूपिताः । यथा–'गुसल्लखाना' इत्यस्य–

"आपङ्गनोद्वर्तनानि सचरोपस्करं जलम् ।
यत्र तन्मज्जनगृहं राजरीतिज्ञ-भाषया ।।" ३६

ततश्च देशविभागाः, तेषामधिपतयः–सूबा, सिरकार, परगना, मौजे, दयार, मजमूएदार––इत्यादीनां निरूपणं वर्तते । 'मजमूएदार' एव 'मजूमदार' इत्याख्यया प्रसिद्धाः सन्ति । यथा—

"राजवेतनदानांशान् ग्रामार्प्ति दशवार्षिकीम् ।
लिखित्वा धारयेद्यस्तु लेखसंग्राहको मतः ।।" ६३

एवमेव 'परगनाधिकारिणां-करोडी, कोतलकरोडी, पोतेदार, खजांची वकायै निगार, तहसीलदार, कोतवाल, फोजदार, इत्यादीनां परिभाषा वर्तन्ते । यथा–'पोतेदार' इत्यस्य–

"राजद्रव्यं प्रजादत्तमाददीत परीक्ष्य यः ।
धनिको निक्षिपेत् पश्चात् कथितः प्राप्तधारकः ।।" ६७

उपसंहाररूपेण च पद्यद्वयं लिखितं, यथा–

"इत्यादयोऽधिकाराः स्युः प्रायशश्चक्रवर्तिनाम् ।
सम्पत्तेरनुसारेण त्वन्येषां विद्धि भूभुजाम् ।।
एषा पद्धतिराख्याता राजरीति बुभुत्सया ।
गभीराद्राजसेवाब्धेर्द्रोणपाकाच्च सिक्थव ।।" १०६

इति यवनपाठ्यानुकृत्या राजरीतिनिरूपणं नाम शतकं विरचितं दलपतिरायेण "इति शुभं भवतु ।"

सौन्दर्यलहरी

भट्ट शिवानन्दगोस्वामिना विरचितेयं लहरी अनूपपुस्तकालये, बीकानेर नगरे वर्तते । शतकस्यास्याधारो वर्तते श्रीमच्छंकराचार्य–विरचितो ग्रन्थः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौन्दर्यलहरीति। सूचनेयं दत्ता श्रीमता फाल्गुनगोस्वामिना बीकानेरनिवासिना ग्रन्थलेखकस्य वंशजेन। मया च नावलोकिता प्रत्यक्षरूपेणेतिकृत्वा विवेचनमसम्भवं मत्वा विरम्यते।

श्रृङ्गारशतकम्

सवाई जयसिंहद्वितीयस्य सभायामासन्ननेके महाकवयः, तेषु 'जनार्दनभट्टगोस्वामिनो नाम विश्रुतमासीत्। सोऽयं भट्टशिवानन्दगोस्वामिनो मध्यमभ्रातासीत्। 'सभेदार्यासप्तशत्यां' भ्रातृजेन श्रीनिकेतनगोस्वामिना श्रीमतां विषये पद्यमेकं प्रस्तुतम्–

"नानामुनिमतगहनस्तन्त्राणां यत्र राद्धान्तः।
तस्यानुजः सुमेधाः जनार्दनाख्यो वरीवर्ति॥" १८

"वंशावली" ति प्रसिद्धे ग्रन्थे रामकृष्णगोस्वामिना लिखितम्–

"तस्यानुजो मनुजनाथसमर्चितांघ्रिः निःशेषतन्त्रबहुमन्त्रविधानविज्ञः।
धर्मैककर्मकुशलः श्रुतितत्त्वदर्शी ज्यायान् जनार्दन इति प्रथितो विभाति॥"१०

रचनात्मके कार्ये श्रीमतां चत्वारो ग्रन्था वर्तन्ते, तेषु–(१) श्रृंगारशतकं (२) वैराग्यशतकञ्च शतककोटयां परिगण्येते। 'श्रृंगारशतकन्तु' काव्यमालाया एकादशके गुच्छे प्रकाशितं बभूव। तथापि काव्यमालाया दुर्लभत्वादत्र विविच्यते–

महाकवेः भर्तृहरेः सुप्रसिद्धस्य 'श्रृंगार-शतक'स्य छायात्र वर्तते। मुक्तकपद्येषु स्त्रियः प्रियतमा-प्रणयिनी-परकीया-नवोढादिरूपेण प्रस्तुतीकृत्य रसराजं श्रृंगारं प्रत्यक्षवदुपस्थापितं गोस्वामिना जनार्दनेनात्र। नवोढाया मानसिकीं स्थितिं चित्रयन् प्रस्तौति तस्या व्याकुलताम्, यथा पतिमिलनकामा परिभ्रमति गृहाभ्यन्तरे–

"कदाचिदारोहति सौधमुन्नतं कदाचिदायाति धरातलं पुनः।
कदाचिदास्यं विनिवेश्य जालके प्रियं नवोढा तु सलज्जमीक्षते॥"

उपसंहारात्मकं पद्यं तु —

"श्रृंगारशतकमेतज्जनार्दनाख्यद्विजन्मना रचितम्।
तिष्ठतु तावद् यावत् तिष्ठति धरणीतलं सकलम्॥" १०१

वैराग्यशतकम्

भट्टोपाह्वस्य जनार्दनगोस्वामिनः द्वितीयेयं रचनाऽद्वितीया संस्कृतसाहित्ये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतिरियं राजस्थानप्राच्यविद्याप्रतिष्ठाने जोधपुरनगरे हस्तलिखितसंग्रहे (क्रमांक १२२२७) वर्तते । षोडशपत्राणि शतसंख्याकैः श्लोकैः परिपूर्णानि सन्ति। लिपिश्चास्य १९४२ विक्रमाब्दे कृता काशीनाथेन केनापि लिपिकारेण जयपुरे निवसता ।

ग्रन्थारम्भे लेखकः भगवन्तं श्रीकृष्णं स्मरति–

"कालिन्दीकलकूलकाननकृतक्रीडाकलापोल्लसद्
गोगोपालकबालकैः प्रतिदिशं सानन्दमावेष्टितम् ।
बंशीनादवशीकृत - व्रज - वधूस्वान्तं सदाह्लादकं
सद्भक्त्या समुपास्महे वयमघध्वंसैकधीरं महः ।।" १५

तेनानुभूतं यदस्मिन् संसारे स्त्रीरूपिणी माया स्वीयैरनेकविधैः रूपैः मनुष्यं संभ्रान्तं करोति । सहसैव स कथयति–

'एताः कानपि मण्डयन्ति पुरुषान् नानाविधैर्भूषणैः
एताः कानपि वञ्चयन्ति च जनान् मिथ्यावचोभिः पुनः ।
एता वै रमयन्ति कानपि वरान् भावैर्मनोजोत्कटैः
स्वात्मभ्रान्त करोषि किं बत मुधा नारीषु हार्दं हि तत् ।।" ३

भगवतः श्रीकृष्णस्य मुरारेः स्मरणेनैव संसारसागरार्णवं तरीतुं शक्यते। पुत्रादयः सर्वे सामयिकाः सन्ति । परलोकगमनावसरे न कोऽपि त्वामनुयास्यति । अत ईश्वरमेव भज रे मूढ मनः, मान्यत्र गमनं विधेहि–

"पुत्रो मित्रं कलत्रं वसु च वसुमती वेश्म वासश्चवीति-
र्नागो रत्नं रथौघः परिजननिवहो नैव यास्यत्यनु त्वाम् ।
तस्मादस्माकमेतन्मतममृतसमं सावधानः शृणु त्वं
सेवामेकां विधेहि प्रणतजनभयध्वंसधीरां मुरारेः ।।" ४

या लोके 'प्रियतमेति' ख्याता, तस्याः सत्यं वर्णनं करोति कविः–

"त्वगस्थिरुधिरामिषैः प्रचुरगुह्यमूत्रादिकैः
कृतां जलजजन्मना सकलदोषसीमां वधूम् ।
अनंगशरजर्ज्जरीकृतकलेवरः कातरो
नरो जडमतिर्मुहुः प्रियतमेति तां भाषते ।।" २४

'कालं' विवेचयता गोस्वामिना तस्मै नमस्कारा अर्पिता–यस्य महिमा लोकविश्रुतः । न कोऽपि स्थायी, यः समागतोऽस्मिन् संसारे, कालेन कवलिताः सर्वे–

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"भूपास्ते रणकर्कशा, युवतयः सौन्दर्य-सीमाश्च ताः
सद्विद्या स्ववशीकृताखिलबुधस्वांताश्च ते पण्डिताः ।
अन्ये चैव नटा विटाश्च कवयः सद्गायका नर्तकाः
ते याता यदपाङ्गपातचकिताः 'कालाय' तस्मै नमः ॥" ४६

एवं संसारस्यासारतायाः कामक्रोधादीनां षड्रिपूणां तथा च अन्येषां विषयाणां भोग्यपदार्थानाञ्च वर्णनं कुर्वन् गोस्वामी महाभागः समापयति ग्रन्थमिमम् । उपसंहारे चायं श्लोकः कृतिकारस्य नामोल्लेखनं प्रस्तौति–

'शृंगारशतके मग्नं समाकृष्य निजं मनः ।
जनार्दनेन विप्रेण वैराग्यशतकं कृतम् ॥"

इति श्रीगोस्वामिजगन्निवासात्मज-गोस्वामि-जनार्दनभट्टकृतं वैराग्यशतकं संपूर्णम् ।

सुन्दरीस्तवराजः

श्रीमच्छंकराचार्यपादानां रचनासु "सौन्दर्यलहर्याः" महत्त्वपूर्णं स्थानमस्ति । तामेवोररीकृत्य तैलंगभट्टोपाह्वैः श्री श्रीकृष्णमहाभागैः 'कविकलानिधिः' इत्युपनाम्ना विख्यातैः "सुन्दरीस्तवराज"–नामिकेयं रचना विरचिता । अद्यावधि न प्रकाशिता । श्रीमतां कविकलानिधिमहोदयानां परिचयादिकं स्वतन्त्रे शोध-निबन्धे प्रकाशितमिति नास्ति पुनः पिष्टपेषणस्यावश्यकता ।[1] भगवत्याः त्रिपुरसुन्दर्याः स्तवनं शिखनखवर्णनादिकञ्च विदुषा लेखकेन भक्तिरसप्लावितेन कृतमित्यर्थं दिङ्मात्रमुदाह्रियतेऽत्र–

"अखण्डब्रह्माण्डप्रकटनपटुर्यत्कमलम्-
रुपेन्द्रोऽभूद्दह्ष्यद्दनुजकुलसंदारणचणः ।
महारुद्रो रुद्रः सकलजगतां संहृतिविधौ
तदेतन्माहात्म्यं तव जननि ! पादाब्जरजसः ॥" २

विश्वस्य जगत उत्पादयित्री या कापि शक्तिः, भगवती त्रिपुरसुन्दरीति नाम्ना विश्रुता सेयं शक्तिरूपा भगवती ब्रह्मविष्णुमहेशादीन् सर्वानपि देवदेवान् स्वस्वकर्मसु योजयामास । एवमेवाग्रिमे पद्येऽपि लेखकः प्रणमति विनम्रतया-

---

१ **"कविकलानिधिः श्री कृष्णभट्टः तस्य सुन्दरीस्तवराजश्च" इतिशीर्षकेणलिखितः शोधनिबन्धः "सागरिका"पत्रिकायाः पञ्चमवर्षस्य द्वितीयाङ्के प्रकाशितोवर्तते**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

"कलाकेलीलोलक्वणितमणिकांचीगुणगणां
विलुप्तांगीं मध्ये, कुचभरनताङ्गीं शशिमुखीम् ।
कराम्भोजभ्राजत्सधनुरिषु - पाशांकुशवरां
समन्तात्त्वां वन्दे स्मरहरतपःसिद्धिपटलीम् ॥ ७

स्तोत्रेऽस्मिन् पद्यानां सप्तोत्तरशती प्राप्यते, परमियमपि रचना शतकेष्वेव गण्यते । भाषायाः सारल्यं, भावप्रवणता चाकर्षति स्वान्तम् । अलंकाराणाञ्च स्वाभाविकः प्रयोगः प्रमोदयति चेतः । यथा–

नराणां निष्ठायै निगमनिरतायै नयभृते
नुतीनां निध्नायै निहितनयनायै निजजने ।
निरूढायै नानाननिगदितायै नवगिरा-
नुतायै नित्यायै निभृतनिभृतायै नम इदम् ॥ १०७

सर्वान्तिमश्चायं श्लोकः अनुप्रासालंकारस्य शोभनमुदाहरणम् ।

अभिलाषशतकम्

"ज्योतिषराय" इत्युपनाम्ना सुप्रसिद्धस्य गणकराजस्य, जयपुरसंस्थापकस्य महाराजस्य सवाईद्वितीयस्य सभासदः, उदुम्बरगोत्रीयस्य भट्टब्राह्मणावतंसस्य श्रीकेवलरामस्य साहित्यिकीयं रचना "अभिलाषशतक" मद्यावधि न प्रकाशिता, केवलं हस्तलिखितरूपेणैकेव प्रतिः प्राप्यते राजस्थान-प्राच्यविद्याप्रतिष्ठानस्य प्रधानकार्यालये जोधपुरनगरे ११२०४ क्रमाङ्के । सेयं रचना शतककाव्येषु मुक्तकरचनारूपेण परिगण्यते । अस्यां कृतौ भगवतः श्रीकृष्णस्य बाल्य-लीलादीनामाकर्षकं वर्णनं, परम्परानुसारी च सूर्योदयास्तादीनां षड्तूनां स्वाभाविकरूपेणोपन्यासश्च च विहिते कविना । केचन श्लोकाः प्रस्तूयन्ते–

"पाञ्चाली-करिराज-राजवनिता-श्रीदाम-कुन्तीसुताः
सर्वे प्रत्युपकारतो व्यवहृता ज्ञातं तदुक्त्यैव तत् ।
नोपेक्ष्यो व्रजवत्सलात्मविमुखभ्रान्त्या त्वयाहं क्वचिद्
यस्मान्नाथ ! परोपकारकृतिषु ख्यातिं कथं यास्यसि ॥" १

एवमेव श्रीकृष्णस्य बालचातुर्यं प्रकटयितुं कविः लिखति–

"मातर्मां नय वीथिकासु मिलिताः क्रीडन्ति य॒ बालिशाः,
'काचस्थेन कुमार ! खेलय गृहे, नेतुं न मेऽद्य क्षणः ।
दृष्ट्वा स्वं प्रतिबिम्बमानय बहिः स्निग्धं वयस्यं द्रुतं,
नोचेन्मां नय तत्र, वाश्रुविसृजन् मुग्धो हरिः पातु वः ॥ ८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपसंहारात्मके पद्ये लेखकेन स्वनाम प्रस्तुतम्, येन कृतिकारस्य किंचित् परिचयो भवति–

"शिव-शौरिपदाब्जपूजनप्रतिभा-भाविततत्पदाम्बुजः ।
अभिलाषशतं मनोहरं कुरुते केवलरामनामकः ॥"

ग्रन्थमवलम्ब्य मया लिखितपूर्वः शोधलेखः[1] प्रकाशितश्चेति कृत्वा संक्षिप्त-रूपेणैव परिचयः प्रस्तुतः ।

माधवसिंहार्याशतकम् लट्टूपाह्वेन श्री श्यामसुन्दरेण व्यरचि काव्यमेतत् । जयपुरसंस्थापकस्य सवायीजयसिंहद्वितीयस्य कनिष्ठपुत्रस्य सवायीमाधवसिंह-प्रथमस्य शासनकाले (१७५०–१७६८ ई.) आसीदयं लेखकः ।

आर्याच्छन्दसि लिखितमिदं काव्यं[2] राज्ञो माधवसिंहस्य प्रस्तवनं, जयपुर-नगरस्य दर्शनीयानि स्थानानि, समसामयिकविदुषां च परिचयादिकं प्रस्तौति । यथा—

"श्रीमद्गणपति वर्णनम्—"
"अलिकुलमण्डितगण्डं विघ्नालिध्वान्त - मार्तण्डम् ।
सिन्दूरारुणशुण्डं कलये देवं सदा हि गजतुण्डम् ॥१॥
स्तम्बेरमास्यविम्बं भक्तप्रत्यूह-तिमिर-खरबिम्बम् ।
जगदालंबं बालं जगदम्बायास्त्वहं समालम्बे ॥२॥
भ्रमराकलितकपोलं बिघ्नव्यूहतिमिर मिहिरपालम् ॥
सिन्दूरारुण - शुण्डं देवं स्तम्बेरमाननं वन्दे ॥३॥
"श्रीमन्माधवसिंह - प्रभुचरितं मनोहारीदम् ।
आर्याशतकमुदारं कलये कलितं नृपाज्ञातः ॥४॥

ये ये विषया अत्र निबद्धाः तेषामुल्लेखः क्रियते । यथा—(१) गणपति-

---

१ "ज्योतिषराय केवलराम तथा उनकी रचना अभिलाषशतकम्" विषयेऽस्मिन् हिन्द्यां लिखितो लेखः पिलानीतः प्रकाशितायां "मध्य भारती" नामिकायां त्रैमासिकशोधपत्रिकायां (१२-३ अंके, अक्टूबर १९६४) प्रकाशितः विस्तरेण परिचयादिकः तत्रैव वर्तते ।

२ अस्य काव्यस्य मूलप्रतिः भंडारकर ओरियंटल रिसर्च इन्स्टीटयूट नाम्नि संस्थाने पुण्यपत्तननगरे (पूना) वर्तते यस्य ख्यापनं सर्वतः पूर्वं श्री पी. के. गोडे महोदयैः कृतम् । प्रतिलिपिकृता च तस्मादेव प्रतिष्ठानादत्र च प्रस्तूयते विवरणादिकम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्णनम् (२) श्रीमद्गोविन्ददेवजीकप्रभूणाँ वर्णनम् (३) श्रीमत्सीताराम-वर्णनम् (४) सरस्वतीवर्णनम् (५) अथेश्वरी वर्णनम् (६) श्रीमच्छ्री कृष्ण वर्णनम् (७) श्रीमन्महाराजाधिराजेन्द्रवर्णनम् (८) दानवर्णनम् (९) प्रताप-वर्णनम् (१०) महाराजेन्द्रकीर्तिवर्णनम् (११) जयपुर वर्णनम् (१२) राज-प्रसादवर्णनम् (१३) अन्तःपुरवर्णनम् (१४) गजवर्णनम् (१५) अश्ववर्णनम् (१६) आखेटकवर्णनम् (१७) सभावर्णनम् (१८) वसन्तोत्सववर्णनम् (१९) श्रीमन्माधवसिंहविलासाख्योपवर्णनम् (२०) जलक्रीडावर्णनम् (२१) अम्बिकापुरीवर्णनम् (२२) शिलामयीश्वरी वर्णनम् (२३) मनसादेवी-वर्णनम् (२४) ब्रह्मपुरीवर्णनम् (२५) ब्रह्ममण्डलीवर्णनम् (२६) उपसंहारः।

यथा — **श्रीमन्महाराजाधिराजेन्द्रवर्णनम्—**

"श्रीमन्माधवसिंह प्रभुवर नृपचन्द्रे समुदिते जगति ।
सत्पुण्डरीक निवहाश्चकाशिरे सर्वतोऽजस्रम् ॥३४॥
गणपालं विधुभालं कालीपालं स्वभक्तजनपालम् ।
प्रणताखिलभूपालं जगतीपालं समं कलये ॥३५॥"

सभावर्णनं तथा— "हरिहरशंकरवर्यै सचिवैरन्यैः सभोपेता ।
माधवसिंह सभा ते राजति शाक्री सभैवैषा ॥१००॥
त्रिदशसभायां चैको हरिरपि मित्रः सदाशिवोऽप्येकः ।
माधवसिंहसभायां रवयः सदाशिवाश्चित्रम् ॥१०१॥

"अथ ब्रह्ममण्डलीवर्णनम्" यथा—

"श्रीपौण्डरीकयाजि गंगारामाभिधः सूरिः ।
ऋषिरिव बभूव चास्यां पुर्यां भूदेववर्योऽयम् ॥१२२॥
तत्सूनुर्द्विजराजः श्रीरामेश्वराभिधः सूरिः ।
श्रीपौण्डरीकयाजी विराजते ब्रह्मपुर्यां यः ॥१२३॥
स जयति सम्राट् गोपीनाथः पुरे हि रुचिरे हृद्ये ।
श्रीविश्वनाथ सम्राट् पुर्यामस्यां जयत्वनिशम् ॥१२४॥

ग्रन्थेऽस्मिन् कारिकाणा संख्या १३० वर्तते, परं श्रीमन्माधवसिंहस्य वर्णनं शतसंख्याकैरार्याभिरेवोपवर्णितम् । ग्रन्थसमाप्तौ श्लोका निर्माणसमयादिकं वर्णयति । यथा—

"शालिवाहनशके शुभान्विते सप्त सप्त ऋतु-भूमि-संमिते ।
नेत्र-भूमि-करि-चन्द्रिरैर्मिते हायने शुभतरे मनोहरे ॥१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुक्लमासि शुभशुक्लपक्षके मंदवासरयुते तिथावहे ।
दन्दशूकभयुते जनहर्षव्रातदे हि शुभसंमदयोगे ।।२।।
श्यामसुन्दर इति प्रथितोऽसौ संततं प्रणतरामपदाब्जः ।
वाडवो जयपुराभिधे पुरे पुस्तकं वरमलीलिखत्सुधीः ।।३।।"
अप्रकाशितेयं रचना प्रकाशनमर्हति ।

श्रीकृष्णलीलामृतम्

महाकविना भोलानाथेन विरचिता सेयं रचना स्त्रोत्र-साहित्यान्तर्गतैव परिगण्यते यस्यां चतुरधिकशतानि पद्यानि सन्ति । श्रीमद्-भागवत-पुराणस्य दशमस्कन्धानुसारि भगवतः श्रीकृष्णस्य सरसानां लीलानामुपवर्णनमधिकं रोचते । जयपुरनगरे 'वायु-प्रासाद' (हवामहल) इत्याख्यातस्य प्रासादस्य समीपे वर्तते श्रीमद्गोवर्द्धननाथ-मन्दिरम । अस्य च प्रतिष्ठापनादिकं श्रीमता सवायीप्रतापसिंह-वर्मणा कृतमिति प्रसिद्धं कविना भोलानाथेन च लिखितम्—

'श्रीप्रतापस्य नृपतेः न्यवसत् सुखसद्मनि ।
श्रीरामस्वामिनो भर्ता गोवर्धनधरः प्रभुः ।।१०४।।"

देवमन्दिरस्यास्य निर्माणसमये श्रीरामस्वामिनामा प्रसिद्धः स्यात् कोऽपि भगवद्भक्तः पूजकश्च । अतएव श्री भोलानाथेनात्र संकीर्तितं नाम । अन्यत्रापि च

"नाम्ना श्रीरामशर्मा हरिचरणरतिप्राप्त-सत्कीर्तिकर्मा
तद्ध्यानाप्राप्तबोधोऽखिलभुवनतलप्राप्ततत्त्वाववोधः ।
प्राप्ता विद्यानवद्या हृदि यजनतया तस्य देवस्य भूम्नः
साक्षाद् गोवर्द्धनोऽसौ हरिरचलतया वर्ततां सर्वदान्तः ।। २"

आसीत् सोऽयं महाकविभोलानाथः बहुभाषाविज्ञः । संस्कृतभाषायां केवलं रचनाद्वयी प्राप्यते—(१) कर्णकुतूहलम् नाम नाटकम् (२) श्रीकृष्णलीलामृतञ्च । एतौ द्वावपि ग्रन्थौ राजस्थान-प्राच्यविद्या-प्रतिष्ठान-पुरातत्त्व-मन्दिराख्ये संस्थाने, जोधपुरनगरतः एकत्रैव प्रकाशितावभूताम् । अतः नात्र विशेषतया विविच्यते । केवलं द्वित्राण्युदाहरणानि प्रस्तूयन्ते पाठकानां विनोदाय । यथा—

कालियदमनमधिकृत्य प्रसिद्धां कथां स्वशब्दैः प्रकटयति—

"शरीरशक्त्या निःसार्य गृहीत्वाभ्रामयद् हरिः ।
क्षीणशक्तिं परित्यज्य तत्फणासु ननर्त सः ।। ३४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्त्वं तत्त्वं ततस्तत्त्वं तत्त्वतस्तत्त्वतस्तु तत् ।
ततं तेने ततं तेने मृदंगध्वानितोऽभवत् ।। ३५

ग्रंथान्ते फलश्रुत्यात्मकोऽनुष्टुप् श्लोको वर्तते यथा—

"यः पिबेत् सस्पृहं भक्त्या कृष्णलीलामृतं जनः ।
वैकुण्ठलोकं गत्वा स रमते कृष्णसन्निधौ ।। १०३"

अस्मिन् ग्रन्थे शालिनी, अनुष्टुप्, वंशस्थः, आर्या, शार्दूलविक्रीडितमित्यादीन्यनेकानि छन्दांसि वर्तन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टादशशतकोयं केरलप्रदेशीयं नाटकत्रयम्

बिहारीलाल नागार्चः

अष्टादशशतके केरलप्रदेशे राज्ञां सभासु बहवः संस्कृतपण्डिता रूपकाणां सर्जनं कृतवन्तः। अत्र निम्नलिखितानां त्रयाणां नाटकानां विवेचनं प्रस्तूयते—

१. रामपाणिवादविरचितं सीताराघवनाटकम्[1]

२- देवराजकविविरचितं बालमार्तण्डविजयनाटकम्[2]

३. अश्वतितिरुणाल - रामवर्मविरचितं रुक्मिणीपरिणयनाटकम्[3].

कविपरिचयः

रामपाणिवादेनेदं सीताराघवनाटकं विरचितम्। एष रामपाणिवादोः महान् विद्वान् कविश्चास्ति। अयं महाभागोऽष्टादशशतके केरलप्रदेशे बहूनां राज्ञां सभामलङ्कृतवान्।[4] अनेन संस्कृतप्राकृतभाषयोः बहवः ग्रन्थाः विरचिताः। तथाहि—संस्कृते—१. राघवीयम्–महाकाव्यम् २. विष्णुविलासम्–महाकाव्यम् ३. चन्द्रिका वीथी ४. लीलावती वीथी ५. मदनकेतुचरितम्–प्रहसनम् ६. मुकुन्दशतकम्–स्तोत्रम् ७. अम्बरनदीश–स्तोत्रम् ८. सूयष्टिकम् ९. भागवतचम्पूः १०. वृत्तवार्तिकम् ११. तालप्रस्तारकाव्यम् १२. रासक्रीडा प्राकृते— (१) कंसवधम् (२) उषानिरुद्धम्—उभे लघुकाव्ये। अपरं च रामपाणिवादेन कतिपयस्वकृतीनामन्येषां च कृतीनां व्याख्या विरचिताः। मङ्गलग्रामवासिनो रामपाणिवादस्य बाल्ये तस्य संरक्षकोऽम्पलप्पुलनगरस्य राजा देवनारायण आसीत्। स रामपाणिवादस्याध्यापनं कारयामास, धनराशिवितरणेन तस्य कुटुम्बं सम्भरितवान् च। पश्चात् १७५० ई० संवत्सरे त्रिवाङ्कूरस्य

---

1. Edited, S. K. Pillai, Trivandrum, 1958.
2. Edited, K. Sambasiva Sastri, Trivandrum.
3. Edited, Kāvyamālā, 40.
4. K. K. Raja, Contribution of Kerala to Sanskrit Literature, Madras, 1951. P. 183.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्ञा मार्तण्डवर्मणा विजिते देवनारायणस्य राज्ये रामपाणिवादोऽन्यत्राश्रयं जग्राह। स यथाकालं त्रिवाङ्कुरे मार्तण्डवर्मणः, वेट्टत्तुनाडे वीररायस्य, 'चेम्न-मङ्गलम्' इति पुरस्य सामन्तस्य रामकुबेरस्य, 'कुन्नङ्कुलम्' इति पुरस्य समीप-वर्तिन आर्यश्रीकण्ठरामवर्मणश्चाश्रितः सन्नेतेषां सर्वेषाममरीकरणाय स्वकीयासु कृतिषु तेषां वर्णनं कृतवान्। एतेन प्रसङ्गेन महाकवेर्लोकप्रियताभिव्यज्यते।

पाणिवाद इति केरल प्रदेशस्य अम्पलवासिजातेः नम्बियार इत्युपजातिरेव ख्यातः। पाणिवादानां व्यवसायः संस्कृतनाट्याभिनये चाक्याराणां नटानां साहाय्यमेव वर्तते। पाणिवादाः पाणिघाः वा मिलावु इति ढौलवादनेन सहायीभूता अभिनयकाले। तस्य कौटुम्बिकनाम राम आसीत्। राघव इति मङ्गलग्राम-वास्तव्यो महान् विद्वान् तस्य मामक आसीत्। अष्टादशशतकस्य मध्यभागो रामपाणिवादस्य रचनाभिः माहात्म्यं लेभे।

सीताराघवनाटकम्

सीताराघवनाटकस्याभिनयः स्यानन्दूरनगरस्थितस्य पद्मनाभ - मन्दिरस्य समीपे राज्ञः मार्तण्डवर्मणः सभायां बहुभ्यो देशेभ्यः समागतानां वेदविदां काव्यरसज्ञानाञ्च समक्षं कृत इति प्रस्तावनातो ज्ञायते।

कथावस्तु

अस्य नाटकस्य कथावस्तु रामायणात्संगृहीतमस्ति। अत्र सप्तष्वङ्केषु वस्तुप्रपञ्चः कृतः। प्रस्तावनानुसारं विश्वामित्रमुनिर्यज्ञरक्षार्थं रामलक्ष्मणौ गृहीत्वा स्वाश्रमं नीतवान्। रामस्य वियोगे दशरथः कौशल्या च दुःखमनुभवतः स्म। कौशल्या दशरथश्चान्तःपुरे किमपि मन्त्रयन्तौ स्थितौ।

प्रथमाङ्के विश्वामित्रस्य यज्ञारम्भो दृश्यते। सुबाहुमारीचमायावसुप्रभृतीनां रक्षसामुत्पात आशङ्क्यते। अनन्तरं विश्वामित्रशिष्यश्चारायणः दशरथसमीप-मागत्य सूचयति यद्रामेण ताटका सुबाह्वोर्वधः कृतः। मारीचस्ततः पलाय्य तपश्चरति। विश्वामित्रयज्ञः सम्पन्नः। राज्ञा जनकेनामन्त्रितः विश्वामित्रः मिथिलां गन्तुकामः रामलक्ष्मणावपि तत्र नयति। चारायण इक्ष्वाकुकुलोद्भवानां राज्ञां प्रतापं विश्वामित्रस्य च शक्तिं वर्णयित्वा कौशल्यादशरथावाश्वासयति। दशरथः रामोद्वाहविषयकं विश्वामित्रप्रस्तावं श्रुत्वा स्वीकरोति। चारायणोऽपि ततो गच्छति।

द्वितीयाङ्के मायावसुः रामलक्ष्मणौ हन्तुं स्वानुचरं करम्बकाभिधेयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राक्षसं मिथिलां प्रेषयित्वा तेनानीतं वृत्तं जानाति। करम्बकः मारीचप्रदत्तं मायाङ्गुलीयकमपि मायावसवे प्रयच्छति। करम्बकमुखाद्रामलक्ष्मणविश्वामित्रान् सीतास्वयंवरदर्शनार्थं मिथिलायामुपस्थितान् श्रुत्वा मायावसुः माययात्मनः दशरथ-रूपं करम्भकस्य च सारथिसुमन्त्ररूपं कृत्वा तत्र गच्छति। मायावसुः रामं धनु-र्भङ्गान्निवारयति। स विश्वामित्रं जनकञ्चावमानयति। अनन्तरं वास्तविकः दशरथः स्वपत्नीभिस्सहायोध्यातः मिथिलामागच्छति। शतानन्दमुनिः स्वयंवरस्थलं गत्वा जनकविश्वामित्राभ्यां दशरथागमनस्य सूचनां प्रयच्छति। अनन्तरं जनकवि-श्वामित्रौ पूर्वागतं दशरथवेषधारिणं मायावसुं राक्षसं निश्चित्य तमवमानयतः। विश्वामित्राज्ञानुसारं रामश्शिवधनुर्भनक्ति। रामेण धनुर्भङ्गे सति सर्वे प्रसन्ना भवन्ति। तदा नेपथ्यात्क्रुद्धस्य परशुरामस्यागमनं श्रुत्वा मायावसुः मुनिवेषं धृत्वा परशुराममतीवक्रोधज्वलितं कर्तुं विचारयति। एवं विचारयन्मायावसुः निर्गच्छति। जनकोऽपि दशरथायेदं धनुर्भङ्गरूपमुल्लासपूर्णं वृत्तं निवेदयितुं गच्छति।

तृतीयाङ्के रामस्य भ्रातृणां च सीतया तस्या भगिनीभिः सह विवाहो दृश्यते।

चतुर्थाङ्के शूर्पणखामायावस्वोरादेशेनायोमुखी विदेहनगरीं गत्वा तत्र मन्थ-राया रूपं विधृत्य रामराज्याभिषेकाय प्रवृत्तायाः कैकेय्याश्चरणयोरवपत्य रुदती कैकेयीं रामराज्याभिषेकस्य दोषानब्रवीत्। तच्छ्रुत्वा कैकेयी राज्ञः दशरथस्य समीपं गत्वा पूर्वप्रतिश्रुतं वरद्वयमयाचत—रामस्य चतुर्दशवर्षपर्यन्तं वनवास इति प्रथमो वरः, भरतस्य राज्याभिषेक इति द्वितीयो वरः। स्वपितुर्वचनं पालयितुं रामस्सीतालक्ष्मणाभ्यां सह वल्कलान् परिधाय वनं गच्छति। अनन्तरं अयोमुखी कथयति यच्छूर्पणखा रामं प्रति कामासक्ता विद्यते। अनन्तरं सीतां प्रति कामासक्तः रावणः स्वप्रतीहार्या हेमवत्या सह रङ्गमञ्चमायाति। अमात्यः प्रहस्तः विनोदार्थं रावणाय चित्रपटमेकं ददाति। तस्मिन् चित्रपटे सीतां चित्रितां दृष्ट्वा रावणस्तमालिङ्गति। इन्द्रेण प्रेषितस्तुम्बुरुनामा गन्धर्वः रावणं विनोदयितुं तत्रागच्छति। तुम्बुरुमुखाद्विराधवधं श्रुत्वा रावणप्रहस्तावतीव-दुःखमनुभवतः। अनन्तरं प्रहस्तः रावणाय निवेदयति यल्लक्ष्मणेन शूर्पणखाया नासिका कर्तिता। इदानीमेवाकम्पनः प्रविश्य रावणं सूचयति यद्रामेण खरदूषण-त्रिशिरसां वधः कृतः। रावण इदं ज्ञात्वाकम्पनेनैकं गोपनीयं समाचारं मारीच-समीपं प्रेषयति।

पञ्चमाङ्के भरतेन प्रेषितः नन्दको चरः रामस्य वृत्तं ज्ञातुं वनं गच्छति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नन्दकः वनदेवतया मन्दारवत्या सूच्यते यद्रावणनापहृतां सीतामन्विष्यन् रामः वने विचरति । अनन्तरं नन्दकः जटायोः प्रज्वलितां चितां पश्यति । तत्र गगनचारी दनुः नन्दकं सूचयति यदिदानीं रामो ऋष्यमूकपर्वते सुग्रीवेण सह निवसति । दनोस्सम्मत्या नन्दकः नन्दिग्रामं प्रतिनिवर्तते । सुग्रीवः हनुमन्तं सीतान्वेषणाय नियोजयति । रामसुग्रीवौ सीतां स्मृत्वा करुणार्द्रौ स्तः । अनन्तरं मायावसुः चारणस्य वज्राङ्गदस्य वेषं धृत्वा तत्रायाति । मायावसुः रामलक्ष्मणसुग्रीवाणामात्मघातार्थं योजनां निर्माति । मायावसुः रामलक्ष्मणसुग्रीवान् सूचयति यद्रावणेन बहुप्रार्थितापि सीता यदा तस्य पत्नीत्वं न स्वीकृतवती तदा सा रावणेन हता । सीतामन्वेष्टुं लङ्कां गतः हनुमानपि मेघनादेन हतः । स्वजनविनाशं श्रुत्वाङ्गदादिभिरपि स्वप्राणा विसृष्टा इति । रामलक्ष्मणसुग्रीवाः सीताहनुमदङ्गदादीनामिमां विपत्तिं श्रुत्वा मूर्च्छिता भवन्ति । अनन्तरं दधिमुखस्तत्रागत्य सुग्रीवं सूचयति यद्धनुमान् लङ्कां दग्ध्वाङ्गदादिकपिसैन्येन सहितो मधुवनं प्रविष्टस्तत्रत्यवृक्षानुत्पाटयति । रामलक्ष्मणसुग्रीवा हनुमदङ्गदादीनां प्रत्यागमनं श्रुत्वातीवप्रसन्ना भवन्ति । लङ्कादहनं श्रुत्वा खिन्नः मायावसुः प्रच्छन्नरूपेण ततो निर्गच्छति ।

षष्ठाङ्क एकस्मिन् प्रवेशके वनदेवताया मन्दारवत्या लङ्कालक्ष्म्याश्च वार्तालापेन सूच्यते यल्लङ्कादहनानन्तरं रावणशिल्पिन आहूय तां यथापूर्वां कृतवान् । लोपामुद्रया प्रेषिता वनदेवता मन्दारवती सीतायाः वृत्तं ज्ञातुं गगनमार्गेण लङ्कामायाति । मन्दारवती लङ्कां प्रविश्याशोकवृक्षतले समुपविष्टामत्यन्तकृशकायां सीतां पश्यति । सीतासमीपमुपविष्टे त्रिजटासरमे राक्षसैः भीतां सीतामाश्वासयतः । प्रवेशकानन्तरं त्रिजटासरमाभ्यां समाश्वास्यमाना रुदती सीता रङ्गमञ्चमायाति । अस्मिन् समये विभीषणानुचरस्सम्पातिस्तत्रागत्य त्रिजटां सूचयति यद्रामेण विभीषणः लङ्काराज्येऽभिषिक्तोऽस्ति । रामलक्ष्मणसुग्रीवाः सैन्येन सहिताः समुद्रं निस्तीर्य लङ्कां प्राप्ता इत्यपि सम्पातिना सूच्यते । अनन्तरं मन्दारवती सीतासमीपं गत्वा तस्यै लोपामुद्रया प्रदत्तमङ्गरागमर्पयति । मन्दारवतीं दृष्ट्वा सीता प्रसन्नतामनुभवति । तदनन्तरं नेपथ्याद्वानरराक्षसां युद्धं सूच्यते त्रिजटाया निर्देशेन मन्दारवती सरमा च गगनतलमुड्डीय वानरराक्षसानां युद्धमवलोकयतः । तस्मिन् युद्धे गरुडः मेघनादनागपाशबद्धयो रामलक्ष्मणयोर्बन्धनं छिनत्ति । अस्मिन् समये मायावसुः रामलक्ष्मणयोःकृत्रिमे शिरसी सीतासमीपं प्रक्षिपति । अनन्तरं नेपथ्यान्मायावसुमधिक्षिपन्ती लक्ष्मणगीश्श्रूयते । नेपथ्यात्कुम्भकर्णमेघनादयोर्वधस्समुद्घुष्यते । रावणोऽपि युद्धार्थं युद्धभूमिं गच्छति ।

सप्तमाङ्क एकस्मिन्विष्कम्भके पिशाचस्य मांसप्रियस्य तस्य पत्न्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विस्रगन्धिन्याश्च संवादेन सूच्यते यद्रामरावणयुद्धे मृतानां राक्षसादीनां रक्तवसामांसैः पिशाचाः पिशाचिन्यश्च परितुष्यन्ति । रामः रावणं हत्वा विभीषणं लङ्काराज्येऽभिषिक्तवान् । अग्नौ परिशुद्धां सीतां गृहीत्वा रामः पुष्पकविमानेनायोध्यां गच्छति । अयोध्यायां वशिष्ठेन रामस्य राज्याभिषेकः क्रियते । भरतवाक्येन साकं नाटकस्य समाप्तिर्भवति ।

अस्य नाटकस्य नेता रामः धीरोदात्तकोटिकोऽस्ति । रावणोऽत्र प्रतिनायकः । एष लोकरावण एव । नाटकेऽस्मिन्नेकचत्वारिंशत्पात्राणि सन्ति । अत्यधिकेयं पात्रसंख्याभिनयदृष्टयेति स्पष्टमेव । कतिपयपात्राणां चरित्रमत्र प्रस्तूयते—नाटकस्य सीता नायिकास्ति । एषा स्त्रीरत्नललामभूता सर्वगुणोपपन्नास्ति । एषा पतिपरायणा, गुरुजनानुवर्तिनी, सखीस्नेहशीला, कुटुम्बिजनादरभावनिर्भरा च चित्रिता । मायावसुः मायाप्रगल्भः सर्वदुर्गुणसम्पन्नः रावणस्य परमसहायकः स्वदुर्वृत्तेरविश्रान्तः लोकापहारक एव वर्णितः ।

प्रकृतिवर्णनम्

नाटककारेण यथास्थानं प्रकृतिवर्णनं कृतम् सूर्योदयसूर्यास्तसन्ध्याचन्द्रोदया अस्मिन् रूपके वर्णिताः ।यथा सूर्योदयः—

जृम्भारम्भिकुसुम्भकेसरसखैः साकूतकोकाङ्गना
दृष्टैः कैश्चन रोचिषां परिकरैः प्राची यदाचीयते ।
यच्चात्मद्युतिभङ्गभीरव इव म्लायन्ति तारा गणा
स्तन्मन्ये तरसा भविष्यति रविः पूर्वाद्रिचूडामणिः ।। ६.१

सूर्यास्तः

अस्तक्ष्माभृदधित्यकापरिगलद्धातुद्रवाद्रैरिव
प्रत्यासन्नवियोगकोकतरुणीशोकाग्निलग्नैरिव ।
आताम्रैः किरणोत्करैरवतरत्याशामसौ वारुणी-
माश्लेषव्यतिषक्तरक्तनलिनीचिह्नै रिवाह्नां पतिः ।। १.२३

चन्द्रोदयः

रात्रावुद्भ्रमता घनेन तमसा स्वीकर्तुमाकांक्षितां
सन्ध्यामेष पतिंवरामिव वधूमुद्दामरागोदयाम् ।
आसम्पूर्णकलाकलापसुभगो रक्तोल्लसन्मण्डलो
मन्ये स्वैरममूं ग्रहीष्यतितरां लब्धोदयश्चन्द्रमाः ।। १.२५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विन्ध्याचलपर्वतवर्णनम्

अत्यन्तोद्धुरहस्तिमस्तकतटीसञ्चारिपञ्चाननः
शार्दूलोत्कटवक्त्रकृष्टहरिणीरक्तावसिक्तावनिः ।
उच्छ्रायच्छुरितोडुमार्गशिखरो वैमानिकानामपि
व्योमोत्सङ्गगतागतानि कुरुते वंध्यानि विन्ध्याचलः ।। ५.६

भरद्वाजाश्रमः

रोमन्थस्फुरदोष्ठगोष्ठशयनप्रेष्ठाङ्गकण्डूयन-
क्रीडासक्तगवीनवीनशिशुकव्यावल्गितोपान्तभूः ।
हव्यद्रव्यसुगन्धिगन्धवहनव्याधूतधूमावलि-
श्यामीभूतवियत्पथो नियमिनः कस्याश्रमो दृश्यते ।। ७.१५

भाषाशैली

अस्य नाटकस्य भाषा सरला विद्यते । यत्र तत्र दीर्घसमासान्ताः पदावल्योऽपि प्रयुक्ताः । नाटककारेण भावानुरूपैव कान्ताथवा कठोरा शब्दावली व्यवहृता । भाषार्थाभिव्यक्तौ पूर्णरूपेण समर्थास्ति । कोमलभावानामभिव्यक्तिसमये सरला कान्ता च पदावली प्रयुक्ता । यथाभिषेकानन्तरं रामविषयकमिदं वर्णनम्—

पूर्णाभिषेकमङ्गल्यः पूर्णचन्द्रसमद्युतिः ।
विश्वामित्रं पुरस्कुर्वंन्नार्योऽयमभिवर्तते ।। ७.३२

वानराणां राक्षसानाञ्च युद्धवर्णने संयुक्ताक्षरप्रचुरा समासबहुला च भाषा व्यवहृता । यथा—

वल्गाघातप्रवल्गत्तुरगखुरपुटक्षुण्णभूमण्डलोत्थाः
स्त्यायन्तेऽमी परागाः ककुभि करिघटाकर्णवातावधूताः ।
येषां सन्ध्याभ्रभासामधिविततिमिथो मुक्तशस्त्रास्त्रधारा
निष्पेषे निष्पतन्तो दधति पटुतडिद्विभ्रमं विष्फुलिङ्गाः ।। ७.२७

नाटककारः गद्यलेखनेऽपि तथैव निपुणो यथा पद्यलेखने । प्राकृतभाषायामपि प्रावीण्यमस्ति । प्राकृतभाषाया बहूनि पद्यानि विद्यन्ते ।

अलङ्कारयोजना

कविना यथास्थानं शब्दालङ्काराणामर्थालङ्काराणाञ्च प्रयोगः कृतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परन्त्वलङ्कारप्रयोगा अत्र भाषाया भावस्य च सौन्दर्यं वर्धयन्ति । शब्दालङ्कारेषु कविनानुप्रासयमकश्लेषाः प्रयुक्ताः । अर्थालंकारेषूपमोत्प्रेक्षादृष्टान्तार्थान्तरन्यासापह्नुतिविषमाणां प्रयोगोऽत्र द्रष्टव्यः ।

छन्दोयोजना

कविना भावानुकूलानां छन्दसामत्र प्रयोगः कृतः । अत्र शार्दूलविक्रीडितशिखरिणीस्रग्धरावसन्ततिलकमंजुभाषिणीमालिनीप्रहर्षिणीमन्दाक्रान्तावंशस्थहरिणीपृथ्वीन्द्रवज्रोपेन्द्रवज्राप्रबोधिताशालिनीद्रुतविलम्बितस्वागतानुष्टुभादीनां छन्दसां प्रयोगः कृतः ।

सूक्तयः

सूक्तीनां लोकोक्तीनाञ्च प्रयोगेण भाषायाः प्रभावोत्पादकता वृद्धिं गता । निम्नलिखितास्सूक्तयोऽत्र द्रष्टव्याः—

१ शेषेण भारयति चक्रधरो धरित्रीं
मेघेन वर्षयति सोऽपि पतिर्नदीनाम् ।
नैशन्तमश्शमयति ज्वलनेन भास्वान्
नानन्तरं स्वविभवं प्रथयन्ति सन्तः ॥ १.६.

२ अज्ञानामनुदर्कतर्कतरलाः स्वापप्रलापोपमा
वाचः सन्तु विकारयन्ति विदुषो नैतास्तितिक्षावतः। २.१४

३ दुरुक्तं दुष्टानां कलुषयति चेतः सुमनसां
तटाकानामम्भस्तटरुहतरूणामिव रजः । २.१६

४ अभेद्यो धैर्याद्यैरपि हि बहुभिस्साधकतमै-
रपत्यस्नेहाख्यो जयति दृढबन्धस्तनुभृताम् । २.२७

५ दाक्षिण्यभाजाम्महताम्मुखेभ्यो
न जातु निर्यान्ति वचांसि तानि ।
श्रुतानि यानि व्यथयन्ति सद्यः
श्रोतुश्श्रुतीः शल्यवदुत्कटानि ॥ २.३२

६ प्रत्यग्धामनि कामचारविषयादष्टाङ्गयोगाङ्कुशे-
नाकृष्य प्रतिबध्नतामपि सतामुच्चैर्मनोवारणम्
तोकं नाम यदेकमस्ति तदलं मोहाय वस्त्वन्तरं
ब्रह्मज्ञस्य ममापि मज्जति यतश्चेतो ममत्वाम्बुधौ॥ ३.२०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

७ भर्ता कामं भवतु भवने वा वने वा वनेऽपि
प्रायेणास्तु क्वचन विषयः सम्पदामापदां वा ।
स्वच्छन्दो वा भवतु परतन्त्रोऽथवा सर्वथापि
च्छायेवैनं प्रतिलगति या केवलं सैव साध्वी ।। ३.२६

८ भाविन्येव यदृच्छयापि निपतत्यर्थे प्रभूणां मनः । ५.१२

९ किं पुनरहो दुस्साधमुत्साहिभिः ?

१० यः साधौ गुणिनि स्थितो गुणगणः श्लाघ्यस्सतां जायते
सम्पूर्णोऽपि स एव शोच्यतमतामायात्यसाधौ स्थितः ।
सान्द्रं चन्दनजन्म यन्मृगदृशां वक्षोरुहे भूषणं
पाण्डुत्वं हि तदेव हन्त भवति श्वित्रोद्भवं दूषणम् ।। ६.४४

लोकोक्तयः

१ वेत्त्यद्यापि महार्घतां कथमहो शुक्तिर्न मुक्तामणेः ?

२ न खलु माधवीलता उद्भिन्नमात्रे पल्लवानि दर्शयन्ति ।

३ महानद्यो महोदधिं वर्जयित्वा क्वान्यत्र विश्राम्यन्ति ?

४ नन्वेषानभ्रा सुधावृष्टिः ।

५ एष कपटनाटिकानान्दीप्रस्तावः ।

नाट्यकला

अस्य नाटकस्य कथावस्तु रामायणाद्गृहीतत्वात्प्रख्यातमस्ति । नाटककारेणानेकेषु स्थलेषु मूलकथायां परिवर्तनं विहितम् । अस्य नाटकस्य नायको रामो धीरोदात्तः विद्यते । अस्मिन्नाटके शृङ्गाररसस्यैव प्राधान्यं विद्यते । वस्तुप्रपञ्चनमत्र नाट्यशास्त्रनियमानुकूलमेवास्ति । नाटककारेण शास्त्रविहिता पात्रोचिता भाषैव प्रयुक्ता । कविना यथास्थानं विष्कम्भकप्रवेशकचूलिकादीनामर्थोपक्षेपकाणां प्रयोगः कृतः । संवादेष्वपि कविना स्वकौशलं प्रदर्शितम् । संवादाः प्रायशः संक्षिप्ता बोधगम्या जिज्ञासावर्धकाश्च सन्ति । अस्मिन्विषये एस० के० पिल्लइ-महोदयानां मतमत्र समुद्ध्रियते—

"Like several other Sanskrit Nāṭakas, Sītārāghava also deserves greater praise as a poetic work. Pāṇivāda shows himself at his best in this work as a master of ornate expression".

Introduction to Sītārāghava, P. 6

रामपाणिवादस्य नाट्यकलाविषयेऽपि पिल्लइमहाभागानां विचाराः द्रष्टव्याः-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"Pāṇivāda has succeeded in an eminent degree in securing dramatic effectiveness in the presentation of plot. No doubt he borrowed the story from Rāmāyaṇa but the presentation is largely original. No great claim can be made in the matter of characterisation although the delineation of Māyāvasu certainly deserves praise. Pāṇivāda's special skill lies in creating and handling situations commendable for their theatrical effect".

Introduction to Sītārāghava, P. 5-6.

एको महान् दोषो वर्ततेऽस्मिन्नाटके। स तु घटनानां संकथनानाञ्च महत्संकलनमेव। इदं संकलनं नाटकीयतामेव विलोपयति।

बालमार्तण्डविजयम्

नाटकमिदं देवराजकविना विरचितम्। शेषाद्रिपुत्रोऽयं कविः केरलप्रदेश आश्रमाभिधेये ग्रामेऽष्टादशशतके न्यवसत्।[1] अयं कविस्त्रिवाङ्कुरशासकस्य बालामार्तण्डवर्मण (१७२१–१७५८ ई०) आश्रितोऽभूत्। कविना स्वाश्रयदातुर्बालमार्तण्डवर्मणो दिग्विजयो वर्णितः। बालमार्तण्डवर्मणास्मै कवये "नवकालिदास" इत्युपाधिः प्रदत्तः। देवराजो बालमार्तण्डवर्मणो भागिनेयस्य कार्तिकतिरुणालरामवर्मणो मित्रमासीत्।

कथावस्तु

शङ्खतीर्थे जपं कुर्वतः राज्ञः समक्षं प्रकटीभूय पद्मनाभेन किञ्चित्सन्दिष्टम्। तदनुसृत्य राजा मन्त्रिणो कथयति—अहं स्यानन्दूरपुरे जीर्णस्य पद्मनाभमन्दिरस्योद्धारं कुर्याम्। अस्य जीर्णोद्धारकार्यस्य बहुव्ययसाध्यत्वादहं भारतवर्षीयान् राज्ञः पराजित्य तेभ्यो धनं प्राप्यास्मिन्कार्ये समर्थो भविष्यामि। जीर्णोद्धारानन्तरं मया राजसूयविधिनाभिषिक्तः पद्मनाभः मम राज्यभारं ग्रहीष्यति, अनन्तरमहं पद्मनाभस्य युवराजरूपेण निवत्स्यामि। बालमार्तण्डवर्मा पद्मनाभस्येममादेशं पालयितुं स्वचिन्तां प्रकटयति। राजा दिग्विजयाय सेनासन्नाहार्थममात्यानादिशति।

द्वितीयाङ्के राजा मार्तण्डवर्मा विजयप्रयाणसमये ब्राह्मणेभ्यः स्वर्णं धेनवश्च

---

1 K. K. Raja, Contribution of Kerala to Sanskrit literature, P. 168.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वितरति । राजा यथोचितेन दानेन सम्मानेन च स्वसेनापतीन् तोषयति । स्ववियोगव्यथितानां पुरवासिनां विनोदाय मार्तण्डवर्मा स्वभागिनेयाय रामवर्मणेऽभिनव - कालिदासविरचितं दिग्विजयनिबन्धनं दत्त्वा तमाज्ञापयति यत् स पाठककुलाचार्येण रङ्गरञ्जकेन तद्रङ्गे पाठयतु । मार्तण्डवर्मणः दिग्विजयप्रस्थानकाले बहूनि शुभानि शकुनानि भवन्ति । राजा दिग्विजयनिबन्धनकर्तारमभिनवकालिदासं बहुसम्मान्य तस्मै पारितोषिकरूपेणाग्रहारद्वयमर्पयति।

तृतीयाङ्के पाठकः रङ्गरंजकः विरहाकुलानां पुरवासिनां समक्षं दिग्विजयाख्यं निबन्धनं पठति । युवराजः रामवर्मापि तत्र पाठं शृणोति । पाठकेन पठितात्तस्मान्निबन्धनाद्बालमार्तण्डवर्मणः दिग्विजयवृत्तं पौराः विजानन्ति । दिग्विजयाद्विपुलं धनं प्राप्य तीर्थयात्राञ्च कृत्वा मार्तण्डवर्मा स्वराजधानीं प्रतिनिवर्तते । निबन्धनं श्रुत्वातीवमुदिताः पौरजनाः पाठकं बहुमन्यन्ते ।

चतुर्थाङ्के मार्तण्डवर्मा पद्मनाभमन्दिरस्य जीर्णोद्धारं कारयति । जीर्णोद्धारे सम्पन्ने राजा शिल्पाचार्येणामात्यैश्च सहितः मन्दिरसौन्दर्यं पश्यति ।

पञ्चमाङ्के मार्तण्डवर्मा तन्त्रज्ञेन सोमयाजिना पद्मनाभाभिषेकं कारयति। अभिषिक्तं पद्मनाभं दृष्ट्वा राजा तं स्तौति । पद्मनाभः राज्ञः राज्यभारं स्वीकृत्य तं युवराजपदे नियोजयति । अनन्तरमाचार्याः पद्मनाभस्य पूजाहोमादिकं सम्पादयन्ति । राजा भद्रदीपमण्डपं प्रविश्य कवीन् सम्मन्यते । अनन्तरं राजादेशानुसारं राज्याधिकारिणः ब्राह्मणेभ्यः भोजनं, धनं धेनवश्च वितरन्ति । राजा महाभिषेककर्तृभ्य आचार्येभ्यः स्वर्णमणिपीताम्बरादिकं दक्षिणारूपेण ददाति । अनन्तरं राजाभिनवकालिदासं सम्मन्यते । अभिनवकालिदासः स्वर्णमणिमण्डितां कन्यकास्वरूपिणीं स्वकृतिं राज्ञे समर्पयति । सशिष्यः राजगुरुराचार्याश्चाभिनवकालिदासाय मणिमयवलयान्याभूषणानि वस्त्राणि चोपहारस्वरूपेण प्रयच्छन्ति । राजाचार्यान्प्रति कृतज्ञतां प्रकटयति । भरतवाक्यानन्तरं नाटकस्यावसानं भवति ।

राजा मार्तण्डवर्मास्य नाटकस्य नायकः स धीरोदात्तकोटिकोऽस्ति । अत्र सप्तत्रिंशत्पात्राणि विद्यन्ते । अत्यधिकेयं संख्याभिनयदृष्टोचेति निर्विवादम् । नाटकरचयितापि पात्रभूतोऽस्मिन्नाटके । नाटककारेण मार्तण्डवर्माभिनवकालिदासकुमाररामवर्मशिल्पाचार्याणां चित्रणं सुष्ठु कृतम् ।

नाटकेऽस्मिन् शान्तरसस्य प्राधान्यं विद्यते । मार्तण्डवर्मणः पद्मनाभभक्तिरत्र सर्वत्र व्याप्तास्ति । मार्तण्डवर्मणः मतेऽपि नाटकमिदं भक्तिपूर्णं विद्यते । यथा—

भगवद्गुणमाधुर्यं नाटकाख्यं नवं मधु ।
अस्यास्यपङ्कजोद्भूतं विद्वद्भृङ्गमदावहम् ॥ ४.११६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन्नाटके वीररसः शान्तरसस्य सहचारी अस्ति । मार्तण्डवर्मा शौर्येण बहून् राज्ञः पराजित्य तेभ्यो विपुलां धनराशिं प्राप्य पद्मनाभमन्दिरस्याभिनवीकरणं समायोजयति ।वीररसः तृतीयाङ्के वर्तते । चतुर्थाङ्के मरालिकासारिकयोः वार्तालापे हास्यरसः विद्यते ।

के० साम्बशिवशास्त्रिणां मतेऽस्मिन्नाटके वीररसस्य प्राधान्यं विद्यते ।[1]

वर्णनकौशलम्

नाटककारेण मध्याह्नपद्मतीर्थसागरतटाकशरदां वर्णनं रसभावानुकूल्येन कृतम् । तथाहि,

भूत्वा वञ्चिकुलाद्भवानिव महापाथोनिधेर्भानुमान्
भूभृन्मौलिपदं प्रगाह्य जगतामुन्मेषमुद्भाव्य च ।
सर्वाशापरिपूरणं प्रकलयन्नोर्वैर्वसूनामयं
माध्यस्थ्यं वहते समस्तभुवनोत्तुङ्गः प्रतापाकरः ॥ १.४१

आशामण्डलपातिनः प्रविततान् रश्मिप्रतानान् निजान्
बिभ्राणो निपुणोपधार्यसविधच्छिन्नाभ्रविभ्राजितः ।
प्राप्तो मध्यमयं दिवो दिनमणेर्दृश्येत चेत् सन्ततं
दूरोद्यच्चतुरन्तदीप्रपरिधिस्तस्योपमामर्हति ॥ ६.१४

चञ्चन्मारुतपोतकाकुलमहामुक्तासरोदञ्चित-
क्षौमोल्लोचकमध्यभासुरमहानीलप्रभामंजरी ।
वल्गद्वीचिसमूहसान्द्रकलशाम्भोधिस्फुरत्पन्नग-
प्रौढोपर्यधिशायिशार्ङ्गधनुषः सौन्दर्यमालम्बते ॥ ४

समुद्रोऽपि भगवद्भक्तरूपेण चित्रितः । यथा—

विलोकयतु सादरं वरुणपालनीयां दिशं
यदत्र वरुणालयो यमितवीचिहस्तांजलिः ।
प्रतीरमुपयाति च प्रणमति स्खलत्यन्ततो
भवानिव विराजते भगवदंघ्रिभक्त्याकुलः ॥ ४.५२

तटाकोऽत्र पद्मनाभरूपेण चित्रितः । यथा

---

1 Vide, Preface to the edition of "बालमार्तण्डविजयम्" by K. Sambasiva Sastri, p. 9–10

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

नाभिप्रदेशसंफुल्लमहानालीकभासुरः ।
तटाकोऽयं विभात्येष पद्मनाभ इव प्रभुः ।। ४.१२

दूरीकृतवकयूथो मधुकरकुलगीतवैभव इदानीम् ।
राजति राजहंसः परिमलमकरन्दमेदुरे पद्मे ।। १.३

भाषाशैली

कविना सरलैव भाषा व्यवहृता । वाक्यानि लघूनि पदानि च समासहीनानि विद्यन्ते । यत्र तत्र वाक्यानि दीर्घाणि समासान्तपदैश्च संयुतानि सन्ति। पञ्चमाङ्के चतुर्विंशपंक्तिव्यापिन एकस्य वाक्यस्य प्रयोगः कृतः । कविर्गद्ये पद्ये च समानरूपेण सिद्धहस्तोऽस्ति । कविनैकया प्रहेलिकया स्वनाम सूचितम् यथा—

परस्परादेशतया प्रयुक्तहलवर्णकत्वादधृतवेदरूपम् ।
स्वकीयनामाद्यपदं वहन्तं बाले ! कविं वेत्सि हि राजचूडम् ।। १

प्राकृतभाषायामपि कविः प्रवीणः । तेनात्र बहूनि प्राकृतानि पद्यानि प्रयुक्तानि, परन्तु प्राकृतमिदं कृत्रिमं विद्यते । कविना केवलं शास्त्रमर्यादापालनार्थमेवास्य प्रयोगः कृतः । भाषा व्याकरणदृष्टया शुद्धास्ति । कविना 'तिमतिमायन्ते' 'काननचन्द्रिकायते' इत्यादीनि क्रियापदान्यपि प्रयुक्तानि ।

कविना सूक्तिभिः लोकोक्तिभिश्च भाषा प्रभावशालिनी कृता ।

सूक्तयः

१. राज्येन किं भवेत्पुंसो महामोहप्रदायिना
यस्मिन् निविशमानस्य हरिभक्तिर्दवीयसी ।। १.२०
२. यः स्वधर्मपरित्यक्तः प्रत्यवायनिधिर्भवेत् । १.२१
३. आततायिवधो युद्धे राज्ञां धर्मः सनातनः ।
संशयेन कृतं देव ! प्रमाणं तत्र फल्गुनः ।। ९.१०
४. मृगेन्द्रबालकेनापि हन्यन्ते किं न कुञ्जराः । २.१५
५. कार्यकाराः शतं सन्तु राज्ञां किं तैर्यशोभवेत् ।
साधयन्ति च ये कार्यं ते यूयं सम्मता मम ।। ४. १
६. उत्तुङ्गवीचिधाटीभिरुद्धतोऽपि पयोनिधिः ।
वेलां न लङ्घते तद्वद्राजाज्ञां राजसेवकः ।। ४.१३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७. निसर्गो ह्ययमार्याणां गुणमात्रप्रशंसनम् ।
स्वभावो न हि भृङ्गाणां मकरन्दरसग्रहः ॥ ५.१३

८. अल्पं वा बहु वा लभ्यं लभ्यते स्वयमेव तत् ।
प्रवर्तितव्या यत्नेन प्रार्थना जानता हरौ ॥ ५.१३७

९. लक्ष्मीशचरणाम्भोजभक्तिरूपधनं विना ।
रत्नादिकं सुवर्णं वा न धनं बन्धनं हि तत् ॥ ५.१४४

१०. वारिधेरेव गृह्णन्ति वारिदाः सलिलं बहु ।
न संगृह्णन्ति तद्भूयः सद्यो मुञ्चन्ति भूमिषु ॥ ५.१६३

११. कुलीनतावयोविद्यातपःशमगुणादयः ।
पृथक्त्वेनैव सम्पूज्याः किमु यत्र समष्टयः ॥ ५.१६५

लोकोक्तयः

१. पुष्पोद्गमः फलपर्यवसाने किल श्लाघनीयो भवति ।
२. अहो ! महान् पौरजनानुग्रहाद्भुतवृक्षः स्वोत्पत्तिकाल एवं फलवानभूत् ।
३. अनर्घो मणिरभिज्ञे खलु मूल्यमर्हति ।
४. किं परोक्षवर्तिनी लोकानन्दकारिता चन्द्रस्य ?
५. कथमापद्यते रत्नदीपशिखा वात्यया निर्वापणम् ।
६. विपाटिता न कर्तव्या परिपाटी क्रमाश्रिता ।

मनोरथपूर्तिविषयकं कवेरिदमुक्तिवैचित्र्यं द्रष्टव्यम् । यथा—
"तदस्य मनोगतं रथमौदार्यमयीं महतीं रथ्यां प्रापय्य वेगयुक्तया चक्रधाट्या केङ्कारकारिणं करिष्यामि ।"

अलङ्कारयोजना

कविना यथास्थानं शब्दालङ्काराणामर्थालङ्काराणां च प्रयोगः कृतः । परन्त्वलङ्कारा अत्र स्वाभाविकरूपेण प्रयुक्ताः न तु कृत्रिमतया । कविनोपमोत्प्रेक्षारूपकातिशयोक्त्यपह्नुतिव्यतिरेकदृष्टान्तादय अर्थालङ्काराः वृत्त्यनुप्रासलाटानुप्रासश्लेषादयश्शब्दालङ्काराः प्रयुक्ताः ।

छन्दोयोजना

कविना रसस्य भावस्य चानुकूलानि छन्दांसि व्यवहृतानि । पृथ्वीन्द्रवज्रो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

पेन्द्रवज्राशार्दूलविक्रीडितमालिनीवसन्ततिलकास्रग्धराप्रहर्षिणीशिखरिणी-रथोद्धता-स्वागतानुष्टुप्शालिनीवृत्तानां प्रयोगः कृतः, शार्दूलविक्रीडितं कवेरतीव प्रियं छन्दः ।

कवेः शैलीविषयकं के० साम्बशिवशास्त्रिणः मतमपि द्रष्टव्यम् ।[1]

नाट्यकला

नाटकमिदमैतिहासिकघटनाश्रितम् । कथावस्तु पञ्चाङ्केषु विभक्तम् । यथास्थानं विष्कम्भकप्रवेशकानां प्रयोगः कृतः । पञ्चसन्धयः प्रयुक्ताः । मार्तण्डवर्मा धीरोदात्तकोटिकः नायकोऽस्ति । अत्र शान्तवीररसयोर्निष्पत्तिः साफल्येन कृता । विषयवस्तुनो गाम्भीर्यात्कविना विदूषकस्य प्रयोगोऽत्र न कृतः । चरित्रचित्रणदृष्ट्यापीदं नाटकमन्यूनम् । कविना यथास्थानं स्वगतप्रकाशजनान्तिकाकाशभाषितानां प्रयोगः कृतः । पात्रोचिता भाषाप्यत्र प्रयुक्ता । प्राकृतस्य प्रयोगः कविना सीमित एव कृतः । तृतीयाङ्के कविना स्वनिर्मितं दिग्विजयाख्यं निबन्धनं पाठकमुखेन प्रयुक्तम् । एतद्गर्भाङ्कसदृशमस्ति । कथनोपकथनान्यपि प्रभावशालीनि विद्यन्ते । काव्यकलादृष्ट्येदं नाटकं सुष्ठु विरचितम् । इदं नाटकं प्रशंसन्मार्तण्डवर्मा कथयति—

भगवद्गुणमाधुर्यं नाटकाख्यं नवं मधु ।
अस्यास्यपङ्कजोद्भूतं विद्वद्भृङ्गमदावहम् ॥
सद्वस्तुघटितं चारु नाटकं कृतवानयम् ।
तदस्मिन्नेव सदसि महत् सम्मानमर्हति ॥

प्रसिद्धेऽपि कथानके कविना यत्र तत्र परिवर्तनं विहितम् ।

दोषाः

नाटकेऽस्मिन्नाख्यानगतिस्तूर्णा नास्ति । अस्मिन्वर्णनानामेव बाहुल्यं वर्तते ।

---

1 "It is easy to understand that the poet follows the style of Kālidāsa generally; and hence occasional imitation and partial plagiarism are noticeable.
"The poet appears to have been fond of the style of the Mudrārākṣasa also in similar situations."
Vide, Introduction to बालमार्तण्डविजयम् by K. Sambasiva Sastri.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र तत्र नाटयनिर्देशं विनापि पात्राणां प्रवेशः रङ्गमंचे कारितः। कतिपयस्थलेषु कविना पात्राणां नामसु पर्यायवाचिनश्शब्दाः प्रयुक्ताः। एकस्मिन् स्थले "इतरे" पात्ररूपेण विद्यते। अत्र पात्राणां नामाङ्कनेन भवितव्यम्। यत्र तत्र कतिपय-पात्राणि रङ्गमञ्चमागत्य न किमपि कार्यं कुर्वन्ति। यथा वैणिकशिष्यः, राज-सेवकः श्रीकङ्कणः, स्थूलढाकपुत्र-श्रीकण्ठः। अभिनयदृष्टयाप्यत्र कतिपयदोषाः। नाटके यत्र तत्र प्रयुक्तैः दीर्घवाक्यैः दीर्घसमासान्तपदैश्च रसानुभूतिः बाधिता।

सामाजिकी स्थितिः

अस्य नाटकस्याध्ययनेन समसामयिकसमाजस्य विषये सूचनाः प्राप्यन्ते। निम्नलिखिते पद्ये रङ्गस्थलस्य वर्णनं कृतम्। यथा—

आदर्शामलभित्तिरुज्ज्वलमहानीलस्फुरत्कुट्टिमः,
स्वर्णस्तम्भपिनद्धपूगकदलीपालीक्षुकाण्डावलिः।
ऊर्ध्वक्षौमवितानमण्डललसन्मुक्तासरालंकृतो
रङ्गो राजति शातकुम्भघटितस्तम्भाग्रदीपोत्करैः॥ ३.१

रङ्गस्थले दर्शकानामासनव्यवस्था निम्नलिखिते पद्ये वर्णिता—

तिष्ठद्भिः परितो द्विजेतरकुलैः पौरैः क्रमान्मण्डिता
राजन्ती युवतीजनैर्यवनिकां कृत्वा स्थितैरन्तरा।
राजामात्यजनैस्ततोऽन्तरनघैर्विप्रोत्तमैर्वैदिकै
र्विद्वद्भिः रसिकैर्यथोचितमिहासीनैः सभा शोभते॥ ३.२

रङ्गपाठकस्य वेषोऽत्र वर्णितः—

व्यालोलोर्मिमदुज्वलाश्चलपयःफेनालिशुभ्रांशुकः
सर्वाङ्गीणपटीरपङ्ककलितां विच्छित्तिशोभां वहन्।
बाहुद्वन्द्वलसत्सुवर्णवलयः कोटीरवान् कुण्डली
वेषोऽयं वत पाठकस्य कुरुते नो कस्य वा विस्मयम्॥ ३.४

तात्कालिकदाक्षिणात्यमन्दिराणां रचनाशैल्या वर्णनं पद्मनाभमन्दिरवर्णने प्राप्यते। मन्दिरं परितः बहुद्वारयुतः प्राकार आसीत्। गोपुरमपि बहुभिस्तलैर्युत-मभूत्। मूलदेवताया विविधानि रूपाणि मन्दिरे प्रदर्श्यन्ते स्म।

तस्मिन् समाजे ब्राह्मणेभ्यो भोजनप्रदानं पुण्यकार्यमासीत्। निम्नलिखिते पद्ये भोजनसामग्र्या वर्णनमुपलभ्यते—

सर्वं सम्पन्नमन्नं समधिकरुचिकृत् सूपपूर्णैः कटाहैः
सन्निष्ठानैर्गरिष्ठैरपि भरितमभूद् दाधिकाद्यैरनेकैः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आपक्वैः पर्पटौघैः फलभरनिचयैः पुञ्जिताभिः सिताभिः
सार्धं नव्याज्यकुम्भैर्मधुरिमभरितैः पायसौघैश्च पूर्णम् ॥ ५.७५

कविगोष्ठीनां प्रचलनमासीत् । यथा—

गोष्ठ्यां तत्र न लक्ष्यते घटपटाभावोऽथवा घत्र् घटा
टिड्ढाणश्चापि वैन्द्रमाश्विनमिदं मिथ्येति शब्दावली ।
साध्वीयं रसपुष्टिरद्भुतमहो सारल्यमस्मिन्निति
श्लाघाहर्षविवर्धिता परमहो स्वच्छन्दमुन्मूर्च्छति ॥

राजानः कवीनां विद्वज्जनानाञ्च सम्मानं कुर्वन्ति स्म । राजा कलाशिल्पयोः पोषकोऽभूत् । तस्मिन् समाजे तन्त्रस्यातीव प्रभावोऽविद्यत । देवता मानवेष्वाविश्य स्वेच्छाः प्रकटयन्ति स्म ।

"रुक्मिणीपरिणयम्"

अश्वतितिरुणालरामवर्मास्य नाटकस्य प्रणेतास्ति । एष कार्तिकतिरुणालमहाराजस्य भागिनेयः । अनेन कार्तिकतिरुणालाध्यक्षे शिक्षा प्राप्ता । शङ्करनारायणः रघुनाथतीर्थश्चास्य गुरू बभूवतुः । किलिमानूरवासी रविवर्मकोयिलतम्पुरानस्य पिता । रामवर्मणः जीवनकालः १७५५ खीष्टाब्दात् १७९५ खीष्टाब्दपर्यन्तमासीत् ।[1] अनेन कविना संस्कृतभाषायां मलयालमभाषायाञ्च बहवः ग्रन्था विरचिताः । अनेन संस्कृते रुक्मिणीपरिणयनाटकम्, शृङ्गारसुधाकरभाणः, वञ्चिमहाराजस्तवः, सन्तानगोपालप्रबन्धः, कार्तवीर्यविजयप्रबन्धः दशावतारदण्डकाश्च विरचिताः । एष कविः सङ्गीतादिकलासु कुशलः । रुक्मिणीपरिणये नाटके कृष्णरुक्मिण्योर्विवाहो वर्णितः ।

कथावस्तु

नाटकस्याभिनयः भगवत्पद्मनाभसान्निध्यात्पवित्रायां सभायां समभूत् । विदर्भनगरात्स्वयंवरवृत्तं श्रुत्वा वासुभद्रोऽतीव सुमुत्सुकोऽस्ति । इदानीं वासुभद्रः मन्त्रशालायां कुतश्चिदागतं पत्रमेकं पठन्नास्ते । वासुभद्रामात्य उद्धवः कतिपयदिवसेभ्यः पूर्वं कपिञ्जलेन ब्राह्मणेन सह कुण्डिनपुरं गतः । प्रथमाङ्के वासुभद्र उद्धवेन कुण्डिनपुरात्प्रेषितं पत्रं पठन् रङ्गमञ्चमायाति । तदनुसारं कतिपयैरेव दिवसैर्वि-

---

1 K. K. Raja, Contribution of Kerala to Sanskrit Literature Madras, 1958, p. 172

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्भनगरस्य प्राज्ञा मन्त्रिणः, विदर्भनृपतेः प्रियसुहृदो रुक्मिण्याः सख्यश्च स्वपक्षे कृताः। परन्तु रुक्मिण्या भ्रात्रा रुक्मिणा प्रोत्साहितः दमघोषपुत्रश्शिशुपालः रुक्मिणीमुद्वोढुं कामयते। उद्धवेन रुक्मिशिशुपालयोर्वञ्चनोपायोऽपि चिन्तितः। अनन्तरं वासुभद्रः दारुकेण सहितः रथमारुह्य कुण्डिनपुरं गच्छति। वासुभद्रहृदयं रुक्मिण्यास्सौन्दर्येण व्याक्षिप्तमस्ति। कुण्डिनपुरं प्राप्य वासुभद्रदारुकौ कात्यायन्याः मन्दिरे निवसतः।

द्वितीयाङ्के-विष्कम्भके रुक्मिणीसखी-नवमालिकोद्धवयोर्वार्तालापेन सूच्यते यद्रुक्मिणी वासुभद्र एवानुरागिणी विद्यते। रुक्मिणी स्वभ्रातुरिमां प्रतिज्ञां श्रुत्वा दुःखमनुभवति यत्सा चेदिराजाय शिशुपालाय समर्पयितव्या। विदर्भनृपतिस्तस्य मन्त्रिणश्च रुक्मिण्या विवाहं वासुभद्रेण सहैव कर्तुमिच्छन्ति। उद्धवः नवमालिकां वासुभद्रस्य कुण्डिनपुरागमनं कात्यायनीमन्दिरावासं च सूचयति। नवमालिकोद्धवौ रुक्मिणीवासुभद्रयोः परस्परसंयोगयोजनां निर्मातः। द्वितीयाङ्के वासुभद्रो विदूषकाय कपिञ्जलाय निवेदयति यन्मया स्वप्ने स्वशय्यासमीपं लीलाकमलधारिणी रुक्मिणी दृष्टा। विदूषकसमक्षं रुक्मिण्या रूपसम्पत्तिं वर्णयन्वासुभद्रः कामव्यथितो भवति। विदूषको वासुभद्रव्यथामपनेतुमुपायं चिन्तयति। अस्मिन् समये शिशुपालसुहृच्छाल्वः रुक्मिणीं बलादपहरति। वासुभद्रप्रेषितेन सुदर्शनचक्रेण पराजितः साल्वः रुक्मिणीं विमुच्य ततः पलायते। अनन्तरं वासुभद्रः भीतां रुक्मिणीमाश्वासयति। आश्वस्ता रुक्मिणी शृङ्गारलज्जां प्रदर्शयन्ती ततः समुत्थायान्यतो गच्छति। अनन्तरं वासुभद्रानुमतिं प्राप्य नवमालिका रुक्मिण्या साकं ततः निर्गच्छति। वासुभद्रविदूषकावपि कात्यायनीमन्दिरं गच्छतः।

तृतीयाङ्के विष्कम्भके सूच्यते यद्वासुभद्रेऽतीवासक्तत्वाद्रुक्मिण्यस्वस्थहृदयास्ति। अनन्तरं शशिकान्तमणिशय्यांमधिशयानां महतीं कामव्यथामनुभवन्तीं रुक्मिणी समाश्वासयन्ती नवमालिका तस्यै वासुभद्रनर्मसचिवेन कपिञ्जलेन प्रदत्तं मुक्ताहारं शिशिरोपचारार्थं ददाति। परन्तु तेनापि रुक्मिण्याः कामतापः नापनोद्यते। रुक्मिणी चित्रफलके वासुभद्रस्यातीव रमणीयं चित्रं निर्माय तस्य चरणयोः पतित्वा तं दयामभ्यर्थयते। अस्मिन् काले नेपथ्याद्रुक्मिणः शिशुपालागमनविषयिकीं वाणीं श्रुत्वा रुदन्ती रुक्मिणी मूर्च्छति। नवमालिकया समाश्वस्ता रुक्मिणी स्वभ्रातुर्निर्दयतां ख्यापयन्ती स्वभाग्यं निन्दन्त्यात्मघातं निश्चिनोति। परन्तु नवमालिका रुक्मिणीं समाश्वास्य तां कात्यायनीमन्दिरपार्श्वं नयति।

चतुर्थाङ्क एकस्मिन्विष्कम्भके विवाहोचितं वेषं धारयन् शिशुपालः स्वताम्बूलदेन नूपुरकेण सह रङ्गमञ्चमायाति। नूपुरकः कामपीडितं शिशुपाल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

माश्वासयति । नूपुरकेण साकं प्रासादशिखरमारुह्य शिशुपालः वध्वा रुक्मिण्याः स्वयंवरयात्रां पश्यति । विदूषकेण सहितः वासुभद्रोऽपि कात्यायनीमन्दिरस्य गौरीविलासप्रासादस्य गर्भगृहे स्थित्वा रुक्मिणीं प्रतीक्षते । अनन्तरं नवमालिकानङ्गसेनाभ्यां सहिता रुक्मिणी कात्यायनीमन्दिरमायाति । अतीव व्याकुला रुक्मिणी नवमालिकां कथयति यद्भगवतीपादवन्दनानन्तरं सा स्वप्राणान्परित्यक्ष्यति। नवमालिकया समाश्वस्ता रुक्मिणी भगवतीपादवन्दनं करोति । नवमालिका शीघ्रमेव रुक्मिणीं गौरीविलासप्रासादस्य गर्भगृहं नयति । तत्र रुक्मिणीमुपवेश्य नवमालिका तस्या प्रसाधनं कारयति । अनङ्गसेनयानीतानि रुक्मिण्या मातुलपत्न्या प्रेषितान्याभूषणानि नवमालिका रुक्मिणीं परिधापयति । रुक्मिण्या अनुमतिं प्राप्य नवमालिका तस्याः पुराणान्याभूषणान्यनङ्गसेनायै ददाति । अनन्तरं नवमालिका स्वश्रूसंज्ञया वासुभद्रं तत्राहूय तस्य हस्ते रुक्मिणीहस्तं दत्वा तं रुक्मिण्या शोकपरिहरणं याचते । इदं कथयित्वा नवमालिका ततो गच्छति । लज्जाशीला रुक्मिणी वासुभद्रहस्तात्स्वहस्तं विमोक्तुं यतते । तामाश्वासयन्वासुभद्रः कथयति यद्भवत्या आभूषणानि परिधायानङ्गसेना स्वयम्वरभूमिं गता । अनङ्गसेनया साकं शिशुपालस्य विवाहो भवतु ।

पञ्चमाङ्क एकस्मिन्विष्कम्भके विदर्भराजामात्यसेनापतिसिंहकेत्वोर्वार्तालापेन सूच्यते यज्जरासन्धादयश्शिशुपालसुहृदश्शिशुपालस्येदमलीकंपाणिग्रहणं ज्ञात्वोद्वेगमस्यापमानस्य कारणमाकलय्य तस्य निवासस्थानमावृतवन्तः । भीतां रुक्मिणीमाश्वास्य वासुभद्रोऽपि युद्धाय कटिबद्धोऽभूत् । परन्तु यदा वासुभद्रः शत्रुः पश्यति तदैवाकाशात्पुष्पवृष्टिस्संजाता । शत्रूणां हस्तेभ्यश्च धनूंषि पतितानि । अनन्तरं शिशुपालसुहृदः युद्धभूमेः पलायिताः । रुक्मी स्वभगिन्या इमं राक्षसविवाहं शिशुपालावमाननञ्च दृष्ट्वा वासुभद्रं प्रति चोराद्यपशब्दान्कथयति । परन्तु वासुभद्रः रुक्मिण्याः प्रणयानुरोधेन रुक्मिणं न दण्डयति । विजयी वासुभद्रः रुक्मिणीकपिंजलोद्धवदारुकैस्सहितः रथमारुह्य द्वारकां गच्छति । भरतवाक्यानन्तरं नाटकस्य समाप्तिर्भवति ।

चरित्रचित्रणकला

पात्राणां चरित्रचित्रणं कविना सुष्ठु कृतम् । अस्य नाटकस्य नायकः वासुभद्रोऽस्ति । स धीरोदात्तोऽस्ति । वासुभद्रः गुणग्राहकः, प्रकृतिप्रेमी, पराक्रमी, क्षमावान्परिहासप्रियश्च विद्यते । रुक्मिण्यत्र नायिकास्ति । एषातीवसुन्दरी, गुरुजनाज्ञाकारिणी, बुद्धिमती, विनयवती, लज्जाशीला, सहृदया, पतिपरायणा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चास्ति । वृक्षान्पक्षिणश्च प्रति रुक्मिण्या उत्कटोऽनुरागः विद्यते । एषा चित्रकलायामपि निपुणास्ति । रुक्मिणीसखी नवमालिका सोत्साहा, संविधानचतुरा, स्वामिनीभक्ता चास्ति । प्रतिनायकश्शिशुपालः मूढः, पापी, लुब्धः स्तब्धश्च वर्तते । वासुभद्रामात्य उद्धवः कूटनीतिज्ञः प्रतिभाशाली, संविधानपटुः विनयशीलश्च विद्यते । विदूषको कपिंजलः भोजनप्रियः परिहासकुशलश्च वर्तते । अस्मिन्नाटके चतुर्दशपात्राणि विद्यन्ते ।

प्रकृतिवर्णनम्

नाटककारेण वसन्तमलयानिलोद्यानानां सूर्योदयसूर्यास्तरात्रीणाञ्च वर्णनमत्र कृतम् । नर्मदागङ्गावृन्दावनानामपि वर्णनमत्र प्राप्यते ।

महीतलकृतावतार इदानीमुपगूढसुरभिवनमालः ।
नित्यमुद्धवसहितो मन्मथजनको हि माधवो जयति ॥

भाषाशैली

अस्य नाटकस्य भाषा क्वचित् सरलान्यत्र क्लिष्टा विद्यते । यत्र तत्र लघूनि वाक्यानि दृश्यन्तेऽन्यत्र च दीर्घाणि बहुपंक्तिमन्ति वाक्यान्युपलभ्यन्ते । प्राकृतभाषायामपि बहुपंक्तिमतां वाक्यानां प्रयोगो वर्तते । नाटककारस्य कवित्वं प्रशंसनीयमस्ति । तेनात्र विविधानि छन्दांसि प्रयुक्तानि । अर्थालङ्कारेष्वत्रोपमोत्प्रेक्षारूपकापह्नुत्यादीनां शब्दालङ्कारेषु चानुप्रासयमकश्लेषाणां प्रयोगः कृतः । नाटककारस्य प्रवृत्तिः दीर्घवाक्यानां प्रयोगार्थं विद्यते । कविना सूक्तीनां लोकोक्तीनाञ्च प्रयोगेण भाषायाः प्रभावोत्पादकता समापादिता ।

सूक्तयः

१ परगुणग्राही विद्वान्द्विजातिरन्वेषणो
रिपुरभिमतो वीतक्रोधोऽपरागमना मुनिः ।
वितरणपटुः श्लाघाशून्यः सुखी परसेवको
विगतकुहनाटोपो लोके विटोऽपि सुदुर्लभः ॥

२ सकललोकलोचनानन्ददायिनी कुंमुदिनी सहजसौन्दर्यरमणीयस्य सुधानिधेरालोकनाय स्पृहयत्येव ।

३ नन्वयस्कान्तमणय इव लोहानि निष्ठुराणि क्षुल्लकानामप्याकर्षन्ति मनांसि महतां गुणाः, किमुत स्वभावसरसमृदूनीतरेषाम् ।

४ तन्मित्रं यद्व्यसने सा लक्ष्मीर्या करे स्थिता भवति ।
तद्रूपं यत्र गुणास्तद्विज्ञानं यत्र धर्मः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
080469

५ वृक्षविकारेण विविधरत्न स्फुरन्मयूखेन ।
ज्ञायते सुजनैः शुभोदयाभ्युदगमो निमित्तेन ॥
६ किमभेद्यमम्भसा किमदूष्यं दुर्जनानाम् ?
७ किं नु खलु दुष्करं पापानाम् ?
८ निसर्गचपलाः प्रमदा भवन्ति ।

लोकोक्तयः

१ सकवलितहालाहलस्य जनस्य सर्पदंशः ।
२ का खलु वर्णना चन्द्रः सुधोद्गारीति ।
३ पिबतु दुग्धमिति जीर्णमार्जारस्तक्रम् ।
४ कमलाकरं वर्जयित्वा न राजहंस्यन्यस्मिन्नभिरमते ।
५ न हि कुलशैलनिवहवाहिनो वायवः संनह्यन्ति तरले तूलराशौ । न च सुमेरुवप्रप्रणयप्रगल्भा वा दिक्करिणः परिणमन्त्यणीयसि वल्मीके ।

नाट्यकला

नाटकमिदं नाट्यशास्त्रनियमानुकूलमस्ति । अत्र मुखप्रतिमुखगर्भविमर्शनिर्वहणाः पञ्चसन्धयः विद्यन्ते । प्रवेशकविष्कम्भकयोरप्यर्थोपक्षेपकयोरत्र प्रयोगः कृतः । अत्र सर्वाणि पात्राणि नाट्यशास्त्रानुसारं यथोचितभाषया संवदन्ति । संवादेष्वपि नाटककारः कुशलोऽस्ति ।

दोषः

प्रथमाङ्कप्रारम्भे प्रवेशकस्य प्रयोगः नाट्यशास्त्रनियमविरुद्धोऽस्ति । अत्र विष्कम्भकस्य प्रयोगेण भवितव्यम् ।

सामाजिकी स्थितिः

नाटकेऽस्मिन्बहुषु स्थलेषु समसामयिकसामाजिकस्थितिः सूचिता । अष्टादशशतकीयानामुज्जयिनीवाराणसीद्वारकाणां वर्णनमत्र प्राप्यते । उज्जयिन्या विशाला विपणयो महाकालशिवोऽनेकाः सुन्दर्यश्चात्र वर्णिताः । वाराणसीं मुक्तिक्षेत्रं ज्ञात्वा तत्रानेके मुनयः, विद्याभूमिमवगत्य बहवो जिज्ञासवोऽप्सरसां पुरश्चाकलय्यानेके विटाश्च न्यवसन् । द्वारकायां गवाक्षका दर्पणयुता आसन् । कन्यकाविवाहसमये मातृपूजनप्रथाष्टादशशतकेऽप्यविद्यत । कन्यका स्वसखीभिः वृद्धाभिश्च साकं मातृपूजनार्थमगच्छत् ।

उपर्युक्तविवेचनेन सूच्यते यदष्टादशशतके केरलप्रदेशे राजाश्रयं प्राप्य संस्कृतरूपकसाहित्यं समृद्धं संजातम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar